श्रीमहाभारततात्पर्यनिर्णयः
टीकायुतः

Sri Mahabharata tatparya Nirnaya

135
7

X X

श्रीमदानन्दतीर्थ [illegible]

श्रीमहाभारततात्पर्यनिर्णय

सटीक।

135/7

नरसिं चस्पे दे

टीका - वरदराजप्रणीता

135/7

ता०टी० ॥ ॥श्रीवेदव्यासाय नमः॥ ॥श्रीमदानंदतीर्थभगवत्पादाचार्येभ्यो नमः॥ ॥ॐ आनंदतीर्थहृत्पद्मकर्णिकावासमच्युतं नत्वा भारततात्प
१ र्यनिर्णयं विवृणोम्यहं १ अथ महाभारततात्पर्यनिर्णयव्याजेन सकलशास्त्रार्थतात्पर्यं दर्शयितुकामो भगवानाचार्यः स्वयमंतरा
यविदूरोपि निरंतरायप्रारीप्सितपरिसमाप्त्यादिहेतुभूतमिष्टदेवतानतिरूपं मंगलं शिष्यान्ग्राहयितुं अनुष्ठितं ग्रंथादौ निबध्ना
ति नारायणायेति नारायणाय ते नमो नम इति सिद्धं वा ग्रंथारंभसमयेप्यपरोक्षीकृतभगवद्रूपत्वान्नेदं त्वपरोक्षेण निर्देशः। भक्त
तिशयद्योतनाय नमो नम इति द्विरुक्तिः। नानिर्धारितस्वरूपस्य वंदनं युक्तं न च तज्ज्ञानेन विना स्वरूपनिर्धारणमित्यतो नारायणस्य
लक्षणान्याह परिपूर्णेत्यादिना। परिपूर्णाः संपूर्णाश्च ते गुणाश्चेति ते पूर्णा व इव तस्मै तथा विश्वस्य जगतः उदय उत्पत्तिः स्थितिः संर
क्षणं लयः संहारः उन्नतिर्नियमनं एतानि प्रददातीति तत्प्रोक्तं तस्मै। ज्ञानं प्रददातीति ज्ञानप्रदस्तस्मै। विबुधाश्च असुराश्च तेभ्यो यथा

॥ ॥श्रीवेदव्यासाय नमः॥ ॥नारायणाय परिपूर्णगुणार्णवाय विश्वोदयस्थितिलयोन्नियतिप्रदाय॥ ॥ ॥
ज्ञानप्रदाय विबुधासुरसौख्यदुःखसत्कारणाय वितताय नमो नमस्ते १ ॥ ॥ ४४४४॥ ॥ ॥

क्रमं सौख्यदुःखयोः सत्कारणाय। अत्र विबुधासुरशब्दौ सज्जनासज्जनोपलक्षणार्थौ। अनेन मोक्षप्रदत्वमुक्तं। बिंबकत्वेन विना मोक्षप्रद
त्वानुपपत्तेर्बिंबकत्वमुक्तप्रायं। बंधस्यावरणरूपाज्ञानेन विना नोपपद्यत इत्यावृत्तिरप्युक्ता भवति। तथा च जगज्जन्मादिकर्तृत्वादि लक्ष
णाष्टकमुक्तं भवति। तथा चोक्तं। उत्पत्तिस्थितिसंहारा नियतिर्ज्ञानमावृतिः। बंधमोक्षौ च पुरुषाद्यस्मात्स हरिरेकराडिति। ननु चैवं जगत राम
स्य नारायणस्य देशतो विप्रकृष्टजगत्कारणत्वेऽप्यघटते इत्यत उक्तं विततायेति व्याप्तायेत्यर्थः। अथवा प्रारीप्सितपरिसमाप्त्यादिप्र १
योजनमन्यदेवतावंदनेनापि भविष्यतीत्यत आह किं नारायणस्यैव नमस्कारेणेत्यत उक्तं तस्यैव वंद्यत्वोपपादनार्थं परिपूर्णेत्याद्युक्तं। परिपूर्ण
गुणत्वादिना सर्वेष्टप्रदानशक्तिमत्वात्तस्यैव वंद्यत्वमुक्तमिति भावः। अथवा नारायणशब्दार्थं दर्शयितुं परिपूर्णगुणार्णवायेत्युक्तं।
तथा च दोषारशब्दयोः पर्यायत्वाद्दोषविरुद्धगुणा नारास्तदाश्रयत्वान्नारायण इत्युक्तं भवति। नारायणशब्दप्रवृत्तिनिमित्तं परिपूर्ण

इदानीं विश्वोत्पत्त्यादिकर्तृत्वं नारायणस्यैवेत्युक्तं यद्यस्योत्पत्त्यादिकर्तृ तत्ततः पूर्वभाविदृष्टं इत्यतो शेषजगदपेक्षया तस्यापि पूर्वभावोस्मी
त्यतो सत्त्यादितरस्मो वेदन आसीदिति चशब्दोवधारणे। अग्रेनारायण एक एवासीदिति संबंधः। तथा चैतरेयश्रुतिः। आत्मा वा इद
मेक एवाग्र आसीदिति। उदाराः उत्कटाः श्रेष्ठगुणाः श्रुतेर्वारिधिरिव। अनेन श्रुतिस्थात्मशब्दो व्याख्यातः। तथा चोक्तं। नित्या ततगुणा त्वात्म
त्वात्मेतिश्रुतिरुदिति। तद्वपादतात्वोक्तमप्रमेय इति। साकल्येन प्रमातुं केनापि न शक्यत इत्यर्थः। पूर्वोक्तं द्रुतमिति भावः। अ
त एव परमा उत्कृष्टाद्यप्रमेय्व्रह्मावाद्विचेतनसमूहात्परतमोतिशयेनोत्कृष्टः। नन्वब्रह्मादीनामपितदानींविद्यमानत्वात्कथमेक एव

आसीदुदारगुणवारिधिरप्रमेयो नारायणः परतमः परमात्म एकः। संशां
तसंविदखिलं जठरे निधाय लक्ष्मीभुजांतरगतः स्वरतोपि चाग्रे २ ॥॥

वासीदित्युपपद्यत इत्यत उक्तं संशांतसंविदिति। सम्यक् शांता निर्विकारा संवित् ज्ञानं यस्यासौ तथोक्तः। अत्येषां संविदो विकारसद्भाव
दिस्यसंविदः तदभावादेक एवासीदित्युपपन्नमिति भावः। तथा च श्रुतिः। नान्यत्किंचन मिषदिति। नन्वेक एवासीदित्युक्तमान्यस्या
भाव एव किं तस्यादित्यत उक्तमखिलं जठरे निधायेति। तर्हि श्रियोपि तथात्वं किमित्यतो नेत्याह। लक्ष्मीभुजांतरगत इति। एतेनै
कांकित्वेपि तस्मिन्नत्र दुःखशंका तन्नक्तं व्येत्युक्तं भवति। भोगार्थं लक्ष्मीभुजांतरगतस्य विषयसापेक्षत्वं तस्य सुखमिति प्राप्तमि
त्यतः स्वरत इत्युक्तं विषयनिरपेक्ष्यैरात्मन्यात्मनि वरत इत्यर्थः। तर्हि किमर्थं लक्ष्मीभुजांतरगत इत्यत उक्तमपीति। स्वरतोपि न द
श्यग्रहार्थं तद्भुजलतालिंगित इति भावः २ ॥

एवंप्रलये श्रीसहायस्य हरेः को व्यापारः संजात इत्यत आह। तस्येति। उदरस्थं जगद्यस्यासौ तथोक्तः। तस्य नारायणस्य सर्ज्यस्रष्टाव
ज्ञाद्दष्टाव भूत्वेति संबंधः। सर्वस्यापि सृष्टिं निवारयति। सर्ज्यस्रष्टाविति। न त्वनारायणस्य सृष्ट्यादौ प्रवृत्तिः फलवत्त्वतः। आद्ये
पूर्णत्वं स्यात्। द्वितीये प्रवृत्तिरेव न स्यादित्यतो द्वितीयं पक्षमंगीकृत्याह। सदमंदेति। संनिर्दिष्टः अमंदः पूर्णः सांद्रो निरंत
रः स्वः स्वस्वरूपभूतः आनंदस्तेन संबद्धं फलानपेक्षं वपुः स्वरूपं यस्य सः। तथा तस्य स्वस्य प्रयोजनाभावेपि केवलमानंदोद्रेका
देव प्रवृत्तिरिति भावः। आद्यं पक्षमंगीकृत्यापि प्रवृत्तिं समर्थयते। निजाश्रितजनस्य भूत्या इति। सर्वेषां सत्त्वानिजाश्रितजनस्य स्थू
लदेहयोगे तज्ज्ञानादिदानेन तत्स्वरूपानंदाविर्भावलक्षणगौरवैश्वर्यप्राप्त्यर्थं तत्र प्रवृत्तिरिति भावः। रमारमस्येति प्रयोजनांतरोक्तिः।

तस्योदरस्थजगतः सदमंदसांद्रस्वानंदतुष्टवपुषोपि रमारमस्य भूत्यैनि
जाश्रितजनस्याद हि सर्ज्यस्रष्टावीक्षा बभूव परनामनिमेषकांते ३

तथा च वक्ष्यति। मायां श्रियं स्रष्टिविविक्षयारेति। कदेक्षा बभूवेत्यत आह। परनामनिमेषकांत इति। ब्रह्मणो वर्षशतं परमित्युच्य
ते। तत्रामस्वस्य निमेषः ब्रह्मणो वर्षशतं हरेर्निमेषायते। तदग्रुपचरितमात्रं मुख्यतस्तदपि नास्तीति दर्शयितुं कृत्स्नार्थः काष्ठयत्ययः।
तथा चोक्तं। नित्यस्यापि हरेः कालो द्विपरार्द्धात्मकस्त्वयं। अस्याऽसौ निमेषत्वेनोपचर्यते मामा चतुर्मुखायुर्वर्षशतं ते सृष्टिं कर्तुमीक्षां
बभूवेति भावः। ईक्षाग्रहणेन हरेर्निमित्तकारणत्वमुक्तं। तेन परोदीरितमुपादानत्वं निराकृतं भवति। इक्षापूर्वं स्रष्टुरि कुलालादौ त
द्दर्शनात्स्वपिंडादावुपादानतेन तदद्दर्शनादिति भावः। हिशब्देन सर्वज्ञत्वलोकाद्युस्सृजत इत्यादिश्रुतिप्रसिद्धं सूचयति ३ ॥ ॥

हा

स्वज्यास्वज्येविवेचयन्दृष्ट्वाज्ञानतेन्द्रश्यंभावमाहाहृष्ट्वेति।सनारायणोजठरेस्वोदरेशयानान्स्थितान्स्वेतनगणान्सचेतनानांजीवानां
गणान्दृष्ट्वास्वज्यान्स्वस्वेष्टैस्वैर्ददितिसंबंधः।तत्रमुक्तामुक्तप्रभेदेनद्विविधाविद्यमानतांश्चेतनगणान्दर्शयति।आनंदमात्रवपुषइत्या
दिना।तत्रसृतेःसंसाराद्विमोक्षेणाप्रमुक्ताःमुक्ताइतियावत्तान्इतितेषांविशेषणं।आनंदमात्रवपुषःआनंदमात्रंआनंदएववपुर्देहो
येषांतेतथातान्।पुनःकथंभूतान्ध्यानंगतान्स्वस्वयोग्यभगवद्रूपविशेषध्यानेरतान्नित्यर्थः।ब्रह्मादिकानित्येतदत्रापिसंबध्यते।
एवंदुःखमात्रवपुषः।आविर्भूतस्वरूपद्वेषैकरतमतस्कान्।कलिपरान्नित्यइष्टव्यं।अनेनद्विविधेषुसृतिमुक्ताःप्रदर्शिताः।सृ
तिगणान्संसारयोग्यानमुक्तानितियावत्।तेषांविशेषणंसुषुप्तिसंस्थानितिसुप्तानितियावत्।तत्रापिब्रह्मादिकान्कलिपरा

दृष्ट्वासचेतनगणान्जठरेशयानानानंदमात्रवपुषःसृतिविप्रमुक्तान्।ध्यानंगता
न्सृतिगतांश्चसुषुप्तिसंस्थान्ब्रह्मादिकान्कलिपरान्मनुजांस्तथैवच ४ ॥ ॥

न्मनुजानितिसंबध्यते।मनुजशब्देननित्यसंसारिणोविवक्षिताः।मनुष्योत्तमानांब्रह्मादिकानित्यादिशब्देनगृहीतत्वात्तथामनुष्याध
मानांकलिपरानित्यनेनगृहीतत्वात्।कलिःपरोदुःखाधिकोएषांद्वेषिणांमनुष्याधमानांतानांतेतथातानित्यर्थः।ननुसृतिगतानांक
ल्यादीनांसुषुप्तिसंस्थत्वेपिब्रह्मादीनांतथात्वेकिंप्रमाणमितिचेत्।नानब्रह्मानशिवश्चासीन्नैवान्यच्चामितत्।सुप्रासृतयतोजा
वाःसर्वेब्रह्मशिवादिकाइत्याचार्यैरत्यत्रप्रमाणस्योदाहृतत्वात्।तत्स्थेनैवप्रमाणेनमुक्तब्रह्मादिकानांरमायाश्चसुप्रात्वंप्राप्त
मितिताशंकनीयं।असुप्राश्रीश्चमुक्ताश्चस्वतंत्रोन्योपवर्जिताः।असुत्वेषाएवतेपिस्वतंत्रोन्योपएकराट्।नारायणोनचान्योस्ति
सृतोन्मात्रगणात्मकइत्यादिप्रमाणोदाहरणेनभगवत्पादैरत्यत्रतच्छंकायाःपरिहृतत्वादित्यलंविस्तरेण ४ ॥ ॥

कथमैच्छदित्यतस्तत्प्रकारमाह। स्वस्थे हीति। मम विहृतिं मदीयां क्रीडामिच्छन्नस्वस्थं चेतनगणान्स्वस्थ्ये व कस्मै प्रयोजनायेत्यतो भक्त्येति
जेत्युक्तेः परप्रयोजनं विशदयति। तद्भक्तां सुखवद्दुःखमध्यसंप्राप्नुयेदिति। स्पष्टोऽसत्यां स्थूलदेहप्राप्त्या त्रिविधानां जीवानां सुखवप्राप्नु
येद्दुःखप्राप्नुयेत्सुखवद्दुःखसंभेदरूपमध्यप्राप्नुयेच्चेत्यर्थः। तस्मात्सोऽयं विहारस्त्वहमेव हस्तस्पृष्ट्यादिविषये मम सेव्यं क्रीडा तद्भक्तस्व
भावसंभृतये तद्भक्तानां जीवानां स्वभावः साधुत्वादिः सुखवद्दुःखमध्यसंप्राप्तिरिह तद्भक्तस्तस्य संभृतये प्रादुर्भावाय भवतीत्यर्थः।
न केवलमेतावद्भूयाल्लक्ष्म्या भूतिकृत्। पुत्रपौत्रादिसंपादकत्वेनैश्वर्यकृद्भवतीत्यर्थः ५ इत्थं विचार्य ततः किमकरोदित्य

स्वस्थे हि चेतनगणान्सुखदुःखमध्यसंप्राप्नुयेत्तद्भक्तां विहृतिं ममेच्छन्। सोऽयं विहार इह मे तद्भक्तस्व
भावसंभृतये भवति भूतिकृदेव भक्त्याः ५ इत्थं विचिन्त्य परमः स तु वासुदेवनामा बभूव निजभुक्ति
पदप्रदाता। तस्यांशतश्चैव नियता परमापि रूपं वव्रे द्वितीयमपि यत्प्रवदंति मायां ६ ॥ ॥ ॥

तत आह। इत्थमित्यादिना। परमः उत्कृष्टः स नारायणः। इत्युक्तप्रकारेण विचिन्त्य विचार्य वासुदेवनामा बभूव वासुदेवत्वेनावततारेत्य
र्थः। तदवतारासाधारणप्रयोजनमाह। निजभुक्तिपदप्रदातेति। निजानां स्वभक्तानां भुक्त्याख्यपदं प्रदातेत्यर्थः। तद्भार्यात्वेन देव्या
अप्यवतारमाह। तस्येति। अथवा वासुदेवावतारानंतरं तस्य हरेः आज्ञया नियता तदधीनेत्यर्थः। एवं भर्तारमास्थाय मूलरूपापेक्षया
द्वितीयं रूपं वव्रे। तस्य रूपस्य नाम चैवमाह। यदिति। यद्द्वितीयं रूपं तन्मायां प्रवदंति विद्वांस इत्यर्थः ॥ ६ ॥ ॥ ॥

वासुदेवावतारानंतरं हरेः संकर्षणावतारं सप्रयोजनमाह। संकर्षणश्चेति। पुनर्वासुदेवावतारानंतरं स नारायणः संकर्षणश्च बभूव। सं
कर्षणत्वेनावततार। कथंभूतः संहारकारणं वपुः स्वरूपं यस्य स इति तद्योज्यं। ननु बभूवेत्युभयत्रावतारे प्रागसतः सत्तासंबंधः प्रतीयते इत्य
त आह। स्वनित्य इति। ननु नित्यत्वं ध्वंसाप्रतियोगित्वं ध्वंसाप्रतियोगित्वं न चात्र तारतम्यमस्ति। अतः स्वनित्य इति कथं उक्तमिति चेन्नानि
त्यः स्वतेजसा नाशाभावमात्रं प्रतीतिस्तस्य चेतनाचेतनस्य वारणत्वाच्च तद्विवक्षापि नाशो नास्तीति दर्शयितुं स्वनित्य इत्युक्तं। तथा चोक्तं अनित्य
त्वदेहहानिर्ई स्वप्नाप्तिरस्मृतिः। नाशः षड्विधः प्रोक्तस्तदभावो हरेः सदेति। संकर्षणभार्यात्वेन रमाया अपि द्वितीयावतारमाह। तदनु
येति। तस्य हरेस्तत्पादे वा रमा अन्वेव तदनंतरमेव जयेति बभूव जयेति नामकमवतारं कृतवतीत्यर्थः। संकर्षणावतारानंतरं तृतीयत्वे
न हरेः प्रद्युम्नावतारमाह स इति। स नारायणः सृष्टिहेतोः प्रद्युम्नतामुपगतः प्राप्नवान्। प्रद्युम्नावतारं कृतवानिति यावत्। तदवतारप्रयोजन

संकर्षणश्च स बभूव पुनः स्वनित्यः संहारकारणवपुस्तदनु जयैवं। देवी जयेत्यनु बभूव स सृष्टिहेतोः प्रद्युम्नतामुपगतः कृतिं तां च देवी ७
स्थित्यै पुनः स भगवाननिरुद्धनामा देवी च शांतिरभवच्छरदां सहस्रं। स्थित्वा स्वमूर्तिभिरमूभिरचिंत्यशक्तिः प्रद्युम्नरूपक इमां स्वरमात्म
नेदात् ८ ॥

मुक्तं सृष्टिहेतोः सृष्टिं कर्तुमित्यर्थः। प्रद्युम्नभार्यात्वेन देव्या अप्यवतारमाह। कृतिं तां च देवीति। देवी रमा कृतिं तां कृतिनामकं रूपं कृतवतीत्यर्थः।
७ प्रद्युम्नावतारानंतरं चतुर्थत्वेनानिरुद्धावतारं सप्रयोजनमाह। स्थित्या इति। पुनस्तदनंतरं स भगवान्नारायणो निरुद्धनामाभवदित्यर्थः।
कस्मै प्रयोजनाय स्थित्यै उत्पादितस्य जगतो रक्षां कर्तुमित्यर्थः॥ तद्भार्यात्वेन देव्या अपि चतुर्थमवतारमाह। देवी च शांतिरभवदिति। देवी
रमा शांतिनामकरूपत्वेनावततारेत्यर्थः। शरदां दिव्यवर्षाणां सहस्रं आमूर्तिः वासुदेवादिमूर्तिभिः स्थित्वा अचिंत्यशक्तिः प्रद्युम्नरूपस
पको नारायणः इमां स्वेतनगां स्वरमात्मने चतुर्थावताररूपानिरुद्धायादादित्यर्थः। अचिंत्यशक्तिरिति हेतुगर्भविशेषणं असंभाव
नानिरासार्थं ८ ॥ ॥

चेतनगणानवहीत्वा चेतनगणान्दहीत्वा॥ निरुद्धः किं कृतवानित्यत आह॥ निर्दहकानिति॥ अनिरुद्धनामा स भगवान्हरिर्निर्दहकान्लिंगदेहा
तिरिक्तदेहशून्यान्स्वकर्मसहितान्देहप्रापकादृष्टयुक्तान्जीवान्स्वोदरे निवेश्याथ देहसहितान्स्थूलदेहसहितांश्चक्रे देहयोगेनोत्पादयामा
स। तत्रोत्पन्नानां तेषां मान्याहा स्वयं स्थित्यादिना॥ प्राणानामात्मा स्वामी मुख्यप्राणः २ इतः परं ज्ञातं सृष्टिं तृतीयाध्याय एव वक्ष्यन्नप्रसं
संगत्या ध्यायद्वये भगवतो महात्म्यब्रह्मादीनां तारतम्यं च सप्रमाणकं निरूपयितुमाह॥ पंचात्मक इत्यादिना॥ न केवलं पूर्वोक्तरीत्या ना
रायणो वासुदेव संकर्षण प्रद्युम्नानिरुद्धभेदेन पंचात्मकः पंचरूप एव स भगवानपि तु केशवादिभेदेन द्विषडात्मको द्वादशात्मको ऽन
न्त। तथा पंच च द्वयी मत्स्यादित्वेन पंच च द्वयी दशात्मकः॥ विश्वादिभेदेन सहस्रात्मकः॥ परादिभेदेन वद्धात्मकः॥ अजितादिभेदेनामितात्म

निर्दहकान्स भगवाननिरुद्धनामा जीवान्स्वकर्मसहितानुदरे निवेश्य। चक्रेऽथ देहसहितान्क्रमशः स्वयं स प्राणात्मशेषगरुडेशमुखा
न्समयान्न २ पंचात्मकः स भगवान्द्विषडात्मकोऽनंतं च द्वयी शतसहस्रपरोमितस्त्वा एकः समोऽप्यखिलदोषसमुज्झितोपि सर्वत्र
पूर्णगुणकोपि वहूपमोऽनंत १० ॥

कश्चेत्यर्थः॥ चशब्देन स एव दशधा प्रोक्तो विश्वमत्स्यादिरूपकः॥ शतं नारायणाद्यात्मा सहस्रकं॥ परादिरूपो वहुधा सोऽनंतोऽमितात्मक
इत्यादिप्रमाणं उक्तार्थे समुच्चिनोति॥ ननु वहुत्वसंख्यावत्वेन स्य भगवतः स्वगतभेदादिप्राप्तिः स्यादित्यत आह एक इति॥ एकः स्वगत
भेदवर्जितः समो गुणतारतम्यरहितः॥ सर्वरूपेषु अखिलैर्दोषैः पारतंत्र्यादिभिः समुज्झितो रहितः॥ सर्वत्र पूर्णगुणकोपीति समशब्दा
र्थेन प्रतं॥ तर्हि तादृशे कथं जीवजडवद्वहुत्वं इत्यत उक्तं॥ वहूपम इति॥ जीवजडवहुत्वं उपमा दृष्टांतः स्व वहुत्वे यस्य सो तथोक्तः॥ विशेष
वलाद्वहुत्वमेवास्ति न तु तत्प्रयुक्तं भेदादिप्रमाणा वा दित्यर्थः॥ १० ॥

पुनः सर्वस्वरूपेषु कथंभूतो भगवानित्यत आह । निर्दोषेति । निर्दोषा दोषरहिताः पूर्णाः प्रत्येकं निरवधिकाः गुणा एव विग्रहो यस्य स तथो
क्तः । आत्मतंत्रः स्वतंत्रः निश्चेतनात्मकैर्जडभूतैः शरीरैर्गुणैश्च हीनः । उक्तमेव विवृणोति आनंदेति । आनंदमात्राणि केवलानंदात्मका
नि करपादमुखोदरादीनि यस्य सोऽतथोक्तः । सर्वत्र स्वरूपेषु स्वगतभेदेन विवर्जितो रहितः आत्मा स्वरूपं यस्य स तथा ११ अस्य भगवतः
कालाद्देशगुणतो देशतश्चादिरंतश्च नास्तीत्यर्थः सदातनस्य शश्वदेकप्रकारस्य परस्य सर्वोत्कृष्टस्य वृद्धिह्रासौ वृद्धिह्रासौ न स्त इत्य
र्थः । एतादृश एतत्सदृशः क्वचद्देशे काले च पूर्वं न बभूव भाव्यो भविष्यत्यपि नेदानीं चनास्ति एवं च सति परात्परमस्य उत्कृष्टपदस्तुत्या

निर्दोषपूर्णगुणविग्रह आत्मतंत्रो निश्चेतनात्मकशरीरगुणैश्च हीनः । आनंदमात्रकरपादमुखोदरादिः सर्वत्र च स्वगतभेदविव
र्जितात्मा ११ कालाद्देशगुणतोऽस्य न चादिरंतो वृद्धिक्षयौ न तु परस्य सदातनस्य । नैतादृशः क्वच बभूव न चैव भाव्यो नास्त्यु
त्तरः किमु परात्परमस्य विष्णोः १२ ॥ सर्वज्ञ ईश्वरतमः स च सर्वशक्तिः पूर्णाव्ययात्मबलवित्सुखवीर्यसारः । यस्याज्ञया रहि
तमिंदिरया समेतं ब्रह्मेशपूर्वकमिदं न तु कस्य चेशं १३ ॥ ॥

उत्कृष्टस्य विष्णोरुत्तरः उत्कृष्टो नास्तीति किमु वक्तव्यमित्यर्थः १२ ज्ञातएतदित्यतोऽन्येषु संभाव्यमानं महत्त्वमहात्म्यादित्याह । सर्वज्ञ इति । सर्वज्ञा
नातीति सर्वज्ञः ईश्वरतमोऽतिशयितस्वामी सर्वशक्तिः परिपूर्णशक्तिः पूर्णानि अव्ययानि नाशरहितानि आत्मभूतानि बलवित्सुखव
वीर्याणि तेषां सारस्तदात्मकः स्वरूपः इतोऽपि तत्सदृशः कोऽपि नास्तीत्याह । यस्येति । यस्य हरेराज्ञया प्रेरणया रहितं ब्रह्मे
शपूर्वकं ब्रह्मेशौ पूर्वौ आद्यौ यस्य तत्तथा इंदिरया लक्ष्म्या समेतमिदं विश्वं कस्य च कस्याप्यर्थे ईशं समर्थं नेत्यर्थः १३ ॥ ॥

किंचविंबभूतस्यचस्योत्तमप्रतिविंबभूतस्याशेषचेतनजातस्याम्हलविंबभूतपरमात्मवशात्वंसिद्धमित्याशयेनारूढस्यविशेषणंछेना
हा।आभासकइत्यादिना।अस्यहरेराभासकः।प्रतिविंबभूतः।पवतः।पवतस्यरूढस्यआभासकः।रूढेणाशेषोपिव्याख्यातइतिअपि
प्रायेणारूढस्यविशेषणंशेषात्मकइति।नकेवलंरूढशेषावेवप्रतिविंबौपवनस्यकिंतुगरुडएवचेति।एवशब्देनशेषरूढगरुड

आभासकोस्यपवनः।पवनस्यरूढः।शेषात्मकोगरुडएवचशक्रकामौवींद्रे
शयोस्तदपरेत्वनयोश्चतेषामृष्यादयः।क्रमशःजनगुणाःशतांशात् १५ ॥

यद्वेति।विशिष्टएतत्समोचनर्थोनास्तीतिदर्शयति।तथावींद्रेशयोर्गरुडरूढयोःशक्रकामावाभासकौ।तदपरेताभ्यामपरेअहंकारि
का रिकप्राणाद्यादेवास्तुअनयोःशक्रकामयोराभासकाः।तेषामपरेषांप्राणादीनामृष्यादयः।आभासकाइत्यर्थः।सर्वत्रविंब
प्रतिविंबभावेनिमित्तमाह।जनेति।शतशब्दोबहुत्ववाचीबहुलांशेनजनगुणाःहीनगुणाप्यतइत्यर्थः १५ ॥ ॥ ॥

नन्वेवंपवनादीनांतंदीनांतदाभासत्वेनतदधीनत्वेपिरमादीनांतत्कथमित्यतस्ताश्चैमपितदाभासत्वंसाक्षात्परंपरयाचास्तीत्याह॥आभास मा
कात्विति॥अथेत्यनेनहरेरनंतरंसैवेतिदर्शयति॥अस्यहरेरमाआभासकाप्रतिविंबभूता॥तर्हिसाक्षात्प्रतिविंबभूतात्वं?ब्रह्मवायु
भ्यांतस्याःसाम्यमेवप्राप्तमतआह॥अमरुत्स्वरूपादजाच्छ्रेष्ठापीति॥ब्रह्मवाय्वोरपिरमाद्वारैवप्रतिविंबत्वेनतद्रमावत्साक्षादितिन

आभासकात्वथरमास्यमरुत्स्वरूपाच्छ्रेष्ठाप्यजात्तदनुगाःशिवतोवरिष्ठा।तस्यास्तुमा॥
विपतिनीचगिरस्तयोस्तुशच्यादिकाःक्रमशएवयथासुमांसः १५ ॥ ॥ ॥ ॥

ताभ्यांतस्याःसाम्यप्राप्तिरितिभावः।तदनुतदनंतरंगाःभारतीरमायाःप्रतिविंबभूतेत्यर्थः।नैतावताशिवस्यभारतीसाम्यंसैमंतत्र
मित्याह॥शिवतोवरिष्ठेति॥शिवस्यापिभारतीद्वारापवनाभासत्वमितिनभारतीसाम्यमित्यर्थः।तस्यागिरःउमापार्वतीविपतिनी
गरुडस्यभार्यासौपर्णीचआभासकेइत्यर्थः।तयोस्तुउमाविपतिन्योःशच्यादिकाःशचीइंद्रभार्याआदिर्यासांताःआभासकाइ
त्यर्थः।यथासुमांसःस्वस्वोत्तमेभ्यःशतांशोनगुणाःतस्याःक्रमशएवक्रमेणैवस्वस्वोत्तमाभ्यःशतांशोनगुणाइत्यर्थः १५ ॥ ॥ ॥

ननु यथाणुरूपाणां स्त्रीणां वस्वस्वावरापेक्षया शतांशाधिकगुणत्वमुक्तं तथा तेषां स्वभार्याभ्यः शतांशाधिकगुणत्वं किमित्यतो न तत्रायं
नियमः इत्याह। ताभ्यश्चेति। ताभ्यः स्वस्वभार्याभ्यः स्वस्वभार्याभ्यः ते ते पुरुषाः केचिच्छतगुणैः शतांशैर्वरिष्ठास्तेषां केचिच्च दशतो दशां
शेन वरिष्ठाः केचित्तु पंचोत्तरैर्दशतः पंचाधिकदशांशेन वरिष्ठा इत्यर्थः। अयं च विशेषो यथाणुस्त्रीषु स्त्रयाऽपि द्रष्टव्य इत्याह। यथाक्रमशः
श्रुतिस्था इति। ननु तथापि पुरुषेषु शतांशोत्तरगुणत्वं स्वस्वोत्तमापेक्षयेत्युपपन्नं शतादप्यधिकांशोत्तरत्वस्य श्रुतिष्वच्यमानत्वादित्यत आ
ह। शब्दो बहुत्ववचन इति। शतमिति शब्दो बहुत्ववाचीयतोतः श्रुत्युत्तरेषु बहुधो न्नमाविरुद्धता विरोधो नेत्यर्थः १६ ननु जीवानां स्वरू
पेषु तारतम्यं तावदिदानीं प्रतीयते तत्लिंगदेहोपाधिकमेव मुक्तौ सत्यां लिंगदेहापगमे तन्निमित्तकं तारतम्यमपि न स्यादिति। ततः सा(

ताभ्यश्च ते शतगुणैर्दशतो वरिष्ठाः पंचोत्तरैरपि यथाक्रमशः श्रुतिस्थाः। शब्दो बहुत्ववचनः शतमि॥
त्यतश्च श्रुत्युत्तरेषु बहुधोक्तिविरुद्धता न १६ तेषां स्वरूपमिदमेव यतो विमुक्तावप्येवमेव सततो
चैर्विनीचरूपाः। शब्दः शतं दशसहस्रमिति स्मयस्मान्नस्मान्न हीनवचनोऽप्यततोऽप्यरूपाः १७

स्यापन्नस्वरूपे तौ च जीवानामवस्थानमिति रामानुजास्तन्मतमनेकश्रुतिविरुद्धमित्याशयेन जीवस्वभाव एव तारतम्यं तत्पंत्त्वौपाधिक
मित्याह। तेषामिति। यतस्तेषां जीवानामिदं पूर्वोक्ततारतम्यं स्वरूपमेवेत्येवकारान्वयः। अथ तस्मान्मुक्तौ सत्यामप्येवमेव रदातीयथात
चोच्चतया प्रतीयंते तथैव सततं उच्चनीचरूपास्तिष्ठंतीत्यर्थः। ननु शतमिति शब्दो बहुत्ववाचीत्युक्तं तत्र किं प्रमाणमिति तत्राह। शब्दः शत
मिति शतं दशसहस्रमित्यनेन दशदशतस्तच्छतं दशशतानि तत्सहस्रं तत्सर्वमिति श्रुतिमर्यतरुपादन इति शब्दो वेदरूपो यस्मात्प्र
माणं शतशब्दस्य बहुवाचित्वे तस्मात्छतमिति शब्दो न हीनवचनः किंतु उत्कृष्टवचन अथ तस्माज्जीवास्ततः शतादेः अस्वरूपाउत्कृष्टरू
पा इत्यर्थः १७

नकेवलमुक्तरीत्या मुक्तियोग्येष्वेवांतरतारतम्यं स्वरूपम् । तं किं त्वयोग्यजीवेष्वपि त्वेतन्नोदी कृतेष्वमुक्तियोग्यत्वनित्यसंसारित्वतमोयोग्यत्वरू
पमपि तारतम्यं तत्स्वरूपमित्याह । एवमिति । नरोत्तमाः परे अवसाने वर्तमानायेषां ब्रह्मादीनां तेन तथा ते मुक्तियोग्या एवेत्यर्थः । तदन्ये मनुष्यमध्य
माः संसृतिपरा नित्यसंसारिणः इति यावत् । तथा मनुष्याधमांताः अल्पाद्या अस्वरास्तमोगास्तमोयोग्या इत्यर्थः । एतस्यापि कदाप्यन्यथात्वं
तस्यादित्याह । एवमिति । एवमुक्तरीत्या सदानंतकालेष्वनियम एव नतु क्वचिद्देशे काले वान्यथा मुक्तियोग्यत्वादिवैपरीत्यमित्यर्थः । नन्वे
ते सर्वेषु तेः प्राक्कस्यामवस्थायां तिष्ठंति सृत्यादिप्राप्तौ च कुतो विलंब इत्यत आह । यावदिति । कस्यामवस्थायामित्यस्योत्तरं समस्ताः
संसृतिगा इति । सृत्यादिप्राप्तौ कुतो विलंब इत्यस्योत्तरं यावन्नपूर्तिरिति । स्वस्वगतिप्राप्तिसाधनस्य भक्तिज्ञानादेर्यावत्कालपर्यंतं
पूर्णता नास्ति तत्तावत्पर्यंतं सृत्यादिप्राप्तिर्नास्तीत्यर्थः १८ नतु युगपदेव सर्वेषां साधनसंपत्तौ युगपदेव सृत्यादिप्राप्तौ जीवानां

एवं नरोत्तमपरास्तु विमुक्तियोग्या अन्ये च संसृतिपरा अस्वरास्तमोगाः । एवं सदैव नियमः क्वचिदन्यथा न तयावन्न पूर्तिरु
त संसृतिगाः समस्ताः १८ पूर्तिश्च नैव नियमाद्भविता हि यस्मात्तस्मात्क्रमाप्तिमपि यांति न जीवसंघाः । आनंत्यमेव गणा
शोस्ति यतो हि तेषामित्थं ततः सकलकालगता प्रवृत्तिः १९ ॥ ॥

परिसमाप्त्यापत्या अतः सृष्ट्यादिप्रतिपादकप्रमाणविरोध इत्यत आह । पूर्तिश्चेति । यस्माद्युगपदेव सर्वेषां जीवानां पूर्तिः साधनसंपत्तिर्न भवि
तैव न भवत्येव अतः । नियमादीश्वरनियमादस्मिन्नेव काले एनं जीवं मुक्तं करिष्यामीतीश्वरसंकल्पाद्विना इत्यर्थः । तस्माज्जीवसंघाः स
मात्रिं नयांत्यपि अतः अतः सृष्ट्यादिसंभवान्न तत्प्रतिपादकवाक्यप्रामाण्यमिति भावः । नन्वेवमनेकब्रह्मकल्पेषु क्रमेणानेकजीवमुक्त्या
दौ कालक्रमेणापि सर्वजीवसमाप्तेः संभवात् अतः स एव दोषः स्यादित्यत आह । आनंत्यमेवेति । यतः कारणात् तेषां जीवानां गणशः गणानां
मानंत्यमस्त्येव । हिशब्देन यथैव कालनियमः स्वरादिनियमस्तथा । तस्मात्त्वानीदमं क्वापि विश्वमेतद्भविष्यति । परमाणुप्रदेशेपि ह्यनंताः
प्राणिराशयः सूक्ष्मत्वादीशशान्त्यैव स्थूला अपि हि संस्थिताः इत्यादिप्रमाणप्रसिद्धिं दर्शयति । ततः कारणात्तेषां जीवानां नित्यमेव सकल
कालगता भूतभूतभविष्यद्वर्तमानकाले सुविद्यमाना प्रवृत्तिरुक्तेत्यर्थः १९ ॥

दा३

एवंतारतम्यमुक्त्वा नामशेषत्नीवार्तांस्वस्योत्तमद्वारा भगवत्प्रतिबिंबत्वेन तदधीनत्वाद्भगवतएवसर्वोत्तमत्वादिकंमुक्तमित्युपपाद्योपसंहर
तिश्लोकद्वयेन एतैरित्यादिना। एतैरतिप्रतिभादियुक्तामुक्तैः मुक्तैरुद्युक्तैः सह मिलितैः सततंप्रविविचिंतयद्भिर्विचारयद्भिः स्वरादिभिर्ब्रह्मादिदे
वैरचिंत्यमहिमः अचिंत्योमहिमायस्यासौतथोक्तः। अतएवपरमउत्कृष्टः परात्मा परेषां ब्रह्मादीनामात्मास्वामी तदंतादिकर्ता वा। एतादृ
शस्यतारायणस्य गुणाविस्तृतिः गुणैःपूर्णता अन्यगा अन्यजीवगता क्वा एतादृशीगुणपूर्णता अन्यगता न भवत्येवेत्यर्थः। अचिंत्यमहि
मत्वेहेतुः एतैरिति पूर्णत्वादित्यर्थः २० अस्यभगवतः साम्यंपरमेणोत्कृष्टेनापितात्प्यंनकेवलंसंसारिणा किंतुमुक्तेनापितप्राप्यमि
त्यर्थः। अथवापरमेणाशिवाद्युत्कृष्टेनकेनचदुर्मुखेनापितप्राप्यंनकेवलममुक्तेनतेन किंतुमुक्तेनापितप्राप्यमित्यर्थः। अतः कार
णादस्यभगवतोभिदाअन्येनभगवतासहैकंचेततनगणौः कुतः प्राप्येतेत्यर्थः। कुतइत्यतोविरुद्धधर्माधिकरणत्वादित्याह। सतता स्व
एतैः स्वरादिभिरतिप्रतिभादियुक्तैर्मुक्तैः सहैवसततंप्रविविचिंतयद्भिः एतैरचिंत्यमहिमः परमः परात्मानारायणोस्य गुणाविस्तृ
तिरन्यगाक्वा २० साम्यंनचास्यपरमेणचकेनचाप्यंमुक्तेनचक्वचिदतस्त्वभिदाकुतोस्याप्राप्येतचेततगणैः सततास्वतं
त्रैर्नित्यस्वतंत्रवशुषःपरमात्परस्य २१ अर्थोयमेवनिखिलैरपिवेदवाक्यैरामायणेःसहितभारतपंचरात्रैः। अन्यैश्चशास्त्रै
तंत्रैर्नित्यस्वतंत्रवपुषः इति। सततंसंसारेमुक्तौचास्वतंत्रैः पराधीनैर्नित्यस्वतंत्रंवपुः स्वरूपंयस्यासौतथा। परमादव्यक्तात्परमस्योत्तम
स्यभगतः कथमैक्यंप्राप्तुंशक्येतेत्यर्थः २१ पंचात्मकः समगवानित्यादिनोपवर्णितंभगवन्महामाहात्म्यंनस्वकपोलकल्पितमितिभा
वेनाह। अर्थोयमिति। अयंपूर्वोक्तोर्थएवनिखिलैर्वेदवाक्यैस्तथारामायणोर्नरामायणवाक्यैः सहितभारतपंचरात्रैः रामाय
णसहितैर्भारतपंचरात्रवाक्यैरित्यर्थः। नित्यसापेक्षत्वान्नसहितशब्दस्यरामायणपदेनसाकांक्षस्यापि भारतेत्यनेनसमासः। अ
न्यैश्चशास्त्रवचनैर्वेसलवयुराणादिरूपशास्त्रगतवाक्यैश्चसत्हृदयंसतात्पर्यंहरिणाश्रीवेदव्यासेनसदैवनिताः। यतइत्यर्थः। अतो
नसदैवनिता। यतइत्यर्थः। अतोनस्वकपोलकल्पितत्वशंकाकार्येतिभावः २२ ॥

राम

नन्वेवंवाक्यैर्हरिणायमर्थोनिर्णीयतेतानिकानीत्यतस्तानिवाक्यानिसंगृह्णाति।नारायणस्येत्यादिना।नारायणस्यनसमइत्यनेननास्तिनारा
यणसममित्यादिभारतवाक्यंनैतादृशइत्यादिस्वोक्तार्थनिर्णायकंसूचितं।पुरुषोत्तमोऽहंजीवाक्षरेभ्यधिगतोस्मीत्यनेनयस्मात्क्षर
मतीतोऽहमक्षरादपिचोत्तमः।अतोऽस्मिलोकेवेदेचप्रथितःपुरुषोत्तमइतिभारतवाक्यंनास्तितत्रइत्यादिस्वोक्तार्थप्रतिपादकंसूचि
तं।हियस्माज्जीवाक्षरेक्षराक्षरेभ्यधिगतोतीतोऽस्मिअतोऽहंपुरुषोत्तमइत्यक्षरार्थः।शाब्दंतद्वाक्यप्रतिभासार्थयुतमनुरूपप्रयोगेण
यतस्तदुपादानंकृतं।ततोऽन्यदार्तमित्येतदुपनिषद्वाक्यंसंसूचितं।समस्तइतिस्वोक्तार्थप्रतिपादकरूपान्तं।ततःपरमात्मनोऽन्यदार्तं
त्वेभिःतमित्यर्थः।मुक्तोपसृप्यइत्यनेनमुक्तोपसृप्यव्यपदेशादितिब्रह्मसूत्रंसूचितं।तेनचक्वचिदनरइतिस्वोक्तार्थनिर्णायकंश्रुत्यर्थतउपा

नारायणस्यनसमःपुरुषोत्तमोऽहंजीवाक्षरेभ्यधिगतोऽस्मिततोऽन्यदार्तंमुक्तो
पसृप्यइहनास्तितुतत्स्वकंचिद्विज्ञानेवधर्मपृथगात्मदृगेत्यबोधि २३ ॥

तं।युक्तैरुपसृप्यःप्राप्यःनतुमुक्तानांतदैक्यमितिभावः।इहनास्तितुतत्स्वकंचिदित्यनेनएकमेवाद्वितीयंनेहनानास्तिकिंचनेतिश्रुति
रानंदमात्रकरपादमुखोदरादिरित्यादिनोक्तेस्वगतभेदवर्जितत्वेप्रमाणंसूचितं।इहसगुणोनानावतारेष्वप्यागतस्तत्स्वकगुणाद्वा
रूपाद्वादेताद्वाकश्चिद्विज्ञानेवभेदोभेदाभेदोवानास्तीत्यर्थः।नानाशब्देभेदार्थइवशब्देभेदाभेदरूपोभयार्थः।इवोभयेचसादृश्यइतिवच
नात्।धर्मपृथगात्मदृगेत्यबोधीत्यतेन।यथोदकंदुर्गेवृष्टंपर्वतेषुविधावति।एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावतीत्युक्तार्थविपरी
तदर्शनेबाधकप्रतिपादकंवाक्यमुदाहृतं।धर्मशब्दवाच्येभ्योगुणरूपादिभ्यःपृथगात्मानंपरमात्मानंपश्यतीतिसतादृशःपुरुषोऽबो
कःपातमेतीत्यर्थः २३

आभासएवेत्यनेनाभासएवेतिस्त्वंआभासकोस्यपर्यंतस्त्याद्युक्तार्थतिरोधायकमर्थंतउपात्तं।पृथग्विशतएवजीवइत्यनेनपृथग्पदेशादि
त्यादिब्रह्मसूत्रंअभिदाद्युक्तोस्येत्युक्तार्थप्रतिपादकमुपात्तं।एवजीवोजात्यपेक्षयैकवचनं।ईशितईशात्पृथग्भिन्नइत्यर्थः।मुक्तस्यना
स्तिजगतोविषयेतुशक्तिरित्यनेनसाम्यंनचास्येत्युक्तार्थप्रतिपादकंजगद्व्यापारवर्जमित्यादिब्रह्मसूत्रमर्थंतउपात्तं।मुक्तस्यजगतोवि
षयेजगत्सृष्ट्यादौशक्तिर्नास्तीत्यर्थः।मात्रापरोसिनत्वत्तेप्युवतेमहित्वमित्यनेनपरोमात्रयेतिश्रुतिर्गुणाविस्तृतिरत्यगाद्येत्युक्तार्थप्रतिपा
दकोपात्ता।मात्रायाःमितेःपरोसितेमहित्वंगुणमहात्म्यंतान्युवतेनप्राप्नुवंतीत्यर्थः।बाहुल्यापविग्रहेत्यनेनपुराणबाहुल्यपविग्रहेत्येतत्यंचरा
त्रगतेतिर्हिविगुणापुराणविग्रहइत्याद्युक्तार्थप्रतिपादकंवाक्यमुपात्तं।ब्रह्माप्यैश्वर्यादीनांगुणानांसमाहारःबाहुल्यंतदेवविग्रहोयस्या
सौतथोक्तस्तस्यसंबोधनंबाहुल्यापविग्रहेति।स्वपुराणगुणौकदेहेत्यनेनमप्यनंततगुणोनंततेगुणातोनंतविग्रहइत्यादिभागवतस्थंआनंदमात्रेत्या
आभासएवपृथग्विशितएवजीवोमुक्तस्यनास्तिजगतोविषयेतुशक्तिः।मात्रापरोसिनतुतेप्युवतेमहित्वंबाहुल्यापविग्रहस्वपुराणगुणौकदे
ह २४ माहात्म्यदेहस्तुतिमुक्तिगतेशिवस्वब्रह्माचतद्गुणागतोनतकथंचतेशो।नत्राःउक्तस्तदपरेस्यस्वरवस्यमात्रामस्त्रेतिमुक्तस्वगुणा
श्रेशतावरेणा २५ ॥ ॥

युक्तार्थप्रतिपादकंवाक्यमुपात्तं।शोभनाःपुराणगुणाएवदेहोयस्यसःतस्यसंबोधनंस्वपुराणगुणौकदेहेति २४ माहात्म्यदेहेत्यनेनमाहात्म्यदेहे
त्यादिमोक्षधर्मवचनमानंदमात्रेत्यत्रैवप्रमाणं।महात्म्यंदेहोयस्यतस्यसंबोधनंमहात्म्यदेहेति।स्तुतिमुक्तिगतेइत्यनेनानृतस्यैवसेतुः।ए
तमानंदमयमात्मानमुपसंक्रम्येत्यादिवाक्यमुक्तेनचेत्यत्रैवप्रमाणं।स्तुतेःसंसारान्मुक्तेः।गतिराश्रयस्तस्यसंबोधनंस्तुतिमुक्तिगतइति।त
द्गुणागतोतस्यहरेर्गुणागतौगुणानामवगतौशिवस्वब्रह्माचकथंचनमहोद्योगेपितेशौनसमर्थौश्रीपतेसमर्थातदपरेसमर्थाःकुतः।स्तु। राम
नत्वतोपायत्यनेननैतेमनोविरतिवाउतत्वद्धन्नरान्नेत्यादिभागवतस्थंवाक्यमेतैःस्वरादिभिरतिप्रतिभादिशुत्तेरित्याद्युक्तार्थप्रमाणं।अ ८
स्यहरेःस्वरवस्यानंदस्यमात्रामंशंविसृष्टप्रतिबिंबरूपामितिमात्रामुपजीवंतीत्येतद्रूपतिबद्धाक्यमस्यगुणाविस्तृतिरुतेस्वस्वरूपानंदंमु
क्तेस्वगुणामुक्तानंतोश्रेष्ठगुणाब्रह्माद्यास्त्रपिक्रमेणाभतावरेणाशतोनत्वेनाश्रितिमुंजतेइत्यनेनएतस्यैवानंदस्यान्यानिभूतानिमात्रामुपजी
वंतीत्येतद्रूपतिबद्धाक्यमस्यगुणाविस्तृतिरत्यगोत्पादौप्रमाणमितिसूचितं २५ ॥

आभासको ऽस्य प्रवतइत्याद्युक्तार्थे प्रमाणमुदाहरति। आभासकेति। विष्णोः सदा संसारे मुक्तौ चाभासको भासपरावभासरूपाणि चेतनानां रूपा
णीति संबंधः। विष्णोरभासः प्रवनः तस्याभासो रुद्रः। तस्य परावभासो वराभासं द्वंद्वस्तस्यापि तदत्यइति अत्र परशब्दो ऽवरवाची साक्षात्यं पर
या सर्वजीवरूपाणि भगवत्प्रतिबिंबभूतानीति भावः। ननु प्रतिबिंबस्योपाध्यधीनत्वेनोपाधिनाशे तन्नाशनियमादत्रापि मुक्तौ सर्वोपाधिविना
शे प्रतिबिंबभूतजीवस्वरूपविनाशः स्यादित्यत आह। अज स्नाणीति नित्यानीत्यर्थः। सत्यं। प्रतिबिंबस्योपाध्यधीनत्वमिति प्रकृते वोपाधेर्नित्य
त्वेन तन्नाशाभावात् त्रिमित्तप्रतिबिंबनाशनापत्तेर्नजीवनाशप्राप्तिः। जीवोपाधेर्नित्यत्वं च जीवोपाधिर्द्विविधः प्रोक्तः स्वरूपं बाह्य एव च। बाह्यो
पाधिर्लयं याति मुक्तावन्यस्य तु स्थितिः। नित्योपाध्यास्वरूपया चिद्रूपया युतो जीवः केशवप्रतिबिंबकः इत्यादिप्रमाणसिद्धमिति भावः। अ
तो मुक्तावपि सर्वजीवानां भगवत्प्रतिबिंबत्वानपायात् तदधीनत्वमेवानुवर्त्ततइत्याह। अतिवशादिति। मुक्तौ केशादिगणाव्रह्मरुद्रादिगणा

आभासको भासपरावभासरूपाण्यज स्राणि च चेतनानां। विष्णोः सदैवातिवशात्कदापि गच्छंति केशादिगणान मुक्तौ २६ यस्मि
न्परेन्येप्यजजीवकोशा नाहं परा ब्रह्मरीचिमुख्याः। जानंति यद्गुणगणान् कारमादयोपि नित्यः स्वतंत्रस्तत को ऽस्ति तदन्य ईशः २७ ॥

विष्णोर्वशादतिविश्ववीनत्वादितिक्रम्य न गच्छंतीत्यर्थः २६ तत्रैव भागवतस्यं वाक्यमुदाहरति। यस्मिन्निति। अनेतनवयं नतानप्रभवामनस्त्रिय
स्मिन्परेन्येप्यजजीवकोशाः भवंति काले न भवंति हीदृशाः सहस्रशो यत्र वयं भ्रमाम इति वाक्यं ग्रहीतं। अस्यार्थः। हे तात वयं तत्त्वदर्शन
निवारयितुं न प्रभवाम न समर्थाः। कुतः। यस्मिन्परे सर्वोत्तमे हरिविपरिवर्त्ते ईदृशा वर्त्तमानब्रह्मांडसदृशा अन्येपि भूतभविष्यंतः अजजीव
कोशा अजस्य चतुर्मुखस्य जीवको शात्वनिधानस्थानभूता ब्रह्मांडाः। सहस्रशोपि सृष्टिकाले भवंति। संहारकाले न भवंति। यत्र ब्रह्मांडे
षु वयं सर्वे भ्रमाम इति। नाहं परा ब्रह्मरीचयनेन भौनाहं परा ब्रह्मरीचिमुख्या जानंति यद्विचरितं स्वरूपसत्त्वसच्चाइत्यादि द्विवर्गसंप्रति रुद्रवाक्य
मुपात्तं। एतच्च एतैः स्वरादिभिरित्यत्र प्रमाणं। अहं रुद्रो यद्गुणगणान् जानामि परा ब्रह्मा पिता जानाति मरीचिमुख्याः चत्वायोपि न जानंति रमा
दयोपि न जानंति। तस्मात्तदन्यो नित्यः स्वतंत्रः ईशः को ऽस्ति न कोपीत्यर्थः २७ ॥ ॥ ॥

नैवैक एवेत्यनेनैतदिष्टं तिद्दुरूपमित्यादिभारतवाक्यमुक्तार्थप्रतिपादकमुपात्तं। एतच्चबहवः पुरुषाब्रह्मन्नित्यादिप्रश्नोत्तरं। एक एव पुरु
षइति मतं तदुक्तं किंतु बहवः पुरुषाः तत्रापि अ सोहरिः पुरुषोत्तमः सर्वपुरुषोत्तमः सपुरुषः पुरुषोत्तम एकः ज्ञतः न ज्ञतोपीत्यर्थः। प्र
तएवजात्येत्यनेनयतः स्वरूपतश्चान्योजातितः श्रुतितोर्थतः कथमस्मिन्सदत्येवमेकं वस्यादसंहितरतिमोक्षधर्मवचनमभिदाङ्गतोस्मे
त्यादौ प्रमाणमुदाहृतं। यतएवकारणाद्यतोजीवगणाद्धाजात्या ईश्वरत्वजात्या अर्थतश्च प्रयोजनतश्च श्रुतितोन्नास्पर्तीत्यादेः गुणतः परि
पूर्णत्वात् निजरूपतश्च परममहत्वाधिकरणात्स्वरूपान्निभिन्नान्नित्यान्यएव हरिः। तस्मात्सहरिरहमस्मीति अभेदबोधः कथंस्यात्। पर
स्परविरुद्धधर्माधिकरणयोस्तादात्म्यस्यबाधितत्वादिति भावः २८ तस्माड्उक्तार्थस्यप्रामाणिकत्वात्रोपेक्षणीयत्वमित्युपसंहरति। स

नैवैक एवपुरुषः पुरुषोत्तमोसावेकः ज्ञतः सपुरुषोयतएव जात्या अर्थश्रुतेश्चगुणतो निजरूपतश्च नित्यान्य एव कथमस्मिन्सदत्यपि
स्यात् २८ सर्वोत्तमोहरिरिदं ततदानयैवबेतुंक्षमंसतुहरिः परमः स्वतंत्रः। पूर्णाव्ययागणितनित्यगुणार्णवोसाविःत्येववेदवच
नानिपरोक्तयश्च २९ ऋगादयश्च चत्वारः पंचरात्रं च भारतं। मूलरामायणं ब्रह्मसूत्रं मानं स्वतः स्मृतं ३० अविरुद्धं च यत्त्वस्य
प्रमाणं तच्चनान्यथा। एतद्विरुद्धं यत्तुस्यान्नतन्मानं कथंचन ३१ ॥ ॥

र्वोत्तमइति। हरिः सर्वोत्तमइदं विश्वं तस्यहरेरानयैव बेतुंतातुं क्षमं समर्थं सहरिः परमत्वात्स्वतंत्रः स्वाधीनज्ञानादिप्रवृत्तकः। तस्मात्सर्वैरस्व
येरगणितैर्नित्यैर्गुणैरर्णवः पूर्णो सोहरिरित्येव एतदर्थप्रतिपादकान्येवाशेषवेदवचनानि तथा परस्पश्च वेदव्यासस्य ब्रह्मसूत्राद्याउ
क्तयश्चैतदर्थप्रतिपादका एवेत्यर्थः २९ ननु विष्णोः सर्वोत्तमत्वादिकं वेदपंचरात्रादिप्रतिपाद्यत्वात्प्रामाणिकत्वेनतनोपेक्षणीयमित्युक्तं
। तत्तदास्यात्। यदि वेदादीनां प्रमाणत्वं स्यादित्यतो वेदादिप्रामाण्यं भविष्यत्पर्ववचनेन साधयति। ऋगादय इति ऋग्यजुः सामाथर्वभेदभि
न्नाश्चत्वारो वेदाः पंचरात्रं बादरायणस्वरूपेण कृतं भारतं व्याससंहितमिति मूलरामायणं ब्रह्मसूत्रं च स्वतएव मानं संवादनिरपेक्षमेवप्रमाणं
स्मृतमित्यर्थः ३० यत्त्वस्यऋगादेरविरुद्धं तदपि प्रमाणं नान्यथा अप्रमाणमिति किं तु प्रमाणमेवेत्यर्थः एतस्यऋगादेर्यथा विरुद्धं

स्यात्तन्मातकथं चेतन्नभवतीयर्थः ॥ ३१ ॥

अविरुद्धं चपत्त्वस्येत्येतद्विवृणोति। वैष्णवानीति। सात्त्विकानि पुराणानि सात्त्विका मन्वादिस्मृतयोपि पंचरात्रात्मकत्वात् पंचरात्रमूलत्वेन
वेदाद्यनुकूलत्वात्प्रमाणमेवेति भावः ३२ ऋगादिप्रामाण्यमुक्त्वा तत्प्रतिपाद्यमर्थमाह। एतेष्विति। एतेषु ऋगादिषु विष्णोराधिक्यमुच्य
ते क्वचिदपि भागेऽन्यस्याधिक्यं नोच्यत इत्यर्थः। अतः कारणात्तदेव विष्णोराधिक्यमेवं मंतव्यं स्वीकर्तव्यं नान्यथा विष्णोर्हीनत्वं कथंचन नांगीकार्य
मित्यर्थः ३३ ननु पाशुपतादिशास्त्रेषु विष्णोर्हीनत्वमप्युच्यते ततो नान्यथात्वं कथंचनेति कथमुच्यत इत्यत आह। मोहार्थानीति। अन्यशास्त्रा
णि अन्यस्य रुद्रादेराधिक्यप्रतिपादकानि पाशुपतादिशास्त्राणि मोहार्थानि मोहो मिथ्याज्ञानमर्थः प्रयोजनं येषां तानि असुराणां मिथ्या

वैष्णवानि पुराणानि पंचरात्रात्मकत्वतः। प्रमाणान्येवमन्वाद्याः स्मृतयोप्यनुकूलतः ३२ एतेषु विष्णोराधिक्यमुच्यते त्वस्य
न क्वचित्। अतस्तदेवं मंतव्यं नान्यथा तु कथंचन ३३ मोहार्थान्यन्यशास्त्राणि कृतान्येवाज्ञया हरेः। अतस्तेषूक्तमग्राह्य
मसुराणां तमोगतेः ३४ यस्मात्कृतानि तानीह विष्णुनोक्तैः शिवादिभिः। एषां यत्र विरोधि स्यात्तत्रोक्तं तन्न वार्यते ३५ ॥

ज्ञानमर्थः प्रयोजनं येषां तानि असुराणां मिथ्याज्ञानार्थं विष्णोराज्ञया कृतानि अत एव तेषु पाशुपतादिषूक्तं रुद्राद्याधिक्यं अग्राह्यं॥
मोहार्थानि कृतानीत्येतद्विवृणोति। असुराणामिति। असुराणां तमोगतेर्हेतोः ३४ विष्णुनोक्तैः प्रेरितैः शिवादिभिः कृतानि यस्मात्तस्मा
त्तेष्वज्ञानार्थितानि तेषूक्तमग्राह्यमित्यर्थः। ननु तेष्वपि यदंतरं व्याघ्रहरीड्वयोर्वितेद्व्यादारभ्य अनंतत्वात् महाविष्णोस्तदंतरमनंत
ते कं माहात्म्यस्य च नार्थापत्त्युदाहरणमीरितमित्यनेन तु विष्णोराधिक्यमुच्यते ततः कथमुच्यते तेषूक्तमग्राह्यमित्यत आह। एषामिति
एषां ऋगादीनां यद्विरोधि स्यात्तत्रोक्तमपि न वार्यते तन्निराक्रियते। किंतु वा भामा वा प्रामाण्येन स्वीक्रियत इत्यर्थः। तदंशे ते
षां प्रामाण्यमेवेति भावः ३५ ॥ ॥ ॥

तां०टी० १० नन्वतथापि तेषु विष्णोराधिक्यमुच्यतइत्यत्रपपन्नं कृगादिष्वपि जनितितोत विष्णोरित्यादौ विष्णोरित्यादिदैन्यश्रवणादित्यत आह। विष्ण्वाधि
क्येति। वेदवचांसि वेदवचनान्यपि यानि विष्ण्वाधिक्यविरोधीनि विष्णोराधिक्यस्य विरोधीनि वा पाततः प्रतीयन्ते तानि सर्वशः सर्वाणि विष्णोराधिक्य
स्यानुकूल्यात् तत्परत्वेनोपेयं च मीमांसानुकूल्यं विधायेति यावत् योज्यानि योजनीयानि। आपाततः प्रतीतार्थपरतया बाधादवाधितमुख्यार्थपरतये
व योजना कर्तव्येति भावः ३६ नन्वतथापि हरेर्दैन्यग्राहकप्रत्यक्षस्य का गतिर्विष्ण्ववतारेषु रामकृष्णादिषु प्रत्यक्षेणैवाज्ञानादिदर्शनादित्यतस्त
स्यापि गतिमाह। अवतारेष्विति। हरिरवतारेषु रामकृष्णादिरूपेषु नरवत् साधारणमनुष्यवत् यत्किंचिदज्ञानादिकं दर्शयेत्। तज्ज्ञानदपि अ

विष्ण्वाधिक्यविरोधीनि यानि वेदवचांस्यपि। तानि योज्यान्यानुकूल्याद्विष्ण्वाधिक्यस्य सर्वशः ३६ अवतारेषु यत्किंचिद्दर्शयेन्नरवद्धरिः।
तत्वासुराणां मोहाय दोषा विष्णोर्नहि क्वचित् ३७ अज्ञत्वं पारवश्यं वा वैदेह्यादिकं तथा। तथा प्राकृतदेहत्वं देहत्यागादिकं तथा ३८
अनीशत्वं च दुःखित्वं साम्यमन्यैश्च हा ततः। प्रदर्शयति मोहाय दैत्यादीनां हरिः स्वयं ३९ न तस्य कश्चिद्दोषोऽस्ति पूर्णाखिलगुणो ह्य
सौ। सर्वदेहस्थरूपेषु प्रादुर्भावेषु चेश्वरः ४० ॥ ॥

सुराणां मोहाय मिथ्याज्ञानाय न तु वास्तवं। ननु तद्यत आह। दोषा इति। हि यस्मात्कारणाद् विष्णोः क्वचिदवतारेषु दोषा अज्ञानादयो न संति निरति
शय निरवद्याः परमिदमित्यादिश्रुतेः। अतस्तत्र दोषदर्शनं मिथ्यादर्शनमेवेत्यर्थः ३७ एतदेव विवृणोति। अज्ञत्वं इत्यादिना सीतां प्रतिज्ञात्वा हर राम
णादावज्ञत्वं नरकासुरयुद्धादौ पारवश्यं। भीष्मादिताड्यदेहे वेधा। भार्गवरामादौ भेदः। आदिपदेन स्वापेऽज्ञत्वाग्रहणं पादिकं संगृह्यते। तथा शब्द १०
समुच्चये। प्राकृतदेहत्वं कृष्णाद्यवतारे। तथा तत्रैव देहत्यागादिकं ३८ उग्रसेनादिराज्यस्थापनेन स्वस्यानीशत्वमस्वामित्वं। रामावतारे दुः
खित्वं। तथा अन्यैर्ब्रह्मरुद्रादिभिः साम्यं। तथा तदपेक्षया हीनता च हरिः स्वयमेव दैत्यादीनां तमोयोग्यानां मोहाय मिथ्याज्ञानाय दर्शयति
३९ तावता तस्य हरेः कश्चिदज्ञानादिदोषो नास्ति। हि यस्मादसौ हरिरीश्वरः। सर्वदेहस्थरूपेषु अन्तर्यामिरूपेषु प्रादुर्भावेषु च पूर्णाखिल
गुणः परिपूर्णाशेषगुणात्मकः। अतस्तदीयप्रत्यक्षं भ्रान्तमेवेति भावः ४० ॥ ॥

तस्माद्ब्रह्माद्यभेदप्रतीतेः तत्साम्यप्रतीतेश्च भ्रांतित्वात्तत्प्रयुक्तदोषलेशशंकानवकाश इत्युपसंहरति। ब्रह्मादीति। ज्ञातो नज्ञातोपीत्यर्थः॥ तत्र हेतुः महात्मन इति। तस्माद्विभोः सर्वात्मत्वस्यैवाबाधितत्वादेवमुक्तरीत्या वाचकं प्रतिपादकं शास्त्रं मतं संमतमित्यर्थः ४१ एतदर्थं प्रतिपादकं तत्किंपरं शास्त्रमित्यत आह निर्णायायैवेति। व्यासरूपेण विस्तृता निर्णायाय सर्वशास्त्रनिर्णायाय यद्ब्रह्मसूत्रं प्रोक्तं तत्परं शास्त्रं सर्ववेदविनिर्णयार्थं ग्राह्यं स्वीकर्तव्यमित्यर्थः। कुत इत्यत आह। सर्वनिर्णयाः तत्रोक्ता इति ४२ नन्वेतादृशनिर्णायककरणे काग्रंथसत्त्वे यदर्थं ब्रह्मसूत्रं प्रोक्तमित्यत आह। यथार्थेति। यथार्थवचनानां ऋगादीनां मोहार्थानां पाशुपतादीनां दर्शने तन्मध्यस्थानां प्राप्तं संशयं विलक्षणविषयं अपनेतुं निराकर्तुं भगवान् व्यासो ब्रह्मसूत्रं मन्त्रीकृत्य चकारेत्यर्थः ४३ तस्मादशेषशास्त्रार्थनिर्णायार्थकत्वाद्ब्र

ब्रह्माद्यभेदः साम्यं वाज्ञातस्तस्य महात्मनः। यदेवं वाचकं शास्त्रं तद्विशेषैस्तु तद्धि शास्त्रं परं मतं ४१ निर्णायायैव यत्प्रोक्तं ब्रह्मसूत्रं तु विस्तृता व्यासरूपेण तद्ग्राह्यं तत्रोक्ताः सर्वनिर्णयाः ४२ यथार्थवचनानां च मोहार्थानां च संशयं। अपनेतुं हि भगवान् ब्रह्मसूत्रमचीक्लृपत ४३ तस्मात्सूत्रार्थमाश्रित्य कर्तव्यः सर्वनिर्णयः। सर्वदोषविहीनत्वं गुणैः सर्वैरुदारता ४४ अभेदः सर्वरूपेषु जीवभेदः सदैव च। विष्णोरुक्तानि सूत्रेषु सर्ववेद्यता तथा ४५ ॥ ॥ ॥

सूत्रार्थमाश्रित्योपजीव्य ब्रह्मसूत्रार्थानुसारेणेति यावत्। सर्वनिर्णयः सर्वेषां शास्त्राणां निर्णयः सर्वस्य गुणपूर्णत्वादेर्निर्णयो वा कर्तव्य इत्यर्थः॥ ननु को सौ ब्रह्मसूत्रे प्रतिपाद्यो यदुपजीवनेन निर्णयः कर्तव्य इत्यत आह सर्वदोषेति दि। द्वितीयाध्याये सर्वदोषविहीनत्वं प्रथमाध्याये समन्वयप्रतिपादनेन सर्वगुणैरुदारता उत्कृष्टता ४४ तथा तृतीयाध्यायेन स्थानतोपि परस्योभयलिंगं सर्वत्र हीत्यादिसूत्रेषु सर्वरूपेषु अंतर्यामिरूपेषु प्रादुर्भावरूपेषु च अभेदोऽत्यंताभेदः। तथाह प्रत्युपदेशादित्यादौ सदैव मुक्तौ संसारे च विष्णोर्जीवभेदः परमात्मनो जीवेभ्यो भेदः। जीवानां परस्परं भेदश्च। तथा शास्त्रयोनित्वात्। सर्ववेदोत्तमत्वं चोदनाद्यविशेषादित्यादौ सर्ववेद्यता सर्ववेदस्तुत्यता ४५ ॥ ॥

ता॰टी॰ ११

तथा च तृतीयाध्याये सूक्तानां तारतम्यं। तथा तत्रैव सूक्ष्मार्थाधिकरणो विद्यया अपरोक्षज्ञानेन विमुक्तिरित्येतानि प्रमेयानि सूत्रेषूक्त
सूत्रेषूक्तानि। एतद्बुद्धावेनाशेषशास्त्रार्थो वर्णनीयः। एतद्विरुद्धार्थप्रतिपादकं यत्तन्मोहार्थमुदाहृतं ४६ यस्मात्तस्माद्धेयेयुणा
विष्णोरुदाहृतास्तेते ग्राह्या न तु दोषाः प्रतिपादिता अपि ग्राह्यास्तत्प्रतिपादकस्यासुरमोहनार्थत्वादिति भावः। ननु स्वकपोलकल्पि
तमेवैतत्सर्वमित्यत आह। इत्यादीति। भगवता व्यासेन भविष्यत्पर्वणि स्फुटं स्पष्टं यथा भवति तथा इत्यादिकमुक्तं न तु स्वकपोलक
ल्पितमित्यर्थः ४७ अत्रैव संवादार्थं वाराहपुराणवचनमुदाहरति। एष इति। रुद्रं प्रति विष्णुवाक्यमेतत्। एष विष्णुरहं मोहं सृज्यते ने
नेति मोहो न दृष्टं चं चतं वतं सृजामि करिष्यामि। कथं हतो मोहो यो मोहः जनान् दुर्जना न मोहयिष्यति भ्रांतांश्च करिष्यति। हे महाबाहो रु

तारतम्यं च सूक्तानां विमुक्तिर्विद्यया तथा तस्मादेतद्विरुद्धं यन्मोहार्थं तदुदाहृतं ४६ तस्माद्धेयेगुणा विष्णो ग्राह्यास्ते सर्व एव
व्यास्त्या प्रयुक्तं भगवता भविष्यत्पर्वणि स्फुटं ४७ एषो मोहं सृजाम्याशु यो जनान्मोहयिष्यति। त्वं च रुद्र महाबाहो मोहशास्त्रा
णि कारय ४८ अतथ्यानि वितथ्यानि दर्शयस्व महाभुज। प्रकाशं कुरु चात्मानं अप्रकाशं च मां कुरु ४९ इति वाराहवचनं
ब्रह्मांडोक्तं तथा परं। अमोहाय गुणा विष्णोराकारश्चिच्छरीरता ५० ॥

इत्थं च मोहशास्त्राणि सोऽहं तनकशास्त्राणि मोहजनकशास्त्राणि कुरु दर्शयेत्यादि भिक्षुकारय ४८ तत्र मोहशास्त्रेषु अतथ्यानि मिथ्या राम
विद्यमानान्येव लिंगमहत्वादीनि तथा वितथ्यानि व्यधिकरणत्वेनान्यत्र विद्यमानानि पारतंत्र्यादीनि दर्शयस्व एतत्कार्यकरणे ११
त्वं समर्थोसीति सूचयितुं महाबाहो इति संबोधनं। आत्मानं स्वात्मानं प्रतिप्रकाशं प्रसिद्धं कुरु मां तु प्रतिवाप्रकाशमप्रसिद्धं कुरु
इति ४९ इति वाराहवचनं प्रमाणमस्तीत्यर्थः। तथा ब्रह्मांडपुराणोक्तमपरमन्यद्वचनमस्तीति प्रतिज्ञायतद्वचनमुदाह
रति। अमोहायेति। विष्णोर्गुणा अमोहायोक्ता न तु दोषवन्मोहाय तथा विष्णोश्चिच्छरीरता आकारो न तु प्राकृताकारत्वे चिज्ज्ञानं शरी
रं यस्यासौ चिच्छरीरस्तस्य भावस्तत्ता ५० ॥ ॥

तथाविष्णोर्निर्दोषत्वमुच्यते। मुक्तानामपि न केवलं संसारिणां तारतम्यं चोच्यते। एतद्विरुद्धं यदुच्यते तत्सर्वं असुरजनमोहायेत्यशेषशास्त्र
निर्णयरति। ब्रह्मांडपुराणवचनस्यार्थः ५१ एवमेव स्कांदे पुराणेपि पाद्मखापवृत्त्यैव तत्र अन्यस्मै येन प्रतारणास्यात्। शिवेनैव
तत्त्वन्येन पेन भ्रांतिमूलत्वशंका स्यात्। सादरं सततात्पर्यमुक्तं। तथा च वक्तृश्रोतृप्रसंगात् मूलत्वात् हरिणा प्रि मूलत्वात्राप्रामाण्यशं
काकार्येत्यर्थः। ननु शैवस्कांदे उक्तं कथं प्रमाणत्वेनोदाहृतमित्यतस्तत्रोक्तं तत्र वार्तिकदृष्टं स्मारयति। शिवशास्त्रेपीति। शिवमधिकृ
त्य प्रवृत्तेपि शास्त्रे भगवच्छास्त्रयोगिवैसवशास्त्रानुरूपं यद्वचनं दर्शनभावयोक्तं तदपि प्रमाणत्वेन ग्राह्यमित्यर्थः ५२ तत्किं स्कांदो
क्तवचनमित्यतस्तत्पठति। परम इत्यादि। एको विष्णुरेव परमः सर्वोत्कृष्टः। तस्य विष्णोर्ज्ञानमेव मोक्षसाधनमित्येवमेव शास्त्राणां निर्ण

निर्दोषत्वं तारतम्यं मुक्तानामपि चोच्यते एतद्विरुद्धं यत्सर्वं तन्मोहायेति निश्चयः ५१ स्कांदे प्युक्तं शिवेनैव षण्मुखायैव साद
रं। शिवशास्त्रेपि तद्ग्राह्यं भगवच्छास्त्रयोगियत् ५२ परमो विष्णुरेवैकस्तज्ज्ञानं मोक्षसाधनं। शास्त्राणां निर्णयस्त्वेषस्तदन्यन्मो
हनाय हि ५३ ज्ञानं विना त्वया मुक्तिः साम्यं च मम विष्णुना। तीर्थादिमात्रतो ज्ञानं ममाधिकं च विष्णुतः ५४ अभेदश्चास्मदादी
नां मुक्तानां हरिणा तथा। इत्यादि सर्वं मोहाय कथ्यते पुत्र नान्यथा ५५ उक्तं पद्मपुराणे च शैव एव शिवेन तु। यदुक्तं हरिणा पू
र्वं उमायै प्राह तद्धरः ५६ ॥ ॥ ॥

यस्तदन्यदेतद्विरुद्धं यत्सर्वं मोच्यते तन्मोहनाय हि यस्मात्तस्मादेष निर्णय इति संबंधः ५३ तदन्यन्मोहनाय हीत्युक्तं विवृणोति। ज्ञानं विनेत्या
दिना। ज्ञानं विना कर्ममात्रेण मुक्तिरिति यदित्यर्थः। हे पुत्र मम रुद्रस्य विष्णुना साकं साम्यं तथा तीर्थादिमात्रतो तीर्थस्नानादिमात्रतः नतु स
द्गुरुमुखेन सच्छास्त्रश्रवणेनेत्यर्थः। विष्णुतः विष्णोः सकाशात् ममाधिकं मुक्तत्वं ५४ तथा हरिणा अस्मदादीनां ब्रह्मादीनामभेदस्तथा मु
क्तानां च हरिणा अभेद इत्यादि सर्वं मोहायासुरजनमोहनाय कथ्यते अन्यथा वास्तवं तत्र कथ्यत इत्यर्थः ५५ एवमेव शैवे शिवप्रतिपाद
के पद्मपुराणे च शिवेनोक्तं तत् किं तत्राह। यदुक्तमिति। पूर्वं हरिणा स्वात्मानं प्रति उक्तं यत्तदुमायै पार्वत्यै हरः प्राहेत्यर्थः ५६ ॥ ॥

तद्वचनमुदाहरति त्वामाराध्येति हे शंभो द्वापरादौ युगे मानुषादिषु कलयांशेनावतीर्य त्वामाराध्य पूजयित्वा सदा वरं गृह्णामि ५७ त्वं च स्वाग
मैः स्वप्रतिपादकागमैः कल्पितैः स्वकपोलकल्पितैः निर्मितैर्जनान्नरुद्धजनान्नमयि मुखान्नमयिमन्त्रिभिरन्यान्कुरु। मां च गोपय आच्छादय अ
नेन किं स्यादत आह। येन स्यादिति। येनानेन कृते नरः भास्वरः स्फुटोरुतरः सन्मार्गवर्तिष्वपि अपरा असन्मार्गवर्तिनी स्यात्। तदर्थमिदं
कुर्वित्यर्थः ५८ नन्वेवं शैवशास्त्रेष्वपि विष्णोः परत्वं यथोच्यते तथा वैष्णवशास्त्रेष्वपि शिवादेरुत्तमत्वमुच्यते चेत्को विशेषः स्यादित्यत आह।
नचेति। वैष्णवशास्त्रेषु भारतादिषु वेदेष्वपि च हरेः परत्वं ... क्वचिदुक्तं रुद्रादीनामपि विष्णुपरत्वात् उक्तरीत्या चान्यशास्त्रेषु विष्णुः प
म रत्वेरितः स्यात्तो विशेषोऽस्तीत्यर्थः ५९ नहरत्वात्त्वा विशेषाद्वेदोक्तमेव ग्राह्यमिति विपरीतं भादिमूलत्वं किं न स्यादित्यत आह निर्दोषत्वादिति। वे

त्वामाराध्य तथा शंभो ग्रहीष्यामि वरं सदा। द्वापरादौ युगे भूत्वा कलया मानुषादिषु ५७ स्वागमैः कल्पितैस्त्वं च जनान्मद्वि
मुखान्कुरु। मां च गोपय येन स्यात्सृष्टिरेषोत्तरोत्तरा ५८ न च वैष्णवशास्त्रेषु वेदेष्वपि हरेः परः। क्वचिदुक्तोऽन्यशास्त्रेषु परमो वि
ष्णुरीरितः ५९ निर्दोषत्वाच्च वेदानां वेदोक्तं ग्राह्यमेव हि। वेदेष्वपि परो विष्णुः सर्वस्मादुच्यते सदा ६० अस्य देवस्य मी
ळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः। विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ६१ ॥ ॥

दानामपौरुषेयत्वेन पुरुषदोषनिबन्धनदोषाभावाद्वेदोक्तमेव ग्राह्यं नत्वन्यत्रोक्तं भ्रान्त्यादिमूलत्वसंभवादित्यर्थः ६० वेदेषु च सर्वस्मा
द्रुद्रादेः परत्वं विष्णुः सदा संसारे सक्तोऽचोच्यत इति प्रतिज्ञाय रुद्राद्युत्तमत्वप्रतिपादकं वेदवाक्यानि पठति। अस्येत्यादिना। देव
स्य क्रीडादियुक्तविशिष्टस्य मीळ्हुषोऽभिलषितफलसेचकस्य स्वभक्तेभ्य इति शेषः। अभिलषितदातुरिति यावत्। समर्थस्य वा एषस्य
आसमन्तादिष्टस्वरूपस्य विष्णोर्हविर्भिः प्रभृथे प्रभरणे आराधने कृते सति वया अहंकाराभिमानित्वात् त्वं वेवक्तुः वयवंथत इति वा
तोः एतादृशो रुद्रो रुद्रियं रुद्रस्य विद्यमानं महित्वं महिमानं विदे लेभे। हि प्रसिद्धं यतो हे अश्विनौ युवामपि तं विष्णुमाराध्य इरावत्
उदनवत् रयवत् वर्तिर्वर्तनं यासिष्टं यासिष्टं प्राप्तमित्यर्थः ६१ ॥

श्रुतं प्रसिद्धं गर्तसदं हृदयगुहानिहितं युवानं प्रथमवयस्कं मृगं न तरसिंहमिव भीमं भयंकरं उपहत्नुं संहारकं प्रलयकाल इत्यर्थः। उग्रं दंष्ट्रांत्र
मालादियुक्तत्वेनोग्रमिव विद्यमानं नरसिंहं स्तुहीति। रुद्रे प्रतिमंत्र इड्डोच्यते। यं कामये इति लक्ष्म्यात्मको भ्रणो वाक्यं। यं यं रुद्रं कर्तुं का
मये तं तमुग्रं कृणोमि करोमि। यं ब्रह्माणं कर्तुं कामये तं ब्रह्माणं कृणोमि। यं ऋषिं कर्तुं कामये तं तथा करोमीत्यर्थः। अत्र रुद्रस्य लक्ष्म्य
धीनत्वोक्त्या लक्ष्म्याः विष्णुवशधीनत्वात् लक्ष्म्यधीनस्य रुद्रस्य विष्णुधीनत्वं किमु कैमुत्यमिति सिद्धं भवति। अतो नासंगतिः ६२ प्रलये एको
नारायण आसीत् न ब्रह्मा शंकरश्च नासीदित्यर्थः। इदमग्रे अस्य जगतोग्रे आदौ वासुदेव आसीत् न ब्रह्मेति पूर्ववत् ६३ ननु दात्व
त स्तुतिभिर्विरोधः सर्वस्मात्परत्वं संसारदशायां सिध्यति मुक्तौ च विरोधः सर्वाभेदात् यं तत्र सर्वपरत्वं तथा च सर्वस्मादुच्यते स देत्यव
पपन्नमिति। अतो मुक्त्यनंतरमपि विरोधः सर्वभेदश्रुतेस्तत्रापि तत्सिद्ध्यतीत्याह यदेति। पश्यतीति पश्यो जीवोऽपरोक्षज्ञानावस्थाप

स्तुहि श्रुतं गर्तसदं युवानं मृगं न भीममुपहत्नुमुग्रं। यं कामये तं तमुग्रं कृणोमि तं ब्रह्माणं तमृषिं तं सुमेधां ६२ एको नाराय
णा आसीन्न ब्रह्मा न च शंकरः। वासुदेवो वा इदमग्र आसीन्न ब्रह्मा न च शंकरः ६३ यदा पश्यः पश्यते रुक्मवर्णं कर्तारमी
शं पुरुषं ब्रह्मयोनिं। तदा विद्वान् पुण्यपापे विधूय निरंजनः परमं साम्यमुपैति ६४ यो वेद निहितं गुहायां परमे व्योमन् सो
ऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चितेति ६५

न्नो रुक्मवर्णं स्वर्णवर्णं सर्वस्य कर्तारं ईशं सर्वस्वामिनं पुरुषं पूर्णं षड्गुणं ब्रह्मणो वेदस्य चतुर्मुखस्य वा योनिं कारणं परमात्मानं पश्य
ते अपरोक्षीकरोति यदा तदा विद्वान् अपरोक्षज्ञानी पुण्यमपि पापं च सर्वात्मना विधूय निरंजनः सर्वदोषविनिर्मुक्तः सन् परमं साम्यं
अपरोक्षीकृतस्य हरेर्निर्दुःखत्वादिसाम्यमुपैति न तु तदैक्यमित्यर्थः। अस्यां श्रुतौ रुक्मवर्णत्वादिगुणविशिष्टविष्णुहृद्ब्रह्मा मुक्तस्य वि स्तु
सा हृश्यकथनात् मुक्तावैक्याभावेन सर्वदा परत्वं युक्तमिति भावः ६४ गुहायां हृदयगुहायां विद्यमाने परमेऽस्य विष्णोर्निवासस्थान
त्वात् परमे व्योमन् व्योम्नि हृदयाकाशे इति यावत्। निहितं प्रतिष्ठितं यो वेद अपरोक्षतया पश्यति स विपश्चिता अपरोक्षज्ञानिना ब्रह्म
णा चतुर्मुखेन सह हरिं प्राप्येति शेषः। तथा विपश्चिता सर्वज्ञेन हरिणा विद्यमानान् सर्वान् स्वस्वयोग्यान् कामान् अश्नुते भुंक्ते इत्यर्थः। अत्र च

इतोपिसत्तैभेदाभावोनमंतव्योयतोविष्णोर्महिम्नोजगतश्चसत्यत्वावगमेनसर्वभेदस्यपारमार्थिकत्वावगमइतिभावेनमहिमादिसत्यत्वप्रतिपा
दकश्रुतीरुदाहरति।प्रद्योत्यादिना।अस्यमहतउत्कृष्टस्यविष्णोर्महानिमहांतिसत्यासत्यानिपारमार्थिकानिकरणानिसृष्ट्यादिकर्मा
णिइंद्रदातीद्यएवप्रवोचंप्रवच्मीत्यर्थः।कर्मणांसत्यत्वेविषयसत्यतामंतरेणानोपपद्यतइतिविश्वसत्यतासिद्धिः।एरणातत्त्वव
तोमघोतरंइंद्रस्यदेवस्यरातिंमित्रंअभीष्टदातारंवा।रादानइतिधातुः एतेविष्णुमनुएतस्मादेवविश्वेसर्वेदेवामदंतितृप्यंतीत्येत
त्सर्वस्योपजीव्यकत्वंविष्णोःसर्वोपजीव्यत्वेचसत्यंचपारमार्थिकमित्यर्थः ६६ स्पार्हस्पृहणीयंस्वर्गादिरूपंवसुधनंवत्र्यादिभ्यः
सकाशाज्जेतोतजेतापिइंद्रादिभ्योदातोतदातापिएतादृशोविष्णुर्यद्विवेतयद्विश्वंचकारतत्सत्यमितिसत्यमेवनतत्र मोघंमिथ्येत्य
र्थः।अस्यविष्णोःसएवींद्र प्रसिद्धोवामहिमासत्यःतंमहिमानंविप्रराज्येविप्रराज्यरूपेषुयज्ञेषुशवःस्वरवत्सुद्विश्यएणोत्स्नोमी

प्रद्योत्वस्यमहतोमहानिसत्यासत्यस्यकरणानिवोचं।सत्यमेनमनुविश्वेमदंतिरातिंदेवस्यएणतोमघोनः ६६ यद्विवे
तसत्यमितन्नमोघंवसुस्पार्हमुतजेतोतदाता।सत्यःसोअस्यमहिमाएणोशवोयज्ञेषुविप्रराज्ये ६७ सत्याविष्णोर्गुणाः
सर्वेसत्याजीवेशयोर्भिदा।सत्यामिथोजीवभेदःपुरुस्परं।जडेशयोर्जडानांचजडजीवसत्यैचजगदीदृशं ६८ असत्यास्वग
तोभेदोविष्णोर्नान्यदसत्यकं।जगत्प्रवाहःसत्योयंपंचभेदसमन्वितः ६९ जीवेशयोर्भिदाचैवजीवभेदःपरस्परं।जडेशयोर्ज

त्यर्थः ६७ विष्णोःसर्वेज्ञानानंदादयोगुणाःसत्याःस्वतएवविरुद्धधर्मा ११ डानांचजडजीवभिदातथा ७० ॥ ॥
र्विकरणात्वाज्जीवेश्वरयोर्भिदाभेदःसत्यासत्याःमिथःपरस्परंजीवानांभेदःसत्यःदेहशंप्रत्यक्षसिद्धंजगद्धसत्यंजगत्सत्यत्वोपपा
दकमेतत ६८ जीवभेदइत्यस्यव्यावर्त्यमाह।असत्यइति।विष्णोःस्वगतोभेदःस्वगुणक्रियादिभ्योभेदोऽसत्योतोस्त्येव।तेहनानास्ती
तिश्रुतेःविष्णोरन्यत्।विश्वंअसत्यकंमिथ्याभूतंनभवति।किंतुसत्यमेवविश्वंसत्यमित्यादिश्रुतेरित्यर्थः।जगदंतरमपिसत्यमित्याह
।जगत्प्रवाहइति।जगत्प्रवाहरूपेणप्रवर्त्तमानंजगदित्यर्थः ६९ पंचभेदसमन्वितइतिउक्तान्पंचभेदान्दर्शयति।जीवेशयोरि
ति।जीवेशयोर्भेदः।जीवानांपरस्परंभेदः।जडेशयोर्भेदः।जडेशयोर्भेदः।जडानांपरस्परंभेदः।जडजीवयोर्भेदइति ७० ॥ ॥

स्मे पंचभेदाः सर्वशः। सर्वेपि सर्वावस्थासु संसारे सुषुप्तौ मुक्तौ च नित्या विनाशरहिताः संति। अतएव मुक्तानामपि पंचभेदा न हीयंते तत्तत्श्रयं
तीत्यर्थः। अत्र प्रकृतिकालाकाशादिरूपनित्यजडभेदो नित्य इति मंतव्यं। तथा मुक्तानां तारतम्यं च सर्वदा संसारे मुक्तौ च न हीयते तत्तत्श्रयती
त्यर्थः ७१ मुक्ततारतम्यमेव दर्शयति। क्षितिपा इति। अत्र क्षितिपानाम मनुष्योत्तमा अपि विवक्षिताः। एकातंदस्वरूपोसौ मानुषो
मुक्त इष्यते। तस्माच्छतगुणानंदा गंधर्वा मानुषात्मका इति वचनात्। क्षितिपेभ्यो मनुष्यगंधर्वाः शतगुणोद्रिक्ताः। अत्रापि विशेषः
। देवप्रेष्याणां गंधर्वा द्विविधाः मनुष्यगंधर्वा देवगंधर्वाश्चेति। तत्र परसुखेन कार्यप्रेष्या मनुष्यगंधर्वाः स्वसुखेनैव कार्यप्रेष्या देवगं
धर्वास्तत्र मनुष्यगंधर्वाः क्षितिपशब्दवाच्येभ्यो मनुष्योत्तमेभ्य उद्रिक्ता इत्यर्थः। तेभ्यो मनुष्यगंधर्वेभ्यो देवाश्च चशब्देन गंधर्वपद
मनुकृष्यते देवगंधर्वा उत्कृष्टा इत्यर्थः। तथा चोक्तं। स्वसुखेनैव देवैर्ये आत्ता याः सर्वदा गताः। आख्याता देवगंधर्वा येत्वन्यसुखगो
चराः। मानुषास्ते तु गंधर्वास्तेभ्यस्ते च शतावराः। तेभ्यः शतावराश्चैव मनुष्येषूत्तमा गणा इति। देवगंधर्वेभ्यश्च चिराः पितरः शत

पंचभेदा इमे नित्याः सर्वावस्थासु सर्वशः। मुक्तानां च न हीयंते तारतम्यं च सर्वदा ७१

क्षितिपा मनुष्यगंधर्वा देवाश्च पितरश्चिराः। आजानजाः कर्मजाश्च देवा इंद्रः पुरंदरः ७२

गुणोत्तराः। चिरपितृष्वपि सप्रतेषु प्रधानका इत्यादि विशेषो द्रष्टव्यः। चिरपितृभ्य आजानजा देवाः शतगुणोत्तराः। आजानजा नाम ता
त्विकानां कुले जाता देवत्वेनानाख्याता देवमहत्यात्युच्यंते। अनाख्याता देवतास्तु जाता देवकुले च याः। आजानदेवतास्ता हि ताभ्यो
भ्यः कर्मदेवता इति वचनात्। आजानजेभ्यः कर्मजाश्च चशब्देन देवपदमनुकृष्यते। कर्मजा देवाः शतगुणोद्रिक्ता इत्यर्थः। अत्र कर्मजानां
मध्ये कर्मणा देवत्वं प्राप्तव्याद्याः राजानो विवक्षिताः। तथा चोक्तं। वल्याद्या अंतरा ये प्राप्ता देवताः कर्मदेवता इति। अत्यंतं चोक्तं। कार्तवी
र्यः पृथुश्चैव दौष्यंतिर्भरतस्तथा। शशबिंदुश्च मांधाता काकुत्स्थाद्यास्तथापरे। सर्वे ते विष्णुना विष्टा विशेषाद्भिन्नाः सदैव तु। शतावरा
श्च देवेभ्यः कर्मदेवा इति स्मृता इति। कर्मजेभ्यो देवा उत्कृष्टाः। अत्र देवशब्देन स्पष्ट्यादौ देवत्वं गताः तात्त्विका देवा विवक्षिताः। ताभ्यश्च
तात्त्विका देवाः स्पष्ट्यादौ देवतां गता इति वचनात्। देवेभ्यः पुरंदर इंद्र उत्तमः। इतरेंद्रव्यावृत्त्यर्थं पुरंदर इतींद्रस्य विशेषणं ७२

पुरंदरेंद्राद्युद्भवः शतयुगोत्तराः। रुद्रात्सरस्वती शतयुगोत्तरा। सरस्वत्या वायुः शतयुगोत्तरः। न केवलमेते संसारदशायां शतयुगोत्तराः। किंतु मुक्ताः
संतोऽपि शतयुगोत्तरा इत्याह। मुक्ताः शतयुगोत्तरा इति। नन्वत्र वायुना सह ब्रह्मणोऽपरिगणनेन द्वैरासमं शेषगरुडयोरपरिगणने च को
हेतुरित्यत आह। एक इति। प्रकृतपूर्वगात्याभा विगत्या वा वायुशब्देन ब्रह्मणोऽपि गणनं। वीन्द्रस्य गरुडस्य रुद्रसमत्वात्तत्परिगणनेन तत्प
रिगणनं कृतप्रायं ७३ तथा शेषोऽपि रुद्रस्यैक एव। तथा च तत्रापि प्रकृतपूर्वगत्या शेषस्य पूर्वं रुद्रत्वाद्वा आभाविगत्या रुद्रस्य शेषत्वं भवि
ष्यतीति वा रुद्रग्रहणेन शेषोऽपि गृहीत एवेत्यर्थः। तथा चोक्तं। स्थितप्रज्ञोऽपि वस्तूर्ध्वः प्राप्य रौद्रपदं ततः। सांकर्षणं ततो मुक्तिमगाद्वि
ष्णुप्रसादत इति गारुडे। नारदीये च। महादेवपरे जन्म तव मुक्तिर्निरूप्यत इति। ननु यथा रुद्रस्य समो वीन्द्रोऽस्ति। तथा वायुसमोऽन्यो

रुद्रः सरस्वती वायुर्मुक्ताः शतयुगोत्तराः। एको ब्रह्मा च वायुश्च वीन्द्रो रुद्रः समस्तथा ७३ एको रुद्रस्तथा शेषो न कश्चिद्वा
युना समः। मुक्तो मुक्तस्तथा वायोः सहस्रयुगितायुगोः ७४ ततोऽनंतयुगो विष्णुर्न कश्चित्तत्समः सदा। इत्यादिवेद
वाक्यं हि विष्णोरुत्कर्षमेव वक्तुं वैः ७५ ॥ ॥

स्त्रिस्त्रिमित्याकांक्षायामाह न कश्चिदिति। मुक्तेष्वपि वायुना समो न कश्चिदस्तीत्यर्थः। तथा शब्दः समुच्चये। वायोः सकाशाच्छ्रीर्लक्ष्मीः
युगोर्त्तमानंदादिभिः सहस्रयुगिताता कोटियुगोत्तरेत्यर्थः। मुक्तावप्येवरीतिरियं सर्वे कोटियुगोत्तरा इति वचनात् ७४ ततः श्रि
यः सकाशादनंतयुगो विष्णुरुच्यते। स एवावधिरित्याह। न कश्चिदिति। सदा संसारे मुक्तौ च तस्य विष्णोः समोऽधिको नास्त्येवेत्यर्थः। वे
देषु च परो विष्णुरिति स्तुत्युपपाद्योपसंहरति। इत्यादीति। इत्युदाहृतं वेदवाक्यजातं आदिपदस्य वेदवाक्यस्य तद्विष्णोरुत्कर्षमेव
वक्ति न तु क्वचिद्द्वैत्यं विष्णोरेवोत्कर्षं वक्ति न तु रमादेरिति वा एवकारसंबंधः। उच्चैरिति स्पष्टमित्यर्थः ७५ ॥ ॥

ननूदाहृतवाक्याद्विशेषोत्कर्षः प्रतीयत इत्येतावता तत्तत्सिद्धिः वाक्यस्यात्र तात्पर्यमिति श्रूयादित्यत आह तत्रैव तात्पर्यं सर्वविद्यानामित्यत्रप्र
माणांसूचयति तात्पर्यमिति। अत्रविशेषोत्कर्ष एव महातात्पर्यमस्तीत्येतत्तत्र। मामेवमसंमूढो जानाति पुरुषोत्तमं। ससर्वविदिति
तेनव्यासेन हस्तेन वा स्वयं स्वेनैवोक्तं योमामिति। पुरुषोत्तमत्वं जानतः सर्वविदित्वं साक्षादुक्तं तत्तदास्यात्। यदि पुरुषोत्तमत्वस्यैव सर्व
शास्त्रार्थत्वं स्यात्। अतस्तत्रैव सर्ववेदादिशास्त्रतात्पर्यमस्तीति भगवतोक्तमिति भावः। विशेषः सर्वोत्तमत्वे वेदानां तात्पर्यमस्तीत्यत्र
ज्ञापकांतरमाह। मंत्र इति। मंत्रः ऋतंवक्ष्याय स्वं तथा हि दर्शयतीति सूत्रेषु बहुसूत्रेषु स्थित मंत्रो मंत्रगुणस्य सर्वगुणोपुष्टत्व
मुक्तं अतो विशाय तेषां त्वापरपर्यायं सर्वोत्तमत्वं सर्ववेदतात्पर्यविषय इति भावः। निर्णयावि निर्णयेनेत्यर्थः। सूत्रस्य निर्णायक

तात्पर्यं महदत्रेत्युक्तं योमामितितिस्वयं तेनाम् मंत्रोऽप्याय स्वमित्युक्तं सूत्रे॥ ॥
सुनिर्णयात्तेन ७६ तत्प्राप्त्यैव च मोक्षः प्राप्यस्तेनैव नान्येन ७७ ॥ ॥

त्वादिति भावः ७६ एवं विशेषः सर्वोत्तमत्व एव सर्ववेदानां महातात्पर्यमस्तीत्यत्र स्मृतिसूत्रेषु प्रमाणानि दत्त्वा तत्साधितं अनुवदन्नुपापित
त्सिध्यतीति भावेनाह। तत्प्राप्त्यैव चेति। अयं भावः। विशेषः प्राप्त्यैव मोक्षस्तावच्छ्रूयते। तत्प्राणात्मोक्षमाप्नोति सर्वस्तत्तोवेदास्तत्प
राः सर्व एवेत्यादिश्रुतेः। विशेषप्राप्तिश्च गुणोत्कर्षज्ञानाधीना तदृशोप्राप्तिरीप्सस्यविशेषगुणोत्कर्षज्ञानरहितं दृशोस्यादित्यादिश्रुतेः
प्राप्तव्यं हि राजानो राजाहमितिवदंतो ददति च सर्वमभिप्रेतं गुणोत्कर्षं वदन्नित्यादेश्च। मोक्ष एव च सर्वपुरुषार्थोत्तमः। अतस्त
नैव फलेन वेदे भवितव्यं। अतोऽपि ज्ञानान्मोक्षस्तद्वदेत तात्पर्यात्प्रतिपाद्यो अतो गुणोत्कर्ष एव वेदानां तात्पर्यं सिध्यतीति तस्य
विशेषः प्राप्त्यैव न तु तद्विपक्षतत्प्राप्त्यानन्तु विशेषप्रसादात्प्राप्तत्प्राप्त्यैवेत्येतत्सिध्यति। तदेव ज्ञातव्यमत उक्तं। तेनैवेति। तेनैव
विशेषेणैव मोक्षः सिध्यति नान्येनेत्यर्थः ७७ ॥ ॥

नप्रतिज्ञामात्रेणातदुभयं सिध्यतीत्यतस्तत्प्राप्त्यैव चेत्यत्र तावत्प्रमाणमाह। नायमिति। अयमात्मा परमात्मा प्रवचनेन व्याख्यानेन न लभ्यः
प्राप्यो न भवतीत्यर्थः। मेधया न लभ्यः। बहुना श्रुतेन श्रवणेनापि न लभ्यः। एषः परमात्मा यं जीवं स्वीयत्वेन प्रीत्या वृणुते तेन तेन जीवेन ल
भ्यः। तस्य जीवस्य एषः प्रकृत आत्मा स्वां तनुं स्वबिंबरूपं विवृणुते प्रकटीकरोति। जीवस्यापि अपरोक्षीकृतस्वबिंबरूपस्य स्वां तनुं स्व
रूपं चिदानंदाद्यात्मकं विवृणुते। आवरणतिरोधानेन प्रकटीकरोतीत्यर्थः ७८ तेनैव नान्येनेत्यत्रापि प्रमाणमाह। विष्णुर्हीति। उ
त्तापरं भविष्यत्पर्ववचनमित्यतः प्रोक्तानि वाक्यानि भविष्यत्पर्वगतवचनानीति ज्ञातव्यं। न तु वायोरपि कश्चिन्मोक्षदातृत्वं श्रूय
ते तत आह। वायुश्चेति। तस्य विष्णोराज्ञया वायुर्मोक्षदाता न तु स्वातंत्र्येणेत्यर्थः। अत्र मोक्षपदं ज्ञानानंदादेरुपलक्षणं। एवं वायुपद

नायमात्मा प्रवचनेन लभ्यो न मेधया न बहुना श्रुतेन। यमेवैष वृणुते तेन लभ्यस्तस्यैष आत्मा विवृणुते तनूं स्वां ७८ विष्णुर्हि दाता
मोक्षस्य वायुश्च तदनुज्ञया। मोक्षो ज्ञानं च क्रमशो मुक्तिगो भोग एव च ७९ उत्तरेषां प्रसादेन नीचानां नान्यथा भवेत्। सर्वेषां
च हरिर्नित्यं नियंतात्र वशाः परे ८० तारतम्यं ततो ज्ञेयं सर्वोच्चत्वं हरेस्तथा। एतद्विना न कस्यापि विमुक्तिः स्यात्कथंचन ८१

मपि स्वस्वोत्तमोपलक्षणमित्याह। मोक्ष इति। मोक्षः संसारात्त्राणं तत्साधनं ज्ञानं क्रमशः क्रमेण मुक्तिगो मुक्तौ जायमान आनंदभोगश्च
७९ उत्तरेषां स्वस्वोत्तमानां प्रसादेन नीचानां अधमानां भवेत् न नान्यथेत्यर्थः। तदुक्तं जयेत्येतद्विवृणोति। सर्वेषां चेति। नित्यं संसारे
मुक्तौ च सर्वेषां जीवानां हरिर्नियंता। ते च परे त्वन्ये सर्वे जीवास्तद्वशगा इत्यर्थः ८० ततस्तत्प्रसादस्यापेक्षितत्वात्तेषां तारत
म्यं ज्ञेयं। तथा सर्वापेक्षया उच्चत्वं हरेर्ज्ञेयमित्यर्थः। एतदुभयाज्ञाने मोक्षाभावादुभयमेवावश्यं ज्ञेयमित्याह। एतद्विनेति। एतदुभ
यज्ञानं विना कस्यापि जीवस्य कथंचन केनापि प्रकारेण विमुक्तिर्न स्यादित्यर्थः ८१ ॥ ॥ ॥

तथात्पदपि मोक्षार्थमवश्यं ज्ञेयमस्तीत्याह। पंचभेदांश्चेति। पूर्वोक्तानन्यं च भेदात्त्रिविधो। स्वाभेदं स्वरूपगुणकर्माद्यभेदं तथाविधो। निर्दोषत्वं च गु
णोद्रेकं गुणोत्कर्षं च ज्ञात्वैव मुक्तिर्नान्यथेत्यर्थः ८२ हरेरवतारान्मत्स्यादीन्। ये च हरेर्नावतारा: पृथुबलभद्राद्यास्तदावेशांस्ते मुवि
द्यमानान्विशेषावेशांश्च सम्यक्रूपाधात तथ्येन ज्ञात्वैव मुक्तिर्नान्यथेत्यर्थः ८३ तथास्त्र ष्ट्यादिव्यापारानपि विष्णोरेकनिष्ठान् ज्ञात्वै
व मुक्तिर्नान्यथेत्याह। सृष्टीति। स्थितिः संहारः अज्ञानमावरणं। बंधनामिति तिष्ठति लिंगं साधु वदेवः कर्मकारणः संतीत्यादिवत् ८४
पंचरात्राणि सेतिहासपुराणकान् वेदांश्च विष्णुपरानेव ज्ञात्वा मुक्तिर्नान्यथेत्यर्थः ८५ एवं साधारणसाधनान्युक्त्वा असाधार
णसाधनमाह। माहात्म्येति। सर्वोत्तमत्वेनैव मुक्तिर्नान्यथेत्युक्ते कानाम भक्तिरित्यपेक्षायां भक्तिस्वरूपं निरूपितं माहात्म्येति। सर्वो

पंचभेदांश्च विज्ञाय विष्णोः स्वाभेदमेव च। निर्दोषत्वं गुणोद्रेकं ज्ञात्वा मुक्तिर्न चान्यथा ८२ अवतारान्हरेर्ज्ञात्वा नावतारा हरेश्च ये
। तदावेशांस्तथा सम्यग्ज्ञात्वा मुक्तिर्न चान्यथा ८३ सृष्टिस्थित्यंहृतिर्ज्ञाननियत्यज्ञानबंधनान्। मोक्षं च विष्णुतश्चैव ज्ञात्वा मुक्तिर्न
चान्यथा ८४ वेदांश्च पंचरात्राणि सेतिहासपुराणकान्। ज्ञात्वा विष्णुपरानेव मुच्यते नान्यथा क्वचित् ८५ माहात्म्यज्ञानपूर्व
स्तु सुदृढः सर्वतोधिकः। स्नेहो भक्तिरिति प्रोक्तस्तया मुक्तिर्न चान्यथा ८६ त्रिविधा जीवसंघास्तु देवमानुषदानवाः। तत्र देवा मु

त्तमत्वज्ञानपूर्वकः सुदृढः कदाप्यनपगतः सर्वतः प्रियादधिकः स्नेहोधिका प्रीतिर्हरौ ॥ क्तियोग्या मानुषेषूत्तमास्तथा ८७
भक्तिरित्यर्थः। तथा च हरौ भक्तिर्नाम निरवधिकानंतानवद्यकल्याणगुणत्वज्ञानपूर्वकः स्वात्मात्मीयसमस्तवस्तुभ्योनेकगुण
धिकोनंतरायसहस्रेणाप्यप्रतिबद्धो निरंतरप्रेमप्रवाहस्तदुक्तं भवति ८६ ननु साधनसंपन्नौ किं सर्वेषां जीवानामविशेषेण
मोक्षो भवत्युत केति। पद्यानामेवेत्याकांक्षायां कतिपयानां योग्यानामेवेत्याकांक्षायां कतिपयानां योग्यानामेवेति वक्तुं जीव
विभागमाह। त्रिविधा इत्यादिना। देवमानुषदानवा इति जीवसंघास्त्रिविधा इत्यर्थः। तत्र तेषु त्रिविधेषु देवा मुक्तियोग्या मानुषा।
अपि त्रिविधा उत्तमा मध्यमा अधमा इति। तत्रोत्तमानां देववन्मुक्तियोग्यतेत्याह मानुषेष्विति ८७ ॥ ॥ ॥

मध्यमानांयोग्यतामाह।मध्यमाइति।उत्तरेषांसंसारयोग्यत्वेपिकदाचित्तन्नाशोस्तिमध्यमानांतुकदापिसंसारनाशोनास्तीतिविशेषादि
तरेभ्योभेदइत्याह।सृतियोग्याःसदैवहीति।अथममाडुषाणांयोग्यतामाह।अधमाइति।निरयायनित्यनिरयाय।दानवानांयोग्यतामाह।
दानवास्त्विति।तुशब्देनतमस्यपिविशेषोस्तीतिसूचितं।तमोघंतमलयआलयोस्त्येषांतेतथा ८८ ननुमुक्तानांतमोगतानांचस्वतः
संसारस्याप्राप्तेनित्यसंसारिणामेतेषांचकोविशेषइत्यतउभयेषामप्यावृत्तिर्नास्तीत्याह।मुक्तिरिति।एतयोर्मुक्तितमसोःसकाशात्सं
सारेआवृत्तिरागमनंनास्तितयोर्नित्यत्वादित्यर्थः।नचैतेषांयोग्यताव्यत्यासोस्तीत्याह देवानामिति।देवानांमनुष्योत्त
मानांमुक्तिरेवनतुनिरयःतमश्चेत्यर्थः ८९ तथाअसुराणांमानुषाधमानांनोमुक्तिःकदाचित्कालेकेनचित्साधनेनक्वचिद
पिदेशेनभवति।तथामध्यममानुषाणांनित्यंस्वर्गनिरकमर्त्यप्राप्तिरूपःसंसारएवनतुएतत्त्रयंमुक्तितमोलक्षणमाप्यतेप्राप्यत

मध्यमामानुषायेतुसृतियोग्याःसदैवहि।अधमानिरयायैवदानवास्तुतमोलयाः ८८ मुक्तिर्नित्यातमश्चैवनावृत्तिःस्यात्तयोः
देवानांनिरयोनास्तितमश्चापिकथंचन ८९ नासुराणांतथामुक्तिःकदाचित्केनचित्क्वचित्।मानुषाणांमध्यमानांनचैतत्त्र
यमाप्यते ९० असुराणांतमःप्राप्तिस्तदानियमतोभवेत्।यदातुज्ञानिसद्भावेनैवद्वेक्ष्यंतितत्परं ९१ तदामुक्तिर्हिदेवानांय
दाप्रत्यक्षगोहरिः।स्वयोग्ययोपासनयातत्त्वातद्योग्ययातथा ९२

इत्यर्थः ९० ननुतमोयोग्यानांतमोमुक्तियोग्यानांमुक्तितमौलब्धेकदाभवतीत्यपेक्षायामाह।असुराणामिति।यदाज्ञानिसद्भावेषस
वत्त्वबलत्वादिलक्षणात्क्षितस्सज्ञानिनःसद्भावेसांनिध्येसत्यपितत्परंसर्वोत्तमंब्रह्मनैवद्वेक्ष्यंतिस्वरूपद्वेषस्याभिव्यक्तत्वात्।तदाअ
सुराणांनियमतस्तमःप्राप्तिर्भवेत्।संपूर्णास्यस्वरूपद्वेषस्याविर्भावोतमःप्राप्तिर्भवतीतिभावः ९१ यदाचहरिःप्रत्यक्षगःप्रत्यक्ष
विषयस्तदादेवानांमुक्तियोग्यानामितियावत्।मुक्तिर्भवतीत्यर्थः।कथंप्रत्यक्षगोहरिर्भवतीत्यतउक्तं।स्वयोग्ययेति।स्वस्वयोग्यगु
णोपासनात्रोहरिस्तत्तदुपासकयोग्यज्ञातत्वात्तद्दर्शनयोग्येनस्वरूपेणप्रत्यक्षगोभवतीतिसंबंधः ९२ ॥ ॥

मयाप्रस

ननु स्वयोग्ययोपासनयेत्युक्तं तत्र के गुणाः कस्योपासनायोग्या इत्यत आह। सर्वैरिति। सर्वैर्वेदोक्तैर्गुणैः सदा संसारे मुक्तौ च ब्रह्मणा सम्यगु
पास्यः। आनंदत्तः चिद्रूपः सन्निर्दोषः आत्मा स्वामी च गुणैर्गुणैर्हि मानुषैरुपास्य इत्यर्थः ९३ तदन्यैस्तेभ्यो मानुषेभ्योऽन्यैर्ब्रह्मादिभि
र्यथायोग्यं स्वस्वयोग्यतानुसारेण विरिंचतस्तृणपर्यंतं गुणो ईकान्हुणा विकल्पादुपास्य इत्यर्थः। ननु तर्हि त्वोपासना तारतम्यस्या
वश्यकत्वान्मोक्षेपि तारतम्यं स्यात्। तच्चायुक्तं साम्यमुपैतीति मोक्षे साम्यप्राप्तिश्रुतेरित्यत आह। ब्रह्मत्वयोग्या इति। ब्रह्मत्वप्राप्ति
योग्या ऋजवो नाम प्रसिद्धा देवाः पृथक् शेषादिगणेभ्यो विलक्षणो गणो येषां ते तथा ते संति ९४ तैरेव क्रमात्प्राप्तिस्तत्पदं ब्रह्मपदं प्रा
प्यं प्राप्यं। अन्यैः शेषादिभिः साधनैरुपस्थितैरपि नैव प्राप्यं। अतः फलेपि तारतम्यस्य विद्यमानत्वात् तैरेव सर्वैर्गुणैरुपास्यो नान्यैरि

सर्वैर्गुणैर्ब्रह्मणा तु सम्यगुपास्यो हरिः सदा। आनंदोज्ञः सदात्मेति त्वन्युपास्यो मानुषैर्हरिः ९३ यथायोग्यं गुणो ईकान्तदन्यैरा विरिंच
तः। ब्रह्मत्वयोग्या ऋजवो नाम देवाः पृथग्गणाः ९४ तैरेवाप्यं तत्पदं तु नैवान्यैः साधनैरपि। एवं सर्वपदानां तु योग्याः संति पृ
थग्गणाः ९५ तस्मादनाद्यनंतं हि तारतम्यं चिदात्मनां। तच्च नैवान्यथा कर्तुं शक्यं केनापि कुत्रचित् ९६ ॥ ॥

ति साधनेन तारतम्यं युक्तमिति भावः। ननु तर्हि तदतिरिक्तानामविशेषेणोपासनं स्यात् तत्फले तारतम्याभावादित्यत आह। एवमिति। सर्व
पदानां शेषगरुडादिपदानां योग्याः पृथक् परस्परविलक्षणगणाः संति। अतस्तैस्तैरेव तत्तत्फलं प्राप्यं नान्यैरिति। तत्रापि फलता
रतम्यायुक्तं उपासना तारतम्यमिति भावः ९५ तस्मात्साम्यश्रुतेर्निर्दुःखत्वादिसाम्यपरत्वान्न स्वरूपसाम्यं तदर्थं इत्याह। तस्मादि
ति। चिदात्मनां चिद्रूपाणां अशेषोत्तमजीवानां तारतम्यं स्वरूपेणानीचोच्चभाव इति यावत्। तच्च न विद्यते आदिः उत्पत्तिर्यस्य तत्तथा
न विद्यते अंतो विनाशो मोक्षेपि यस्य तत् तथोक्तं। हि यस्मात्तस्मात् तारतम्यं कुत्रचिद्देशे काले वा केनापि साधनेन स्वरूपेणान्यथा
कर्तुं उच्चं नीचं कर्तुं न शक्यमित्यर्थः ९६ ॥ ॥

ता०टी० ननुकेनचित्रीचेनोद्ययोग्यमुपासनंक्रियतेचेदद्यभावः प्राप्तुंशक्यतइत्यतआह।अयोग्यमिति।स्वायोग्यमुपासनंकर्तुमिच्छन्त्रेवपतति।त
१७ स्मादुपासनाद्भ्रश्यतेतत्फलंगोहूरापास्तइतिभावः।यतोऽयोग्योपासनेछायांपातस्तस्माद्योग्यतानुसारेण।सदासर्वैर्विष्णुःसेव्यःउ
पास्यइत्याहतस्मादिति ९७ ननुसदैवसेव्यइत्युपपन्नंकदाचित्सेवनेनापितदपरोक्षज्ञानसंभवादित्यतआह।अछिद्रेति।अछि
द्रसेवनान्निरंतरसेवनात्तथानिष्कामत्वात्फलानाकांक्षयायोग्यतःयोग्यतानुसारेणैवहरिईदृशःशक्योअन्यथातुकथंचनकेनापिप्र
कारइत्यर्थः ९८ तच्चनैवान्यथाकर्तुमित्यत्रहेतुमाह।नियमइति।अयंपूर्वोक्तोनियमोहरेर्यस्मात्तस्मात्सर्वचेतनैर्नोल्लंघ्यःअशक्यत्वा
दित्यर्थः।हरेःशक्तत्वात्स्वकृतोनियमःस्वेनैवान्यथाकरिष्यतेइत्यतआह।सत्येति।विष्णुःशक्तोपिसत्यसंकल्पतःसत्यःनियतःसंकल्प

अयोग्यमिच्छन्स्वरूपस्पतत्येवनसंशयः।तस्माद्योग्यानुसारेणसेव्योविष्णुःसदैवहि ९७ अछिद्रसेवनाच्चैवनिष्कामत्वाच्चयोग्यतःइ
ईशःकोपिहरिःसर्वैर्नान्यथातुकथंचन ९८ नियमोयंहरेर्यस्मान्नोल्लंघ्यःसर्वचेतनैः।सत्यसंकल्पितोविष्णुर्नान्यथातुकरिष्यति
९९ दानतीर्थतपोयज्ञपूर्वाःसर्वेपिसर्वदा।अंगानिहरिसेवायांभक्तिस्त्वेकाविमुक्तये।भविष्यत्येवंवचनमित्येतदखिलंपरं १००

इच्छाविशेषोयस्यसतथा।भावप्रधानोनिर्देशःसत्यसंकल्पत्वतइत्यर्थः।अथवासत्यश्चासौसंकल्पश्चेतिसत्यसंकल्पस्तस्मादित्यर्थः।एव
मेवकरिष्यामीतीच्छाविशेषान्नान्यथाकरिष्यतीत्यर्थः ९९ ननुतत्याज्ञुक्तिर्नचान्यथेतीत्यादिनाभक्तेरेवमोक्षसाधनत्वमुक्तंतदयुक्तं राम
त्यागेनैकेअमृतत्वमानशुरित्यादिश्रुत्यादानादिनापिमोक्षप्राप्तिप्रतिपादनादित्यतआह।दानेति।दानंपात्रेद्रव्यत्यागः।तीर्थंभागीर १७
थ्यादि।तपश्चांद्रायणादि।यज्ञोज्योतिष्टोमादिश्चपूर्वेयेषांतेतथातेसर्वेउपायाहरिसेवायांभक्तिरूपायामंगानिभक्तिस्त्वविमुक्त
येमोक्षायएकास्वानंतरभाविसाधनांतरानपेक्षाउपायइत्यर्थः।उदाहृतानिवचनानिचैतत्स्वकपोलकल्पितानीत्याह।भविष्यदि
तिपरंनिर्दोषमित्येतदुदाहृतंअखिलंवचनंविष्णुर्हिदातामोक्षस्येत्यादिकंवचनंभविष्यत्येवगतमित्यर्थः १०० ॥ ॥

त्रिविधाज्ञा वसं घात्स्थित्याद्युक्तार्थेषु निसंमतिमाहात्म्य रावइति। वीरो महाबल आरब्धांतगामी वा। तएव इंद्रः परमैश्वर्यसंपन्नः परमात्मा अश्वरोवेस्थ्यतो सर्वेषु
वेदे श्रितिशेषः। किं कुर्वन् उग्रं उग्रं वीप्सायां द्विर्वचनं सर्वास्ताम सान् द्वेषिणो ज्ञावानित्यर्थः। दमयन् तमः शाययित्वा निरस्यन्नित्यर्थः। पुनः किं कुर्वन् अप्रमत्ते
भ्यसुग्नेभ्योत्यान्त्यात्विकान् ज्ञानात्मोऽप्ययोग्यानिति तेन नीयमानः आर्तपतस्ता वैकुंठादिस्थानं अतिशयेन नयन्नित्यर्थः। कुतो यं नियमः यतोयमिंद्र एधमानद्विद
स्वरूपातिक्रममभिकृतो द्वेषा। कुत एतत् उभयस्य देववर्गस्यासुरवर्गस्य च राजा नियामकः। तथा मनुष्यान् मनुष्यरूपान् विप्रान् प्रजारूपान् ज्ञावान् चोष्कूयते उ
नः पुनर्भूर्नरकस्वर्गेषु परिभ्रमयत्यभ्रमयति। ननु कदापि तमः शापयति क्रौर्यवानयतामर्थः ११ एधमानद्विडित्युक्तं विवृणोति उत्तरमंत्रेण। इंद्रः सर्वेषां उग्रशाद्रो
ज्ञानानां मोयोग्यानां सख्यासख्यानि हित्वा चरणानि पराहरणाक्ति न स्वाकरोतामर्थः। तथा अपरेभिः अन्यशाद्यैक्लैः सुक्तियोग्यैः सह सख्यानि वितर्तुराणास्वरमो

म्रावेवीर उग्रमुग्रैर्दमायन्नन्यमतिनेनीयमानः। एधमानद्विडुभयस्य राजा चोष्कूयते विश इंद्रो मनुष्यान् ११ परा सर्वेषां सख्या हरणांक्ति विनर्तुराणो अपरेभि
रेति। अनानुभूता रवक्षत्वानः प्रवीरिंद्रः शरदश्चतराणि १२ तमेवं विद्वानमृत इह भवति नान्यः पंथा अयनाय विद्यते। तमेवं विदित्वातिमृत्युमेति नान्यः पंथा विद्य
ते अयनाय १३ यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ। तस्यैते कथिता ह्यर्थाः प्रकाशंते महात्मनः १४ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥

राणः सन् एतानि तेषां सख्यानि स्वीकरोतीत्यर्थः। तथा अनानुभूताः सम्यगनुभवयोग्यताशून्यान् मिथ्याज्ञानान्मध्ये तनान् अवक्षत्वानो तस्कादिशापयन् सर्वाः शर
दः अतीतानंतसंवत्सरान् उत्तराणि अतिशयेन तारितवान्। उत्तरत्रापि एवं तरिष्यति। ननु कदापि वृत्रासे करिष्यतीत्यर्थः १२ विमुक्तिर्विद्यया तथेत्युक्तं श्रुत्यापि समर्थ्यते।
तमिति। तं पुरुषमेवं सहस्रशीर्षत्वादिना विद्वान् मृतो मुक्तो भवति ननु अयनाय मोक्षायान्यः पंथा विद्यत इत्यर्थः। तं एवमुक्तरूपं विदित्वा ज्ञात्वा मृत्युं संसारमत्येति अति
क्रांतो भवति। ननु संसारतरणायान्यो मार्गोस्तीत्यर्थः १३ भक्त्यैव मोक्ष इत्युक्तं श्रुत्योपपादयति। यस्येति। यस्य महात्मनो विकारिणो देवे हरौ परा उत्कृष्टा भक्ति
रस्ति तस्योत्कृष्टत्वात्। यथोत्कृष्टत्वानतिक्रमेण देवे भक्तिस्तथा स्वरूपानतिक्रमेण गुरौ भक्तिर्यस्यास्ति तस्यैते पूर्वोक्ताः शमादयोऽर्थाः मोक्षसाधनत्वेन कथि
ताः प्रकाशंते। ननु भक्तिं विनेत्यर्थः १४

तेत्रै वस्नु संतरं पठंति। तमिति।४

स्हृढः२

यतोखिलानिशमदमादीनि भक्त्यर्थानि भक्तिफलकानि भक्तिस्तु केवला मोक्षाय भवतीत्यर्थः। मोक्षार्थं भक्तिश्चेन्मोक्षानंतरं किं भक्त्येत्यत आह मुक्तानामपीति
मोक्षात्प्राक् साधनरूपा भक्तिर्मोक्षानंतरं फलरूपा च तिष्ठतीत्यर्थः १५ ज्ञानपूर्वः माहात्म्यज्ञानपूर्वः परः सर्वोत्कृष्टो नित्यः स्नेहो भक्तिर्न पदार्थांतरमित्यर्थः।
अतो नित्यानंदरूपत्वमुक्तं युक्तमिति भावः। तमेवमित्यद्युक्तमुपसंहरति। इत्यादीति। इत्युदाहृतवचनं आदिर्यस्य तदित्यादि वेदवचनं साधनप्रविधाय
कं साधनविधायकं साधनविधायकमस्तीत्यर्थः १६ सर्वसाधनेषु भक्तेः प्राधान्यं पुराणांतरवचनैरपि दर्शयति। निःशेषेत्यादिना। हे हरे ते अभक्तो निः
शेषधर्मकर्त्रापि सर्वधर्मानुष्ठातापि सदा नरके तिष्ठति भक्तश्चेद्ब्रह्महापि विमुच्यते। तस्माद्दोषादिति शेषः १७ हे अच्युत तव भक्तैरधर्मः कृतोपि धर्मो भव

छ

भक्त्यर्थान्यखिलान्येव भक्तिर्मोक्षाय केवला। मुक्तानामपि भक्तिर्हि नित्यानंदस्वरूपिणी। १५ ज्ञानपूर्वः परः स्नेहो नित्यो भक्तिरितीर्यते। इत्यादिवे
देवचनं साधनप्रविधायकं १६ निःशेषधर्मकर्त्राप्यभक्तो नरके हरे। सदा तिष्ठति भक्तश्चेद्ब्रह्महापि विमुच्यते १७ धर्मो भवत्यधर्मोपि कृतो भक्तैस्त
वाच्युत। पापं भवति धर्मोपि यो न भक्तैः कृतो हरे १८ भक्त्या त्वनन्यया शक्य अहमेवंविधोर्जुन। ज्ञातुं द्रष्टुं च तत्वेन प्रवेष्टुं च परंतप १९ ॥ ॥

ति लोकदृष्ट्या अधर्मत्वेन प्रतीयमानोपि धर्म एवेति भावः। न भक्तैरित्येकं पदं निषेधार्थकनसमासोयं न तु नञ्समासः। अतो नस्य लोपाभावः। तथा च अभ
क्तैरित्यर्थः। यो धर्मोपि कृतः स पापं भवति। लोकदृष्ट्या धर्मत्वेन प्रतीयमानोपि भक्तिराहित्येन पापमेव भवतीति भावः १८ परंतप हे अर्जुन एवंविधोहं अ
नन्यया अन्येषु रमाब्रह्मादिषु एवम् अविद्यमानया भक्त्या तत्वेन यथार्थरूपेण ज्ञातुं तथा त्वेन द्रष्टुं साक्षात्कर्तुं तदनंतरं प्रवेष्टुं च शक्यो भवामीत्यर्थः। तत्र भक्तेः
ज्ञानघटितत्वेन ज्ञानेनैव मोक्षो भक्तिर्मोक्षाय केवलेत्यनयोर्न विरोध इति ज्ञातव्यं १९

ननुभक्तेर्मोक्षस्यवरमकारणत्वमुक्तंकिंपुनरंधंतमसःकारणमित्यतआह।अनादीति।यथादेवाअनादिभक्ताःएवंदैत्याअनादिद्वेषिणः।यथाभक्तिर्विष्णोर्विव
र्धितामुक्तिंप्रापयति।एवंविष्णोर्द्वेषोविवर्धितोंऽतेकल्पावसानेदैत्यानंधंतमसिपातयतीत्यर्थः ११० यथाचशरीरानंदस्वरूपिणाभक्तिर्मुक्तावतिष्ठति।एवंशरीरस्व
रूपदुःखात्मकःअनंतःसएवयःपूर्वंविवर्धितद्वेषइत्यर्थः।अंधंतमसिपतितानांदैत्यानामवतिष्ठते।कथंभूतेंऽधंतमसिनिःशेषसुखवर्जिते।सर्वथासुखर
हितइत्यर्थः १११ यथाभक्तिःश्रवणादिनवविधलिंगगम्या।एवंद्वेषोपिजडावाभेदादिज्ञानरूपनवविधलिंगगम्यइत्याहजडावाभेदइत्यादिना
।अजडावाभेदादिशब्दैःस्वज्ञानानुपलक्ष्यंते।तदन्येषांतस्माद्विष्णोरन्येषांब्रह्मादीनांसाम्यंआधिक्यंचेतिद्वेषद्वयं।ततःहरेःरूपगुणाकर्मभेदः ११२

अनादिद्वेषिणोदैत्याविष्णौद्वेषो विवर्धितः।तमस्यंधेपातयतिदैत्यानंतेविनिश्चयात् ११० शरीरदुःखात्मकोद्वेषःसोऽनंतोह्यवतिष्ठते।पतितानांतमस्यं
धेनिःशेषसुखवर्जिते १११ जडावाभेदोनिर्गुणत्वमपूर्णगुणतातथा।साम्याधिक्येतदन्येषांभेदस्तद्गतएवच ११२ प्रादुर्भावविपर्यासस्तद्भक्तद्वे
षएवच।तत्प्रमाणस्यनिंदाचद्वेषाएतेखिलामताः ११३ एतैर्विहीनायाभक्तिःसाभक्तिरितिनिश्चिता।अनादिभक्तिर्देवानांक्रमाद्वृद्धिंगतेवसा

तथाप्रादुर्भावविपर्यासःअवतारस्यानवतारत्वंअनवतारस्यवतारत्वमित्यर्थः।तस्यविष्णोर्भक्तानांरमादीनांद्वेषःतस्यविष्णोःसर्वो(११४
त्तमत्वगुणपूर्णत्वादिप्रतिपादकप्रमाणस्यनिंदाकल्पितविषयत्वादिकल्पनंएतेजडावाभेदादयोनवापिअखिलाःप्रत्येकंद्वेषामताःसंमताःप्र
माणिकानामित्यर्थः ११३ भक्तिरपिएतेषांमध्येएकेनापिविहीनाचेत्सैवसद्भक्तिरितिनिश्चिता।केनापिविहीनानचेत्सद्भक्तिरेवेत्याह।ए
तैरिति।भक्तेःस्वविशेषरूपापरोक्षज्ञानद्वारामोक्षहेतुत्वमाह।अनादीति।ननुदानादीनांभक्तिसाधनत्वमुक्तंतद्युक्तंभक्तेःस्वरूपत्वेनानादि
त्वात्तदसाध्यत्वादित्यतोवाह।अनादीति।देवानांमुक्तियोग्यानामित्यर्थः।अनादिभक्तिःस्वरूपभूताभक्तिःक्रमाद्दानादिनावृद्धिंगताअभिव्यक्ता
सती ११४

ता॰टी॰ अपरोक्षदृशोर्भगवदपरोक्षज्ञानस्य हेतुर्भवति पुनरनंतरं सापरोक्षदृष्टिः सा भक्तिश्च मोक्षहेतुर्भवतीत्यर्थः। अत एव स्वस्वरूपेणावस्थानात्सैव भक्तिः
१९ नित्या सती मुक्तेषु आनंदस्वरूपिणी तिष्ठतीत्यर्थः ११५ ननु भक्तेः कथमानंदस्वरूपत्वमित्यत आह यथेति। यथा शौक्ल्यादिकं गवि विद्यमानं रूपं गोः
स्वरूपं भवति। विशेषवत्त्वेन चापर्यायशब्दवाच्यत्वं तथा सुखज्ञानादिकं भक्तेः रूपं नाम स्थानं ततोरिरिति क्रमित्यर्थः ११६ ननु तत्प्रापैव च मोक्ष
दुति भगवत्प्रसादेनैव मोक्ष इत्युक्तं तद्भक्तेर्मोक्षसाधनत्वं विरुद्धमित्यत आह। भक्त्यैवेति। विष्णुर्भक्त्यैव तुष्टिं प्रसादमभ्येति प्रसन्नो भवतीत्यर्थः। अन्ये
न केनापि कर्मादिनानेत्यर्थः। अतः स एव मुक्तिदाता तत्तुष्टौ भक्तिरेव कारणं प्रसादद्वारेति शेषः। भक्तेर्भगवत्प्राप्तिद्वारा मोक्षं प्रति साधनत्वमिति न वि

अपरोक्षदृशोर्हेतुर्मुक्तिहेतुश्च सा पुनः। सैवानंदस्वरूपेण नित्या मुक्तेषु तिष्ठति ११५ यथा शौक्ल्यादिकं रूपं गोर्भवत्येव सर्वदा। सुखज्ञानादिकं रूप
मेवं भक्तेर्न वान्यथा ११६ भक्त्यैव तुष्टिमभ्येति विष्णुर्नान्येन केनचित्। स एव मुक्तिदाता च भक्तिस्तत्रैव कारणं ११७ ब्रह्मादीनां च मुक्तानां तारतम्ये
तु कारणं। तारतम्यस्थिता नादिनित्या भक्तिर्न चेतरत् ११८ मानुषेष्वधमाः किंचिद्द्वेषयुक्ताः सदा हरौ। दुःखनिष्ठास्ततस्तेपि नित्यमेव न संशयः ११९

रोध इति भावः ११७ ब्रह्मादीनां मुक्तानां तारतम्येपि च भक्तिरेव कारणं कथमित्यत उक्तं तारतम्यस्थितेति। स्वयं तरतमभावेन मुक्तेषु अनादिनित्यत्वेन स्थि
ता भक्तिर्मुक्तानां तरतमभावे कारणं नेतरन्न कारणमित्यर्थः ११८ ननु देवानां भक्तिर्मोक्षहेतुर्दैत्यानां द्वेषस्तमोहेतुरित्युक्तं मनुष्याणां का गतिः किंच रामा
तत्साधनमित्यपेक्षायां मानुषानपि त्रेधा विभज्य तत्साधनान्याह। मानुषेष्विति। मानुषास्त्रिविधाः अधमा मध्यमा उत्तमाश्चेति। तत्र मानुषे १९
षु अधमा मानुषा हरौ सदा किंचिद्द्वेषयुक्ताः अल्पद्वेषयुक्ता युक्ता यतस्तेन कारणेन तेपि अधमा नित्यदुःखनिष्ठा मित्यनिरयजा प्रियोग्याः ११९

मध्यमास्तु मिश्रभूतत्वान्नित्यं मिश्रज्ञानित्वान्नित्यं सर्वदा मिश्रफलाः स्वर्गनरकमर्त्यप्राप्तिफलाः स्मृता इत्यर्थः । उत्तमास्तु षाहरो किंचिद्भक्तियुता अल्प
भक्तियुता यतस्तेन कारणेन तेपि मोक्षिणो मोक्षप्राप्तियोग्या इत्यर्थः । तथा चाधमानां तम एव गतिस्तत्साधनं द्वेषः मध्यमानां मिश्रफलप्राप्तिर्गतिस्त
त्साधनं मिश्रज्ञानं उत्तमानां मोक्षो गतिस्तत्साधनं भक्तिरेवेत्युक्तं भवति १२० तारतम्यस्थिता भक्तिर्ब्रह्मादीनां तारतम्ये कारणमित्युक्तं तत्स्पष्टयति
। ब्रह्मण इति । सर्वेभ्यो जीवेभ्यो ब्रह्मणः परमा उत्कृष्टा भक्तिर्यतस्ततः कारणात् ब्रह्मा सर्वेभ्यो जीवेभ्यः परम इत्यर्थः । निःशेषेपारम्पब्रह्मण इत्यंतनिवा

मध्यमा मिश्रभूतत्वान्नित्यं मिश्रफलाः स्मृताः । किंचिद्भक्तियुता नित्यमुत्तमास्तेन मोक्षिणः १२० ब्रह्मणः परमा
भक्तिः सर्वेभ्यः परमस्ततः । इत्यादीनि चक्यानि पुराणेषु पृथक् १२१ षण्णवत्यंगुलो यस्तु न्यग्रोधपरिमंडलः । स
प्तपादश्चतुर्हस्तो द्वात्रिंशल्लक्षणैर्युतः १२२

क्यानि तन्मत्कृतानीत्याह । इत्यादीनीति । न केवलं मयोक्तानि वाक्यानि पुराणस्थानि किंचित्पादीनि च वाक्यानि पुराणेषु पृथक्पृथक् संतीत्यर्थः १२१
ननु यथा देवे तथा गुरौ इत्युक्तं तत्र कः सर्वेषां गुरुः किं तस्य लक्षणमित्यपेक्षायां तल्लक्षणं तावदाह । षण्णवत्यंगुल इत्यादिना । यस्तु षण्णवत्यंगु
लः षडुत्तरनवतिसंख्याकस्वांगुल्यवच्छेद्यप्रमाणपरिमितदीर्घपरिमाण इत्यर्थः । तथा न्यग्रोधपरिमंडलः स्वबाहुद्वयपरिमितदैर्घ्यः । तथा सप्तपादः
स्वसप्तपादावच्छेद्यदेशपरिमितदीर्घपरिमाणः । तथा चतुर्हस्तः स्वचतुर्हस्तावच्छेद्यदेशपरिमितदीर्घपरिमाणस्तथा द्वात्रिंशल्लक्षणैर्युतः १२२

तथातत्वेषुस्वयमसंशयःसंशयरहितः।तथाशिष्याणांतत्वविषयसंशयछेत्तासमनाषिभिःपंडितैर्गुरुरुक्तइत्यर्थः।अथद्वात्रिंशल्लक्षणानिचैतानि।त
थाहिभुजनेत्रहनुजानुनासास्थानेषुपंचदैर्घ्याणि।तथात्वक्केशांगुलिदंतांगुलिपर्वसुपंचसौक्ष्म्याणि।तथापाणितलहृदयेपादतलहृदयेनेत्रांतेतालु
स्थानेजिह्वायामधरोष्टेनखेषुचेतिसप्तस्थानेषुसप्तरक्तत्वानि।तथावक्षःकुक्ष्यलकस्कंधकरवक्त्रेषुषट्सुस्थानेषुऔन्नत्यानिषट्।तथाललाटक
टिवक्षःसुत्रिषुस्थानेषुत्राणिपृथुत्वानि।तथाजंघायांग्रीवायांमेहनेचत्राणिह्रस्वत्वानि।तथास्वरसत्वनाभिषुत्रिषुस्थानेषुत्राणिगंभीरत्वानि।इतिद्वात्रिं
शल्लक्षणानि।तथाचोक्तंलक्षणग्रंथे।पंचदीर्घःपंचसूक्ष्मःसप्तरक्तःषडुन्नतः।त्रिपृथुर्लघुर्गंभीरोद्वात्रिंशल्लक्षणस्त्वितिइत्यादि।यस्मादेतद्गुरुल

असंशयःसंशयछिद्गुरुरुक्तोमनाषिभिः।तस्माद्बुद्धागुरुर्मुख्यःसर्वेषामेवसर्वदा १२३ अन्येपिस्वात्मनो
मुख्याःक्रमाद्गुरवईरिताः।क्रमाल्लक्षणहीनाश्चलक्ष्मालक्ष्णोःसमाः १२४ ॥ ॥ ॥ ॥ ॥

क्षणांचतुर्मुखएवमुख्यंतस्मात्कारणात्सर्वेषांशेषादीनांसर्वदासंसारेमुक्तेश्चबुद्धस्त्वेवमुख्योगुरुरित्यर्थः १२३ ननुतर्हिचतुर्मुखएवमुख्यगुरुश्चेदन्येषांगुरुत्वे
नास्त्येवेतिप्रतीयतइत्यतआहान्येपीति।चतुर्मुखादन्येशेषादयोमनुष्यांतमपर्यंताःस्वात्मनोमुख्याःक्रमाद्गुरवईरिताःपंडितैरित्यर्थः।ननूक्तलक्ष रामा
णानिचेत्सर्वेषुसंतिकथंतदातारतम्येनगुरुत्वमित्यतस्तदेवनास्तीत्याहक्रमादिति।चतुर्मुखापेक्षयाशेषेकिंचिल्लक्षणान्यूनत्वंतदपेक्षयेंद्रइ
त्यादिप्रकारेणक्रमाल्लक्षणहीनाः।अतःक्रमाद्गुरवइत्यर्थः।तर्हिमध्यममानुषेषुकथमित्यतआह।लक्ष्मालक्ष्णोरिति।मध्यममानुषाल
क्ष्णोःकतिपयैर्लक्षणैर्दुर्लक्ष्णोस्तत्तमसंख्याकैःसमाइत्यर्थः १२४ ॥ ॥ ॥ १०

दसा

यथासम्यङ्ज्ञानसंपन्नोब्रह्माएवंसम्यग्दुर्लक्षणायुतःकल्लिस्तस्मादेवसर्वेभ्योसुरेभ्योधिकःएवंदुर्लक्षणतारतम्येनासुरेषुमनुष्याधमांतेषुतारतम्यंद्रष्ट
व्यमित्याहासम्यगिति।देवताप्रसादस्यगुरुप्रसा दसाध्यत्वाद्देवतापूजावद्गुरुपूजादिकंर्तव्यमितिवक्तुंमोक्षसाधनज्ञानस्यगुरुप्रसाध्यत्वेन्वयव्यतिरेकावाह।
सम्यङ्ज्ञयोति।पूर्वोक्तलक्षणयोःसम्यक्संपूर्णतयासंपन्न :सुप्रसन्नधीःसम्यक्प्रसन्नबुद्धिः १२५ शिष्यायैज्ञानादिकंदद्यात्तत्सर्वंसत्यंमोक्षाख्यफलज
नकंभवतीत्यर्थः।ननुस्वप्रसादद्वारागुरुरेवमोक्षप्रदःकिमित्यपेक्षायामाह अगम्यत्वादिति।गुरुद्वारमंतरेणहरेरगम्यत्वात्तस्मिन्गुरौआविष्टःसन्निहितो
हरिर्मुक्तिदोभवेत्।तथाचहरेःसकाशान्मोक्षप्राप्तौगुरुर्द्वारमितिभावः १२६ एवंमोक्षस्यगुरुप्र सादसाध्यत्वेऽन्वयमभिधायतद्व्यतिरेकमाह।ना

मानुषामध्यमासम्यक्दुर्लक्षणायुतःकलिः।सम्यग्लक्षणसंपन्नोयद्दद्यात्सुप्रसन्नधीः १२५ शिष्यायसत्यंभवतितत्सर्वंनात्रसंशयः।
अगम्यत्वाद्धरिस्तस्मिन्नाविष्टोमुक्तिदोभवेत् १२६ नातिप्रसन्नहृदयोयद्दद्याद्गुरुरप्यसौ।नतत्सत्यंभवेत्तस्मादर्चनीयोगुरुःसदा
१२७ स्थावराणांगुरुत्वंतुभवेत्कारणतःक्वचित्।मर्यादार्थंतेपिशूद्रपाततुयद्वत्परोगुरुः १२८ ॥ ॥ ॥ ॥ ॥ ॥

तिप्रसन्नेति।अशेषपूर्वोक्तलक्षणसंपन्नोगुरुरपिनातिप्रसन्नहृदयअत्यंतप्रसन्नबुद्धिरहितःसशिष्याययद्दद्यात्तत्सत्यंनभवेत्फलजनकंनभवेन्नयस्मात्
स्माद्गुरुप्रसादार्थंसदागुरुरर्चनीयइत्यर्थः १२७ नन्वस्मेपिस्वात्मतेसुरमाइमत्रस्वापेक्षयागुणाधिकत्वंगुरुत्वेप्रयोजकमुक्तंतर्हिवयोज्येष्ठत्वादिमात्रेण
वाएकदेशोपदेशकर्तृत्वेनावायद्गुरुत्वंतन्न स्यादित्यतआह।स्थावराणामिति।स्वापेक्षयाज्ञानादिरहितानांक्वचित्कारणतःवयोज्येष्ठत्वादिनागुरु
त्वंभवेन्मर्यादार्थंलोकमर्यादार्थंतेपिस्थावराअपिगुरुत्वप्राप्ताःपूज्याः।नतुपरोगुरुर्मुख्योगुरुःस्वापेक्षयामुख्योगुणाधिकोगुरुर्यद्वत्तयथाशूद्रपत्न
यानशूद्रपाइत्यर्थः १२८

ता·टी· प्रसवत्यंगुल्यइत्यादिकं तस्य कयोलकल्पितमित्याह । इत्येतदिति । एतद्वचनजातं पंचरात्रोक्तं तथान्येषु पुराणेषु अनुमोदितं संप्रतिपन्नमित्यर्थः । ननु तदा मु
२१ क्तिस्तदेवानां यदा प्रत्यङ्गो हरिरित्यादिना अपरोक्षज्ञानानंतरमेव मोक्षो भवतीत्युक्तं तदनुपपन्नं ज्ञानात्पूर्वं कृतानामपश्चात्करिष्यमाणानामनेकेषां कर्मणां
प्रतिबंधकत्वेन विद्यमानत्वादित्यत आह । यदेति । मुक्तिप्रदानाय व्यक्तीकृतं स्वयोग्यं हरेर्बिंबरूपं जीवः पश्यति यदा १२९ तदा नस्य प्रयतो जीवस्य पू
र्वाणि ज्ञानात्पूर्वं कृतानि सर्वपापानि अनिष्टपुण्यानि च भस्मसात् यांति भस्मी भवंति संचितानि सर्वाणि फलमदत्त्वैव लयं यांतीत्यर्थः । उत्तराणि अ
परोक्षज्ञानानंतरकृतानि अनिष्टपुण्यपापरूपाणि कर्माणि न श्लेषं यांति न लिंपंतीत्यर्थः । कानिचिदनिष्टान्येवेत्यर्थः । ज्ञानिकृतेष्टकर्मणामानंदादि

इत्येतत्पंचरात्रोक्तं पुराणेष्वनुमोदितं । यदा मुक्तिप्रदानाय स्वयोग्यं प्रपश्यति ध्रुवं १२९ रूपं हरेस्तदा तस्य सर्वपापानि भस्मसात् यांति पू
र्वाण्युत्तराणि न श्लेषं यांति कानिचित् १३० मोक्षश्च नियतस्तस्मात्स्वयोग्यहरिदर्शने । भविष्यत्पर्ववचनमित्येतत्सूत्रगं तथा १३१ ॥

वृद्ध्यर्थत्वादिति भावः १३१ तस्मात्स्वसंचितानां नाशादुत्तरेषामश्लेषात्प्रारब्धकर्मणां भोगेन क्षयात्प्रतिबंधकाभावे सति स्वयोग्यहरिदर्शने मोक्षो नि
यत एवेत्याह । मोक्षश्च नियत इति । यदित्येतत्कुत्रस्थं वाक्यमित्यत आह । भविष्यत्पर्ववचनमित्येतदिति । सूत्रेष्वप्येतत्समर्थितमित्याह । सूत्रगमिति । ए
तत्प्रमेयं सूत्रगं ब्रह्मसूत्रे प्रतिपादितमित्यर्थः । तथा च ब्रह्मसूत्रं । तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशादिति । अस्यार्थः । तदधिगमे त रा·मा
स्य परब्रह्मणोऽधिगमे अपरोक्षे सति उत्तरपूर्वाघयोः अपरोक्षज्ञानोत्तराघस्य तत्पूर्वाघस्य चेत्यर्थः यथाक्रममश्लेषविनाशौ भवतः । उत्तरस्याश्ले २१
षः सर्वस्य विनाश इत्यर्थः । कुत इत्यपेक्षायां स्वोक्तार्थे श्रुतिं प्रमाणयति सूत्रकारः । तद्व्यपदेशादिति । तस्योक्तार्थस्य व्यपदेशाच्छ्रुतावित्यर्थः १३२

तामेवश्रुतिंभगवानाचार्योपिदर्शयति।श्रुतिश्चेति।तत्पराङ्मुक्तार्थेतात्पर्यवती।तद्यथेत्यादिश्रुतिश्चस्फुटंयथाभवतितथासदृष्टांतंतद्देवावदत्।तथाचाघ्ले
पविनाशप्रतिपादकश्रुतिद्वयंभाष्येभगवत्पादैरुदाहृतं।तद्यथापुष्करपलाशआपोनश्लिष्यंतएवमेवंविदिपापंकर्मनश्लिष्यतइति।तथातद्यथेषीकात
लमग्नौप्रोतंप्रदूयेतैवंहैवास्यसर्वेपाप्मानःप्रदूयंतइति।एवमपरोक्षज्ञानानंतरंमुक्तिनियमेमनुष्योत्तमादिब्रह्मांतानांमुक्तिप्रकारमाह।मुक्ता
इत्यादिना।संसारान्मुक्तामानुषामनुष्योत्तमाद्देवान्यांति।देवाश्चइंद्रंयांति।सइंद्रःशंकरंशेषंयाति १३१ सशेषोब्रह्माणंयाति।एवंक्रमेणैवस
र्वेब्रह्माणंप्राप्यतेनब्रह्मणासहैवहरिंयांतीत्यर्थः।एवंहरिंप्राप्तानांतेषांमुक्तावस्थितिप्रकारमाह।उत्तरोत्तरेति।रुद्रपुरःसराःशेषपुरःसरामुक्ताःस

श्रुतिश्चात्तत्परातद्वत्तद्यथेत्यपवत्स्फुटं।मुक्तास्तुमानुषाद्देवान्देवाइंद्रंसशंकरं १३२ सब्रह्माणंक्रमेणैवतेनयांत्यखिलाहरिं।उत्तरोत्तरवश्याश्च
मुक्तारुद्रपुरःसराः १३३ निर्दोषानित्यसुखिनःपुनरावृत्तिवर्जिताः।स्वेच्छयैवरमंत्यत्रनानिष्टंतेषुकिंचन १३४ असुराःकलिपर्यंताःएवंदुःखोत्त
रोत्तराः।कलिर्दुःखाधिकस्तेषुतेप्येवंब्रह्मवत्सुराः १३५

स्वोत्तमवशास्थिताइत्यर्थः १३३ नतुतत्रपराधीनत्वेक्लेशःस्यादित्यतआह।निर्दोषाइति।मात्सर्यादिदोषरहिताः।अतएवनित्यसुखिनःपुनःसंसारवृ
त्तिरहिताःसंतःस्वेच्छयैवात्रमुक्तौरमंते।तस्मात्तेष्वनिष्टंदुःखंकिंचननास्तीत्यर्थः १३४ मुक्तियोग्यपेक्षयाकंप्रकारंतमोयोग्येष्वप्यतिदिशति।असुराइत्या
दिना।मनुष्योत्तममारभ्यचतुर्मुखपर्यंतंयथासुखोत्तराएवमसुराणांमनुष्याधममारभ्यकलिपर्यंतंदुःखोत्तरोत्तराः।यथाब्रह्मासर्वेभ्यःसुखाधिकःए
वमेतेष्वसुरेषुकलिर्दुःखाधिकः।यथाब्रह्मत्वयोग्याऋजवोनामगणाःसंति।एवंतेपिकलित्वयोग्यगणाःसंति १३५

आद्यन्यन्नस्य भगवान्सदा नारायणः प्रभुः । ऋग्यजुःसामाथर्वपञ्चरात्रेतिहासतः । पुराणोक्तस्तथान्योपि ॥ ३ ॥ स्रोक्तोनिर्णो
निर्णयः कृतः १३८ । विष्ण्वाज्ञयैव विदुषा तत्प्रसादबलोन्नतेः । आनन्दतीर्थमुनिना पूर्णप्रज्ञाभिधायुजा ॥ १३९ ॥

ता.टी. २२ यथा चतुर्मुखेन्द्रादिपदयोग्यगणाः स्थिताः सन्ति तथान्येप्यसुराः सर्वगुणायोग्यतया संतीत्यर्थः । न केवलं ब्रह्मा सुखाधिकः किंतु सदा सर्वगुणोर्ज्ञानभक्त्या
दिकैरधिकः । न केवलं संसारे सर्वप्राणाधिपत्ये स्थितः किंतु मुक्तोपि सर्वमुक्तानामाधिपत्ये निषित इत्याह ब्रह्मैवेति । सर्वगुणाधिको ब्रह्मैवेत्यर्थः १३६
तर्हि विष्णुरपि व्याव[र्त्य] इति प्राप्ते मतमाह । आश्रय इति । तस्य ब्रह्मणो भगवान्नारायणः सदा संसारे मुक्तौ चाश्रय इत्यर्थः । नन्न हेतुः प्रभुरिति १३७ अर्थोय
मेव निखिलैरपि वेदवाक्यैरित्यादिना कृतं निर्णयमुपसंहरति । इतीति । इति उक्तरीत्या शास्त्रेभ्यो निर्णयः कृत इति संबंधः । शास्त्रशब्दं विवरणे ऋगृयजु
रित्यादि । इतिहासो भारतं पंचम्यर्थे तसिः अन्येभ्यो ब्रह्माण्डादिभ्यः ॥ १३८ ननु केनायं निर्णयः कृतः किमर्थं च कृतः किं च तत्करणे सामर्थ्यमित्य
तथान्येप्यसुराः सर्वेगुणायोग्यतया सदा । ब्रह्मैव सर्वतो येभ्यः सदा सर्वगुणाधिकः । मुक्तोपि सर्वमुक्तानामाधिपत्ये स्थितः सदा ।
स्तुतिप्रीततत्परात्मा हृद्यशयेप्यवदत्स्फुटम् । मुक्तास्तु मानुषादिब्रह्मान्ते वा इन्द्रसशङ्करः १३२ स ब्रह्माद्याः क्रमेणैव तेन यान्त्यखिलाहरिं तत्रान्तरवस्था
(स्तु मुक्ता रुद्रपुरःसराः १३३ निर्दोषा नित्यसुखिनः उत्तराद्विवर्जिताः । स्वेच्छयैव रमन्त्यत्र ना निष्टं तेषु किंचन १३४ असुराः कलिपर्य
(ताः एवं दुःखोत्तरोत्तरागाः । कलिर्दुःखाधिकस्तेषु ते प्येवं ब्रह्मवद्गुणाः १३५ ॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

तत्राह । विष्ण्वाज्ञयेति । केनेत्यस्योत्तरमानंदतीर्थमुनिनेति । स्वस्यैव नामांतरमाह । पूर्णप्रज्ञेति । पूर्णप्रज्ञेत्यभिधया नाम्ना युक्तेनेत्यर्थः । स्वस्वरूपज्ञा राम
नमप्यधिकारिणोमो ह्रासाधनमिति दर्शयितुं नामांतरं दर्शितं । किमर्थमित्यस्योत्तरं विष्ण्वाज्ञयेति । निर्णयकरणे किं सामर्थ्यमित्यस्योत्तरं विदुषेति २२
अनेन पूर्णप्रज्ञशब्दार्थो दर्शितः विद्वत्त्वमपि भगवत्प्रसादायत्तमित्याह । तत्प्रसादेति । तस्य भगवतः प्रसाद एव बलं तेन तस्योन्नतिरुत्कर्षस्तस्याः सकाशा
न्निर्णयः कृत इति संबंधः १३९

तच्च निर्णायः कृत इति कोर्थस्तत्यतस्तस्य तात्पर्यं दर्शयति। तात्पर्यमिति। शास्त्रादीनां ऋगादीनामुत्तमं तात्पर्यं महातात्पर्यं महातात्पर्यं विष्णोः
सर्वोत्तमत्वे इति शेषः। मयात्र्यानंदतीर्थेन प्रोक्तं। विष्णावन्यैवेत्येतद्विवृणोति। प्राप्येति। विष्णोर्नारायणस्य तदवतारभूतस्य व्यासस्य चे
त्यर्थः। नच किमर्थं विष्णोः सर्वोत्तमत्वे शास्त्राणां महातात्पर्यं प्रदर्शितं। तज्ज्ञानार्थमिति चेत्तज्ज्ञानमपि किमर्थं मोक्षार्थमिति चेत्तन्

तात्पर्यं शास्त्राणां सर्वेषामुत्तमं मयोक्तं प्रोक्तं। प्राप्याच्चत्तां विष्णोरेत ज्ञात्वैव विष्णुरा
प्योसौ १५०॥ ॥इति श्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महा॥ ॥
भारततात्पर्यनिर्णये सर्वशास्त्रार्थनिर्णयो नाम प्रथमोध्यायः॥ ॥ ॥

अन्यस्तानेनापि तत्संभवादित्यत आह। एतदिति। एतद्विष्णोः सर्वोत्तमत्वं ज्ञात्वैवासौ वैकुंठादिस्थानस्थितो विष्णुराप्यः प्राप्य इ
त्यर्थः। विष्णोः सर्वोत्तमत्वज्ञानमेव मोक्षसाधनं तदर्थं तत्रैवाशेषशास्त्रतात्पर्यप्रदर्शनरूपनिर्णयकरणं युक्तमिति भावः।
इत्यशेषमतिमंगलं १५०॥ ॥इति श्रीमन्महाभारततात्पर्यनिर्णये प्रथमोध्याय एवहि। आद्यः स्पष्टीकृतस्त्वावत्स्वात्ये माधव
मध्वयोः १ ॥इति श्रीमन्महाभारततात्पर्यनिर्णयटीकायां वरदराजाचार्यकृतायां प्रथमोध्यायः॥ १ ॥ ॥ ॥

॥ ॥श्रीनृसिंहायनमः॥ ॥एवंतावत्प्रथमाध्यायेभगवद्गुणोत्कर्ष एवाशेषशास्त्रतात्पर्यविषयभूतार्थइतिनिर्णीयेदानींविशेषतोशेषभार
तस्यापितात्पर्यविषयीभूतःसएवार्थइतिनिर्णेतुकामोभगवानाचार्योनारायणंस्वगुरुमितिभारतार्थसंग्राहकंतदाद्यश्लोकप्रतिपा
दितगुणावतत्याभारतप्रतिपाद्यंनारायणमभ्याख्यादौस्तौति। जयतीति। हरिर्नारायणोजयन्सुत्कर्षेणवर्तते। अत्रजयतेरुत्कर्षप्राप्त्य
र्थत्वेनाकर्मकत्वात्कर्मविवक्षिर्नदोषाय। तत्रभारताद्यश्लोकेविष्णुशब्देनपूर्णसंविद्गुणात्मकत्वेनसाकल्येनाचिंत्यत्वंलब्धंतदाह। अ
चिंत्यइति। सकललोकनमस्कृतंइत्यनेनअमरासुरसिद्धवंद्यमित्यनेनचमुक्तामुक्तगणावंद्यत्वमुक्तंतदाह। सर्वदेवैकवंद्यइति। स
र्वैर्मुक्तैरमुक्तैश्चदेवैर्मुख्यतयावंद्यइत्यर्थः। अनेनतत्कैमुत्यन्यायेनहरिप्रवणत्वमेवसर्वस्यइतिधर्मश्चोक्तंभवति। स्वगुरुमित्यनेन

॥ ॥श्रीवेदव्यासायनमः॥ ॥ॐजयतिहरिरचिंत्यःसर्वदेवैकवंद्यःपरमगुरुरभीष्टावाप्तिदःसज्ज
नानां। निखिलगुणगणार्णोनित्यनिर्मुक्तदोषःसरसिजनयनोसौश्रीपतिर्मानदोनः १ ॥ ॥

पद्मापद्मभवादीनांज्ञानप्रदत्वमुक्तंतदाह। परमगुरुरिति। गुरूणांगुरुरित्यर्थः। भवघ्नमित्यनेनमोक्षैकहेतुत्वमुक्तंतदाह। सज्जनानामभी
ष्टावाप्तिदइति। विष्णुशब्देनैवचोदारसंविद्गुणपूर्णत्वमुक्तंतदाह। निखिलगुणगणार्णइति। निखिलगुणानांगणएवार्णांसिजला
नियत्रासौतथोक्तः। अनेनानंतगुणसमुद्रत्वंलभ्यते। नैर्गुण्यवर्जितमित्यनेननिर्दोषत्वमुक्तंतदाह। नित्यनिर्मुक्तदोषइति। नित्यंनिर्मु
क्तानिर्गतादोषायस्मादसौतथोक्तः। भक्तप्रियमितिअनेनभक्तैर्वशप्यत्वमुक्तंतदाह। नोस्माकंमानदइति। जगदेकनाथमित्यस्या
र्थंकैमुत्येनाह। श्रीपतिरिति। अजशब्दमहिम्नाजननराहित्येननित्याप्राकृतकल्याणदेहत्वंलब्धंतदाह। सरसिजनयनइति १॥

एवं हरिस्तुत्या श्रोतृबुद्ध्युत्फुल्लनाय पूर्वाध्यायार्थमनुवदन् स्वात्संगत्यैव नैतदध्याये चिकीर्षितं प्रतिजानीते। उक्त इति। ऋगादिशास्त्राणां वि-
ष्णोः सर्वपुराणोत्त्वादावेव महातात्पर्यमिति पूर्वाध्याये निर्णय उक्तः। अथानंतरं भारतवाक्यानामपि तत्रैव तात्पर्यमिति भारतोपक्रमो-
पसंहारमध्यस्थैर्लिंगैस्तैस्तैर्वाक्यैर्निर्णयः क्रियत इत्यर्थः। एतैरेव त्यस्पष्टस्ववचनैरिति वार्थः। अध्यवस्यंते निर्णीयंत इति यावत् २ ननु
भारतग्रंथपर्यालोचनया निर्णयः स्यात्किं तन्निर्णायकरणेनेत्यत आह। क्वचिदिति। केचिद्दुष्टाः स्वपांडित्यप्रकटनाय स्वयं श्लोकान्विरच-

उक्तः पूर्वोऽध्याये शास्त्राणां निर्णयः परोदितः। अथ भारतवाक्यान्येतैरेवाध्यवस्यंते २
क्वचिद्ग्रंथान्प्रक्षिपंति क्वचिदंतरितानपि। कुर्युः क्वचिच्च व्यत्यासं प्रमादात्क्वचिदन्यथा
३ अनुत्सन्ना अपि ग्रंथा व्याकुला इति सर्वशः। उत्सन्नाः प्रायशः सर्वे कोट्यंशोऽपि न
वर्तते ४ ॥

यित्वा क्वचित्प्रदेशे प्रक्षिपंति प्रवेशयंति। क्वचिद्देशे विद्यमानानेव ग्रंथांस्तदर्थबोधसामर्थ्येन वा विस्तरत्वर्णसहिष्णुत्वेन वा अंतरि-
तान् उत्सन्नान्कुर्युः। ततः प्रदेशात् ग्रंथान्निष्कासिता इति भावः। क्वच प्रदेशे व्यत्यासं पूर्वोक्तस्योत्तरत्र प्रक्षेपमुत्तरत्रोक्तस्य पूर्वत्र प्र-
क्षेपं च कुर्युरित्यर्थः। क्वचित्प्रमादाद्भ्रांत्या अन्यथा पाठांतरं कुर्युरित्यर्थः ३ एवमनुत्सन्नानामिदानीं विद्यमानानामपीयं स्थितिः।
उत्सन्नानां तु का कथेत्याह। अनुत्सन्ना अपीति। इति क्वचिद्ग्रंथानित्याद्युक्तप्रकारेण व्याकुला निर्णयाजनकाः। प्रायशः बाहु-
ल्येन। तस्माद्यावत्स्थितो ग्रंथः कोट्यंशोऽपि बहुतांशो पि न वर्तते ४ ॥

ता०टी०
२४

एवंशब्दात एवव्यत्यासे यथावस्थितं भारतं देवदुर्गमार्थं। व्यत्यासे त्ववस्थायामर्थनिर्णयजनकं तु भवतीति किमुवाच्यमित्याशयेनाह। ग्रंथोप्ये
वमिति। एवमुक्तरीत्या विखलितः निर्णयजनकः। यथा च स्थितावस्थायां देवदुर्गमो देवानां दुरधिगमो भारतार्थो व्यत्यासावस्थायां विख
लितः निर्णेतुमशक्य इति किमु वक्तव्यमित्यर्थः। अतो निर्णायककरणाप्रसक्तेः सद्भावाद्धरिणा प्रेरितो हं निर्णयान्वच्मीत्याह। कलाविति
एवमुक्तप्रकारेण कलौ कलियुगे शब्दतो र्थतश्च भारते व्याकुलिते सति तन्निर्णयाय ५ हरिणा श्रीवेदव्यासेन प्रचोदितः प्रेरितो हं नि
र्णयान्वच्मीत्यर्थः। ननु तु व्यत्यासे कथं तवापि निर्णयाभिधाने शक्तिरित्यत उक्तं विजानन्निति निर्णयानित्येतदत्रापि संबध्यते। तस्य श्री
वेदव्यासस्य हरेः प्रसादात्तव्यत्यस्तग्रंथपर्यालोचनाभावे पि निर्णयान्स्वत एव विजानन्नित्यर्थः। न केवलं स्वयं प्रतिभातया परत्वेन

ग्रंथो प्येवं विखलितः किमु अर्थो दिवदुर्गमः। कलावेवं व्याकुलिते निर्णयाय प्रचोदितः ५ हरिणा निर्णयान्वच्मि विजानंस्तत्प्रसाद
तः। शास्त्रांतराणि संजानन्वेदांश्चास्य प्रसादतः ६ देशे देशे तथा ग्रंथान्दृष्ट्वा चैव पृथग्विधान्। यथा स भगवान्व्यासः
साक्षान्नारायणः प्रभुः ७ जगाद भारताद्येषु तथा वक्ष्ये तदीक्षया संक्षेपात्सर्वशास्त्रार्थं भारतार्थानुसारतः ८ ॥

निर्णयान्जानामि किंतर्हि अव्युत्पन्नभारताद्यशेषग्रंथपर्यालोचनमपि तत्प्रसादादेवास्तीत्याह। शास्त्रांतराणीत्यादिना। अव्युत्पन्नभा
रतापेक्षया शास्त्रांतराणि वेदांश्चास्य प्रसादतः सम्यग्जानन् ६ न केवलमेतावन्न देशे देशे बदरिकाश्रमादिषु नाय महंति बुद्ध्यावस्थि
तं तत्र भागवतादिनिर्णायकग्रंथदर्शनमपि ममास्तीत्याह देशे देश इति। पृथग्विधान्नानाप्रकारान्निर्णया अपि भगवदभिप्रायव्याख्या
एव क्रियंत इत्याह। यथा स इति ७ भारताद्येषु यथा येन प्रकारेण जगाद तथैव तदीक्षया तस्य भगवतो व्यासस्येच्छया वक्ष्ये निर्णयानि
ति शेषः। न केवलं भारतार्थ एवोच्यते किंतु निर्णीतार्थभारतार्थानुसारेण सर्वशास्त्रार्थो प्यभिधीयत इत्याह संक्षेपादिति। ननु कथं सर्वशा
स्त्रार्थाभिधानमल्पेन ग्रंथेनेत्यत उक्तं संक्षेपादिति ८ ॥

राम
२४

ननु भारतार्थानुसारेण सर्वशास्त्रार्थाभिधानं तत्कुत इत्यत आह। निर्णय इति। भारतं सर्वशास्त्राणां निर्णयः। निर्णीयते ऽनेनेति निर्णयः कारणो
परिकीर्तितं। पुराणे ऽपीति शेषः। अतः सर्वशास्त्रनिर्णायकत्वेन सर्वशास्त्रोत्तमत्वात्तदनुसारेण सर्वशास्त्रार्थाभिधानं युक्तमिति भा
वः। इतो ऽपि सर्वशास्त्रोत्तमत्वात्तदनुसारेणैव निर्णयकरणमिति भावेनाह। भारतं सर्ववेदाश्चेत्यादिना। वेद्यन्त इति वेदाः सर्वशास्त्रा
णि ९ व्यासस्याज्ञयैव ऋषिभिः समन्वितैर्ब्रह्मादिभिर्देवैर्भारतमेकतः सर्वशास्त्राण्येकतश्चेति तुलामारोपिताः। अत्र भारतादेस्तु
लारोपणं नाम तत्त्वतिनिधिमणयाद्यारोपणं। एवं तुलारोपणे कृते सति तत्त्वतयोर्मध्ये भारतं भारतप्रतिनिधिहतो मणिभारतमतिरिच्यत
भारेणाधिको ऽभूत्। तथा च शब्देन भारतस्यातिरेकहेतुभूतविशेषमाह। अतः सर्वशास्त्रोत्तमं भारतमिति भावः १० महाभारतशब्द

निर्णयः सर्वशास्त्राणां भारतं परिकीर्तितं। भारतं सर्ववेदाश्च तुलामारोपिताः पुरा ९ देवैर्ब्रह्मादिभिः सर्वैर्ऋषिभिश्च समन्वि
तैः। व्यासस्यैवाज्ञया तत्र त्वत्यरिच्यत भारतं १० महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते। निरुक्तमस्य यो वेद सर्वपापैः प्रमु
च्यते ११ निर्णयः सर्वशास्त्राणां सदृष्टान्तो हि भारते। कृतो विष्णुवशत्वं हि ब्रह्मादीनां प्रकाशितं। यतः कृष्णवशे सर्वे भीमा
द्याः सात्वगामिनः १२ ॥

पर्यालोचनयाप्ययमर्थोऽवसीयत इत्याह। महत्त्वादिति। महत्त्वान्नत एव भारेण ततत्वादित्यर्थः। इदमतिरिच्यतेत्यनेनापि सव्यक्तं। भारत
शब्दनिर्वचनज्ञानमात्रेण सर्वपापक्षयश्रवणादपि भारतस्य सर्वशास्त्रोत्तमत्वं ज्ञायत इत्याह। निरुक्तमिति। अस्य भारतशब्दस्य नि
रुक्तमुक्तरीत्या निर्वचनं ११ निर्णयः सर्वशास्त्राणामिति भारतस्य सर्वशास्त्रनिर्णायकत्वमुक्तं तद्दर्शयति। निर्णय इति। निर्णय इ
ति। हि यस्माद्भारते सर्वशास्त्राणां निर्णयः सदृष्टान्तः निदर्शनसहितः कृतस्तस्मान्निर्णायकत्वमित्यर्थः। कः शास्त्रनिर्णयः कथं च सदृष्टा
न्तः कृत इत्यत आह। विष्णुवशत्वं हीति। ब्रह्मादीनां विष्णुवशत्वं सर्वशास्त्रनिर्णीतोऽर्थः। तद्भारते भीमादीनां कृष्णवशत्वकथनेन प्र
काशितं। कृष्णस्य विष्णुत्वाद्भीमादीनां च ब्रह्मादित्वादित्यर्थः १२ ॥

अन्योपि शास्त्रार्थो भारते सदृष्टांतैरीरित इत्याह। सर्वेषामिति। सर्वेषां ब्रह्मादीनां ज्ञानदाता यशोदातेति च विष्णुरीरितः। यस्मात्कारणाद्व्यास
स्वरूपेण विष्णुस्तेषां ब्रह्मरुद्रादिरूपिणां भीमादीनां भारते यशः कृतवान् उक्तवान्। यस्माच्च तेनैव रूपेण ब्रह्मरुद्रादिरूपिणां शुकादी
नां ज्ञानदश्च तस्मादिति पूर्वेणान्वयः। ब्रह्मरुद्रादिरूपिणां शुकादीनामिति तेषामानाधिकरण्यं च शुके वायोरावेशसद्भावादुपपन्नं २४
विष्णोः स्वातंत्र्यमितरेषां तदधीनत्वमित्येव निर्णयः सदृष्टांतः उक्त इत्यभिहितं इदानीं ब्रह्मादीनां तारतम्यं च सदृष्टांतं निर्णीतमित्या
ह। ब्रह्माधिकश्चेति। ब्रह्मादेवेभ्यः शेषाद्रुद्रादप्यधिकः सर्वेभ्यः शेषरुद्रादिभ्यः सकाशाद्विष्णोः प्रियश्चेति भीमनिदर्शनान्निर्णीतमित्य
र्थः। ब्रह्मात्मकस्य भीमस्य भीमस्य शेषाद्यात्मकबलभद्राद्यपेक्षयाधिकत्वाद्विष्णोः प्रियत्वाच्चेति भावः २५ ननु भीमस्य सर्वाधिक्य

सर्वेषां ज्ञानदो विष्णुर्यशोदातेति चोदितः। यस्माद्व्यासात्मना तेषां भारते यशः कृतवान्। ज्ञानदश्च शुकादीनां ब्रह्मरुद्रादिरूपि
णां २४ ब्रह्माधिकश्च देवेभ्यः शेषाद्रुद्रादपीरितः। प्रियश्च विष्णोः सर्वेभ्य इति भीमनिदर्शनात् २५ न मारहारिणो विष्णोः प्रधानां
गं हि मारुतिः। मागधादिवधादेव द्यौ वनवधादपि २६ यो यएव बलज्येष्ठः देवत्रियेषु सत्तमः। अंगं चेद्विष्णुकार्येषु तदन्यैव च
नान्यथा २७ ॥ ॥

मेव कथं ज्ञातं येन तदाधिक्यं ब्रह्माधिक्ये निदर्शनं स्यादित्यत आह। न मारेति। न मारं हर्तुं शीलमस्यास्तीति। तथोक्तस्तस्य विष्णोर्मारुतिः
प्रधानांगं हि यस्मादितरापेक्षया भीमस्याधिक्यं ज्ञायत इत्यर्थः। ननु मारुतेः प्रधानांगत्वमेव कुतः सिद्धमित्यत आह। मागधादीति। अ
नन्यसाध्यजरासंधादिवधात् प्रधानांगत्वं सिद्धमित्यर्थः २६ ननु जरासंधादिवधाद्भीमस्य बलाधिक्ये सिद्धेपि भक्तिज्ञानाद्याधिक्यं क
थं ज्ञातमित्यतो बलाधिक्ये सिद्धे तेन भक्त्याद्याधिक्यमनुमेयमित्यपि प्रायेण तयोर्व्याप्तिमाह। यो यइति। देवावतारेषु देवत्रियेषु यो यो
बलज्येष्ठो बलेनाधिकः स एवोत्तमः भक्त्यादिनाप्यधिकः। आह्लतोऽप्याधिक्येऽन्यदेव निमित्तं वक्ष्यत इति तत्त्रियेष्वित्युक्तं। बलमपि विष्णु
भक्त्या न मारहरतो विष्णुकार्ये अंगं चेत् तदेव सर्वाधिक्यहेतुः न बलमात्रमित्याह। अंगं चेदिति। तच्च तद्विष्णोः कार्येषु तस्य विष्णोर्न तस्य
अंगं चेत्तदाधिक्यापादकं अन्यथा नैवाद्यमापकं बलमात्रस्य व्यभिचारादित्यर्थः २७

ननु तत्रापि व्यभिचारः अर्जुने अश्वत्थामापेक्षयोगमहत्तस्य बलस्य सद्भावेपि स्वरूपाधिक्याभावादित्याशंक्य तस्मिन्नंगमहत्ते बले स्वाभा
विकत्वं च विशेषणं देयमित्याह। बलं तं नैसर्गिकमिति। विशेषणव्यावर्त्यमाह। वरास्त्रादेरिति। आदिपदेनान्यावेशादिकं परिगृ
ह्यते। यत्तु वरास्त्रादेर्निमित्ताज्जातं तद्बलमन्यथा स्वरूपाधिक्ये कारणं न भवति। तदेवोपलक्षणतया स्पष्टं दर्शयति। अन्यावे
शो निमित्तं यस्य तत्तथा तद्गीशं चेद्बलं तर्हि अन्यात्मकं यस्यावेशः स आत्मा स्वामी यस्य तथा तदीयमिति यावत्। हि यस्मात्तस्मान्न व्यभिचा
र इत्यर्थः। अश्वत्थामापेक्षयार्जुनेधिकबलसद्भावेपि तद्बलं अन्यात्मकं नरांशसंयत्तिनिमित्तकत्वान्न स्वाभाविकं। स्वाभाविकत्वं च
बले विशेषणं दत्तमिति न व्यभिचार इति भावः १८ ननु क्षत्रियेष्विस्तुत्पादेनादिष्वन्यदेवाधिक्ये प्रयोजकं प्रतिभातीत्यत आह। दे
बलं नैसर्गिकं तच्च वरास्त्रादेस्तदन्यथा। अन्यावेशनिमित्तं चेद्बलमन्यात्मकं हि तत् १८ देवेष्वबलिनामेव भक्तिर्ज्ञानेन वा॥
न्यथा स एव च प्रियो विष्णोर्नान्यथा तु कथंचन १९ तस्माद्योयो बलज्येष्ठः सद्गुणज्येष्ठ उच्यते बलं हि क्षत्रियेव्यक्तं ज्ञा
यते स्थूलदृष्टिभिः २० ज्ञानादयो गुणा यस्मात्तज्ज्ञायंते सूक्ष्मदृष्टिभिः तस्माद्धत्रबलं तत्र विज्ञातव्या गुणाः परे २१
वेष्विति। देवेष्वपि बलमेवाधिक्ये प्रयोजकं नान्यदित्यर्थः। क्षत्रियेष्विति स्तुतिस्तु ब्राह्मणमात्रव्यावृत्त्यर्थं न तु देवव्यावृत्त्यर्थं क्षत्रि
याणामपि देवावतारत्वात् क्षत्रियपदं देवसंग्राहकमेव न तु व्यावर्तकमिति भावः। स एवेति यो बली स एव विष्णोः प्रिय इत्य
र्थः १९ तस्माद्व्यभिचाराभावात्सिद्धान्ताव्याप्तिरित्याह। तस्माद्य इति। ननु बलाधिक्यं भक्त्याद्याधिक्ये लिंगमिति ज्ञातः विपरी
तं किं न स्यादित्यत आह बलं हीति। हि यस्मात् स्थूलदृष्टिभिः पुरुषैर्बलं व्यक्तं स्पष्टं ज्ञायते २० ज्ञानादयस्तु सूक्ष्मदृष्टिभि
रेव ज्ञायंते न स्थूलदृष्टिभिरित्यतः सर्वेषां हेतुज्ञानसंभवादुक्तविषये बलिंगलिंगिभावो न वैपरीत्यमिति भावः। एवं व्याप्तिम
भिधायानुमानमाह तस्मादिति २१ ॥

ता॰टी॰ २६ तत्रपूर्वोक्तविशेषणविशिष्टस्यैवलिंगत्वात्क्वापिव्यभिचारस्तत्प्रतिपत्तेस्यात इत्तैवेत्यादिविवृणोति। देवेष्वेवेतितावद्दशबलंदेवेष्वेव
अन्येषुदैत्येषुनास्तिनचतथापिक्षत्रियेष्वितिविशेषणमनुपपन्नंतथात्वेद्रोणादीनांदेवावतारणांबलाधिक्यैकारणत्वाभावप्र
संगादित्यतआह। क्षत्रादन्येष्विति। यत्रहंसावतारादौइष्टनिधनेकार्येकेशवःप्रवृत्तस्तत्रक्षत्रादन्येषुद्रोणादिषुबलमेवसर्वाधि
क्येप्रमाणमित्यर्थः। क्षत्रियपदंतुतदितरेषामस्त्रीकृतक्षात्रधर्माणांव्यावर्तकं। द्रोणादीनांतुस्वीकृतक्षात्रधर्मत्वेनक्षत्रियपदेन
तेषांसंग्रहएवेतिभावः। ननुयदाबलकार्येविष्णुःप्रवृत्तस्तदातदंगबलाधिक्यंमन्त्र्याद्याधिक्यस्यापकमितिचेत्। यदातुज्ञानकार्येषुभग
वतःप्रवृत्तिस्तदादेवावतारेषुमन्त्र्याद्याधिक्यस्यापकंकिमित्यपेक्षायामाह। ज्ञानकार्यइति। यदाज्ञानकार्येविष्णुःप्रवृत्तस्तदात

देवेष्वेवनचान्येषुवासुदेवप्रतीयतः। क्षत्रादन्येष्वपिबलंप्रमाणंयत्रकेशवः। २२ प्रवृत्तोइष्टनिधनेज्ञानकार्ये
तथैवचा अन्यत्रब्राह्मणानांचप्रमाणंज्ञानमेवहि २३ क्षत्रियाणांबलंचैवसर्वेषांविष्णुकार्यता २४ ॥

देवज्ञानमेवस्वरूपाधिक्येप्रमाणमितिचशब्दार्थः। इदानींक्षत्रियेष्वितिविशेषणव्यावर्त्यमाह। अन्यत्रेति। बुद्धादिनाबलाधिक्य(
मिवज्ञानोपदेशादिनाज्ञानाधिक्यलिंगस्यस्थूलदृष्टिभिरपिज्ञातुंशक्यत्वादित्यर्थः। बुद्धादिप्रवृत्तेषुदेवावतारेषुज्ञानाधिक्यं
स्थूलदृष्टिभिर्ज्ञातुंनशक्यतइतिसर्वेषुज्ञानमितिनविरोधइत्याशयेनाह। क्षत्रियाणामित्येति। अत्रचोक्तंविशेषणंनविस्मर्त राम २६
व्यमित्याह। सर्वेषामिति। सर्वेषांक्षत्रियाणांब्राह्मणानांचसर्वेषांबलानांज्ञानानांचविष्णुकार्यताविशेषणमित्यर्थः। विलो
कार्यंयेभ्यस्तानिविष्णुकार्याणितितेषांभावस्तत्ताविष्णुकार्यांगत्वमितिभावः। नैसर्गिकस्यापादस्युपलक्षणं २२ २३ २४

नवविलोः पवकेषववतारेषुवलकार्येप्रवृत्तिः केषुचज्ञानकार्यइत्यतआह। कलरामादीति। आदिपदेनन्नृसिंहादिरूपाणि। गृह्यंते। वल
स्यकार्यंइष्टनिवर्तनंयस्मात्सतथोक्तः। व्यासादीत्यादिपदेनकपिलर्षभादिरूपाणिगृह्यंते। ज्ञानमेवकार्यंयस्यसतथोक्तः २५ नवक
लरामादीनांविस्तुत्वेसर्वमिदमुपपन्नंस्यात्तदेवज्ञातुमित्यतआह। मत्स्यकूर्मेत्यादिना २६ ऋचेःप्रजेश्वरस्यसुतोयज्ञनामा २७ व
उवापाश्वस्वायावक्त्रमित्यवक्त्रंयस्यसतथाएवंनामस्तुअश्ववक्त्रइतिभावः २८ ॥ इत्याद्याइत्याद्यशब्देनपुरुषावतारादयोगृ
ह्यंते। केवलोविष्णुरित्यस्यव्याख्यानमाह। नैषामिति। बलादितारतम्येसतिभेदोपिस्यादित्यतस्तदेवतान्नेत्याहनविशेषइति

कृष्णरामादिरूपेषुबलकार्योजनार्दनः। दत्तव्यासादिरूपेषुज्ञानकार्यस्तथाप्रभुः २५ मत्स्यकूर्मवराहाश्चनृसिंहवामनभार्गवाः
। राघवः कृष्णबुद्धौचब्रह्मवैपायनस्तथा २६ कपिलोदत्तऋषभौशिंशुमारोरुचेः सुतः। नारायणोहरिः कृष्णस्तापसोमनु
रेवच २७ महीदासस्तथाहंसः स्त्रीरूपोहयशीर्षवान्। तथैववडवावक्त्रः कल्कीधन्वंतरिः प्रभुः २८ इत्याद्याः केवलोविष्णु
र्नैषांभेदः कथंचन। नविशेषोगुणैः सर्वैर्बलज्ञानादिभिः क्वचित् २९ श्रीब्रह्मरुद्रशेषाश्चवींद्रोकामएवचाकामपुत्रोनि
रुद्धश्चसूर्यश्चंद्रोबृहस्पतिः ३० धर्मएषांतथाभार्यादक्षाद्यामनवस्तथामनुपुत्राश्चऋषयोनारदःपर्वतस्तथा ३१ ॥
कश्यपः सनकाद्याश्चवह्न्याद्याश्चैवदेवताः। भरतः कार्तवीर्यश्चवैन्याद्याश्चक्रवर्तिनः ३२ ॥ ॥ ॥

क्वचिदपिरूपेविशेषस्तारतम्यं २९ केवलइत्यस्यव्यावर्त्यांतरमस्तीत्याहश्रीरित्यादिना। कामपुत्रोनिरुद्धइत्येकः। भावद्रूपव्या
वृत्त्यर्थंकामपुत्रइति ३० धर्मोयमात्मकः। तथाएषांब्रह्मादीनांभार्याः सरस्वत्याद्याः। दक्षाद्याः प्रजेशाः। आद्यशब्देनवादेमाद
मौयोगृह्यंते। मनवः स्वायंभुवाद्याः। मनुपुत्राः प्रियव्रताद्याः ऋषयोमरीच्यादयः पर्वतोहिमवान्तदभिमानीतिवामायद्वा।
पर्वतनामाऋषिर्नारदस्यसखा ३१ ॥ सनकाद्याश्चत्वारः वह्न्याद्याइतरदेवताः। भरतोदौष्यंतिः। वेनस्यापत्यंवैन्यः पृथुराद्यो
कांतेतथाश्चनाचपदेनमगविंदादयः ३२

ता०टी० गयोराजाप्रियव्रतवंशजः। लक्ष्मणाद्याश्चत्वारो लक्ष्मणभरतशत्रुघ्नाः। रोहिणीनंदनो बलभद्रः। रुक्मिण्याश्चापत्यं रौक्मिणेयः प्रद्युम्न
२७ इत्येकः। भगवद्रूपव्यावृत्त्यर्थं रौक्मिणेय इति विशेषणं। तत्पुत्रः तस्य प्रद्युम्नस्य पुत्रो निरुद्धकः। अत्रापि भगवद्रूपव्यावृत्त्यर्थो विशे
षणं। नरः शेषात्मा। अत्राद्यपदेनोद्धवादयो गृह्यंते। एते हरेर्विशेषावेशिनो विशेषतः। आवेशो येषु ते तथा। विष्णोः स्वरूपाभि
व्यक्तिविशेषवंत इत्यर्थः। एतादृशाभिप्रायेणैव लक्ष्मणादीनां भगवदवतारत्वोक्तिः पुराणेष्विति द्रष्टव्यं ३३ ननु त्वन्मूलरूपग्रहेतोनै
वतदत्यंताभिन्नावताररूपेष्वपि विशेषावेशसिद्धेः किमर्थं लक्ष्मणाद्या इत्यादिना पुनरवतारग्रहणमित्यतो मूलरूपेषु विशेषा
वेशसद्भावेपि अवताररूपेषु सर्वत्र तत्सद्भावनियमाभावेन क्षिशिष्यावतारग्रहणमुक्तमित्याह। वालिसंवाद इति। आदिप

गपद्यलक्ष्मणाद्याश्चत्वारो रोहिणीनंदनः प्रद्युम्नो रौक्मिणेयस्तत्पुत्रश्चानिरुद्धकः। नरः फाल्गुन इत्याद्या विशेषा॥ ॥
वेशिनो हरेः ३२ वालिसंवादयश्चैव किंचिदावेशिनो हरेः। तस्माद्वृत्तप्रवृत्तस्य रामस्य महात्मनो हरेः। अंतरंगं हनूमां
श्च भीमस्तत्कार्यसाधकः ३४ ब्रह्मात्मकोपतो वायुः पदब्राह्मगात्पुरा। वायोरन्यस्य न ब्राह्मपदं तस्मात्स एव सः ३५

देनकर्णादयो गृह्यंते। भूभारहारिण इत्यादितो न्तमर्थमुपसंहरति। तस्मादिति। तत्कार्यसाधक इत्येतत्तद्भ्यां संबध्यते ३४ त
मूक्तरीत्या मारुतेः सर्वाधिकत्वे ब्रह्मादिविकल्पे त्येतत्कथं निदर्शितं स्यादित्यत आह। ब्रह्मात्मक इति। ब्रह्मात्मको वायुरिति प्र राम
तिज्ञार्थाय इत्यादिना हेतुरुक्तः। ब्राह्मं ब्रह्मसंबंधि। न तु तर्हि वायुरेव ब्रह्मेति न प्राप्नोति वायोरन्यस्यापि साधनानुष्ठाने स २७
ति ब्रह्मपदप्राप्तेः संभवेन ब्रह्मात्मकत्वसंभवादित्याशंक्यात्यस्य तत्प्राप्तियोग्यतैव नास्तीत्याह। वायोरन्यस्येति। स एवं वायुरेव व
स ब्रह्मा नान्य इत्यर्थः ३५ ॥ ॥

नचदेवादिषु वक्तृत्वानेएवाधिकज्ञापके इत्युक्तं देवस्त्रीष्वधिकज्ञापकं किं वलमुतज्ञानं नाद्यः तासां युद्धादिकरणाभावेन वलविशेषस्य
ज्ञातुमशक्यत्वेन हेतोरज्ञानासिद्धिप्रसंगात् । न द्वितीयः तासां बाहुल्येन ज्ञानप्रवर्तकत्वाभावेन ज्ञानविशेषस्य ज्ञातुमशक्यत्वेन र
वैक्तदोषानतिवृत्तेरतस्तासां तारतम्यज्ञानोपायः क इति जिज्ञासायामाह । यत्र रूपमिति । युक्तस्त्यक्तो लिंगज्ञानसंभवादित्याह । रूपं
हीति । हि यस्मात्स्थूलदृष्टीनां रूपं व्यक्तं हृदयंगमं स्पष्टं दृश्यं योग्यं ततः कारणात्तद्रूपं ज्ञापकं भवत्येवेत्यर्थः ३६ ॥ ननु विपरीतं किं
न स्यादित्याशंक्य एवं वदेव नकर्तव्येत्याह प्राय इति । यत्नतः प्रयत्नेनापि । अतो रूपमेव भक्त्यादीनां गमकमित्यर्थः ३७ अत्रापि

यच्च रूपं तत्र गुणा भक्त्याद्याः स्त्रीषु नित्यशः । रूपं हि स्थूलदृष्टीनां हृदयंगं व्यक्तं ततो हितत् ३६ ॥
प्रायो वेत्तुं न शक्यंते भक्त्याद्याः स्त्रीषु यत्नतः । यासां रूपं गुणास्तासां भक्त्याद्या इति निश्चयः ३७
तच्च नैसर्गिकं रूपं द्वात्रिंशल्लक्षणोद्युतं । नालक्षणवपुर्मात्रं गुणहेतुः कथंचन ३८ ॥

रूपमात्रं नाधिक्यज्ञापकं अस्तु रत्नाद्युव्यभिचारात् । किं तर्हि स्वाभाविकमेवेत्याह । तच्चेति । नैसर्गिकं स्वाभाविकं नतु रूपमात्रं स्थू
लदृष्टिभिर्ज्ञातुं शक्यते । ननु तदीयं स्वाभाविकत्वमप्यतः पुनरस्तानासिद्धिरेव दोषस्तत उक्तं द्वात्रिंशदिति । यद्रूपं द्वात्रिंशल्लक्ष
णोद्युतं तदेव नैसर्गिकमिति ज्ञातव्यमित्यर्थः । द्वात्रिंशल्लक्षणानि च पद्मपुराणे पूर्वलक्षणव्याख्यानावसरे दर्शितानि दुष्टंशवत्त
एवेति भावः । रूपस्य स्वाभाविकत्वाविशेषणात्यमाह । नालक्षणमिति । अलक्षणं द्वात्रिंशल्लक्षणरहितं वपुर्मात्रं रूपमात्रमस्वाभावि ल
कमिति यावत् । तद्भक्त्यादिगुणहेतुर्न भवति ३८ ॥

आस्तरीणां तत्स्वरूपं वरादिनिमित्तकं न स्वाभाविकमतस्तासां नाधिक्यमित्याह। आस्तरीणामिति। वरमात्रं न तल्लक्षणोपेतमतोऽस्वाभावि
कमेवेत्यर्थः। ३९ एवं नैसर्गिकस्य लक्षणोपेतस्य स्वरूपस्य भक्त्यादिहेतुत्वेसिद्धे तत्तारतम्याद्देवस्त्रीणां स्वरूपतारतम्यं सिद्धमित्या
ह। तस्मादिति। तस्माद्उक्तलिंगोपेतत्वाज्जानक्यादिरूपाश्रीः सर्वपरमा सर्वाभ्यः स्त्रीभ्य उत्तमा मतेत्यर्थः। ४० ततो लक्ष्म्याः पश्चादनं
तरं द्रौपदी सर्वाभ्यो रूपतो वरा तत्तज्ञमतेत्यर्थः। न केवलं रूपाधिक्यात्सर्वाधिक्यं हरेर्भूभारहरणे कार्ये भीमवत्साक्षादंगत्वादपि
सर्वाधिक्यं ज्ञातव्यमित्याह भूभारेति ४१ नाचसाक्षादंगत्वाविशेषाद्भीमसाम्यमेव प्राप्तमित्याशंक्य साक्षादंगत्वेपि विशेषोऽ
स्तीत्याह। हंता चेति। भीमस्य वैरहेतुत्वे सति दुर्योधनादिवैरिहंतृत्वमप्यस्तीति। द्रौपद्यास्तु वैरहेतुत्वमात्रमित्यतो विशेषात्त्वसा

आस्तरीणां वरादेस्तु वरमात्रं भविष्यति नतल्लक्षणान्यतस्तासां नैव भक्तिः कथंचन ३९ तस्माद्रूपगुणोदाराजानकी रुक्मिणी
तथा। सत्यभामेत्यादिरूपाश्रीः सर्वपरमा मता ४० ततः पश्चात्तु द्रौपदी च सर्वाभ्यो रूपतो वरा। भूभारक्षपणे साक्षादंगा भीम
वदीरिता ४१ हंता च वैरहेतुश्च भीमः पापजनस्य तु। द्रौपदी वैरहेतुः सा तस्माद्भीमादनंतरा ४२ बलदेवस्ततः पश्चात्ततः
पश्चाच्च फाल्गुनः। नरावेशादत्यधात्तु द्रौणिः पश्चात्ततः परे। रामवज्जांबवत्याद्याः षट्ततो रेवती तथा ४३ ॥ ॥ ॥

स्यमित्यर्थः ४२ अंगत्वेनाविकल्पकथनप्रसंगात्तच्छावतारेंऽगभूतानां तारतम्यमाह। बलदेव इति। अनुशेषावतारात् बलदेवादनं
तरं अशक्त्यावेशत्वाच्चेततः पश्चात्तु फाल्गुनः तदा तु नरावतारस्यार्जुनस्याभिमाने किं निमित्तमित्यत उक्तं नरावेशादिति। अन्यथा
तु नरावेशाभावे तु बलदेवस्य पश्चाद्द्रौणिरित्यर्थः। द्रौणिबलभद्रयोः साम्येपि सामान्यावेशविशेषावेशाभ्यां विशेषात्तु द्रौणिः प
श्चादित्युक्तं। ततः फाल्गुनादनंतरं अपरे द्रौणाद्याः सिंहवल्लोकने नष्ट रामरहिताणां स्वरूपं दर्शयति रामवदिति रामवद्बलभद्रवज्जां
बवत्याद्याः षट् हरेः स्त्रियो ज्ञातव्याः। जांबवत्याद्यास्त्वाद्यपदेन मित्रविंदा नीला भद्रा लक्ष्मणा कालिंद्याः पंच षट् त्वेते। ततस्ताभ्य अनं
तरं रेवती बलभद्रस्य भार्या ज्ञातव्येत्यर्थः ४३ ॥

एवं कृष्णावतारे रामभरतानां ब्रह्मादिरूपिणां भीमादीनां तारतम्यमुक्त्वा रामावतारे पितृरूपिणां हनुमदादीनां मंगतात्क्रमेण तारतम्यमाह ल
क्ष्मण इति। आदौ हनूमान् तत्पश्चाल्लक्ष्मणः। ततो लक्ष्मणादनंतरं भरतवालिनौ कामेंद्रावतारत्वात्। ततस्ताभ्यां सकाशात्पश्चाच्छ
त्रुघ्नः। ततः शत्रुघ्नात्सुग्रीवाद्याः आद्यपदेनांगदादयः अवरा नीचा इत्यर्थः ५४ नन्ववतारद्वये सेवातारतम्याद्योग्यतातारतम्यं
ज्ञातव्यमित्युक्तं तदनुपपन्नं। तथा हि रामावतारे वाल्यपेक्षया सुग्रीवे सेवाधिक्यस्य प्रतीयमानत्वेन तदपेक्षया तस्याधिक्यापत्तेः
। तथा कृष्णावतारे कर्णाद्यपेक्षया नकुलादिषु सेवाधिक्यस्य प्रतीयमानत्वेन तदपेक्षया तेषामाधिक्यापत्तेः। किंच केषांचिदवता
रद्वयेपि सेवाधिक्यस्य ज्ञातत्वेन सर्वाधिक्यापत्तिरिति शंकात्रयं क्रमेणापरिहरति। रामकार्यमित्यादिना। पुरा भरामावतारेरा

लक्ष्मणोहनुमत्पश्चात्ततो भरतवालिनौ। शत्रुघ्नस्तु ततः पश्चात्सुग्रीवाद्यास्ततोवराः ५४ रामकार्यं तु यैः सम्यक्
योग्यं न कृतं सुराः। तैः पूरितं तु कृष्णाय वीभत्साद्यैः समंततः ५५ अधिकं यैः कृतं तत्र ते न्यूनं कृतमत्र हि। कर्णाद्यैर
धिकं यैस्तु प्रादुर्भावद्वये कृतं ५६ विविदाद्यैर्हि तैः पश्चाद्विप्रतीपं कृतं हरेः। प्रादुर्भावद्वयेप्यस्मिन् सर्वेषां निर्णयः कृतः ५७

मकार्यं सेवारूपं स्वयोग्यं यैः सम्यक् न कृतं वान्याद्यैः। वीभत्साद्यैरर्जुनादिरूपैः पूर्वतः कृष्णावतारे कृष्णाय तत्सेवारूपं कार्यं पूरितं स्वयो
ग्यतानुसारेणापूर्णं कृतं समंततः इति भारहरणाद्यनेकप्रकारेणेत्यर्थः ५५ तथा तत्र रामावतारे यैः सुग्रीवाद्यैरधिकं रामकार्यं कृ
तं तैस्तत्र कृष्णावतारे कर्णाद्यैः कर्णादिरूपैः न्यूनं अल्पं कार्यं कृतं। तथा ये तु प्रादुर्भावद्वये वतारद्वयेपि विविदाद्यैर्नकुलादिरूपै
रधिकं कार्यं कृतं ५६ तैर्विविदाद्यैरेव पश्चात्कृष्णावतारे विप्रतीपं वैरं कृतमित्येवं नेन क्रमेणाशंकात्रयपरिहारः। अयमाशयः। नैका
वतारमात्रपर्यालोचनया सेवाधिक्यक्रमेण स्वरूपतारूप्यतारतम्यं ज्ञातं किंतर्हि अवतारद्वयपर्यालोचनया। अवतारद्वये पर्यालोचि
ते च स्पष्टमेव सेवातारतम्येन स्वरूपतारतम्यं ज्ञायत इति। अमुमेवाशयं उद्घाटयति। प्रादुर्भावद्वयेपीति। प्रादुर्भावद्वयेपि ज्ञायतः
सर्वेषां ब्रह्मादीनां स्वरूपनिर्णयः कृतो ततो नैकं प्रादुर्भावमात्रमादाय शंका कार्येत्यर्थः ५७ ॥ ॥

स्व स्व

ता०टी० नन्वेतयोरवतारयोः परस्परापेक्षावदवतारांतरापेक्षास्ति किं निर्णायककारणं इत्यत आह। नैतयोरिति। एतयोरवतारयोः किंचिच्छुभं वाप
२९ दिवाऽशुभं अकृतं तत्कृतं तदन्यत्रावतारे क्वापि न दृश्यते किंत्वत्रैव दृश्यते यस्मात्तस्मादत्रैवावतारद्वय एव निर्णयोऽवगंतव्यः ५०
तत्रापि तत्सम्यक्कृतयावतारद्वयस्य निर्णयहेतुत्वं किंतु हि कृष्णावतारस्य वैशेष्यान्निर्णयहेतुत्वमित्याह। पश्चात्तनत्वादिति। उपक्रमोप
संहारयोर्निर्णयहेतुत्वेऽपि उपक्रमापेक्षयोपसंहारस्य पश्चात्तनत्वाद्व्याख्यानरूपत्वेन विशेषतो निर्णयहेतुत्ववत् कृष्णावतारस्य
पश्चात्तनत्वात् तत्र कृष्णावतारे वैशेष्याद्विशेषतो निर्णयो भवतीत्यतो विशेषनिर्णयहेतुत्वमित्यर्थः। प्रादुर्भावद्वयापेक्षयैव सर्वे
षां निर्णयो नावतारांतरापेक्षस्तत्रापि विशेषनिर्णयः कृष्णावतारापेक्ष इत्युभयत्र ज्ञापकमाह। प्रादुर्भावमिति। यस्मात्कृष्णावतारे वैशे

नैतयोरकृतं किंचिच्छुभं वा यदि वाशुभं। अन्यत्र दृश्यते क्वापि तस्मादत्रैव निर्णयः ५० पश्चात्तनत्वात्कृष्णस्य
वैशेष्यात्तत्र निर्णयः। प्रादुर्भावमिमं तस्माद्गृहीत्वा भारते कृतं। उक्ता रामकथा त्वस्मिन्मार्कंडेयसमाख्यया॥
५१ तस्माच्च भारते नोक्तं तद्धि नैवास्ति कुत्रचित्। अत्रोक्तं सर्वशास्त्रेषु न हि सम्यगुदाहृतं ५२ ॥ ॥

ष्यान्निर्णयस्तस्मादिमं प्रादुर्भावं कृष्णावतारं गृहीत्वा विस्तरेणाभिहितं भारते कृतं भगवता व्यासेन नान्यथा तत्रस्यादित्यर्थः। अव राम
तारद्वयापेक्षयैव निर्णय इत्यत्र ज्ञापकमुक्ता रामकथेत्यनेनोक्तं। हि यस्मादस्मिन्भारते मार्कंडेयसमाख्यया मार्कंडेययुधिष्ठि २९
रसंवादेनारण्यकेपर्वणि रामकथोक्ता तस्मादवतारद्वयापेक्ष एव निर्णय इति ज्ञायत इत्यर्थः। एवं भारतस्य सोदाहरणं सर्वशास्त्र
निर्णायकत्वेन सिद्धं सर्वशास्त्रोत्तमत्वमुपसंहरति। तस्मादिति। भारते यत्प्रमेयं कुत्रचिद्ग्रंथांतरे नैवास्ति। अत्र भारते उक्तं प्रमे
यं सर्वशास्त्रेषु न सम्यगुदाहृतं हि यस्मात्तस्मात्सर्वशास्त्रोत्तमं भारतं वेदादुक्तार्थसंभूषितमित्यादिवचनादित्यर्थः ५२ ॥ ॥

एवमुक्तं सर्वशास्त्रोत्तमत्वं भारतस्य न स्वकपोलकल्पितं किं तर्हि ब्रह्मांडपुराणोक्त हरिणा स्वयमेव कथितं चेत्याह इत्यादीनि। मार्कंडेयपुराणेपि भारतस्य सर्वशास्त्रोत्तमत्वमुक्तमिति प्रतिज्ञायतद्वचनान्युदाहरति। मार्कंडेय इत्यादिना। स्पष्टमेतत् ५२ ५३ ५४ वायुप्रोक्तेग्रंथेपि भारतस्य प्रशंसनं कृतमिति प्रतिज्ञायतद्वचनमुदाहरति। कृष्णद्वैपायनमिति। अत्र महाभारतकर्तृत्वान्यथानुपपत्त्या व्यासस्य नारायणावतारत्वावधारणेन भारतस्यानन्यसाध्यत्वलक्षणं सर्वशास्त्रोत्तमत्वं ज्ञायत इति भावः ५५ न वेद

इत्यादि कथितं सर्वं ब्रह्मांडे हरिणा स्वयं। मार्कंडेयेपि कथितं भारतस्य प्रशंसनं ५२ देवतानां यथा व्यासो द्विपदां ब्राह्मणो
वरः। आयुधानां यथा वज्रमौषधीनां यथा यवाः ५३ तथैव सर्वशास्त्राणां महाभारतमुत्तमं। वायुप्रोक्तेपि तत्प्रोक्तं भारत
स्य प्रशंसनं ५४ कृष्णद्वैपायनं व्यासं विद्धि नारायणं प्रभुं। को ह्यन्यः पुंडरीकाक्षान्महाभारतकृद्भवेत् ५५ एवं हि सर्व
शास्त्रेषु८ एषरूएषयुदीरित। उक्तोर्थः सर्व एवायं माहात्म्यक्रमपूर्वकः ५६ भारतेपि यथा प्रोक्तो निर्णयोयं क्रमेण
तु। तथा प्रदर्शयिष्यामस्तद्वाक्यैरेव सर्वशः ५७ ॥ ॥

तं ब्रह्मांडपुराणादिस्थानत्रये भारतस्योत्तमत्वं कथितं किं तर्हि सर्वशास्त्रेष्वप्येवमेव कथितमित्याह। एवं हीति। एवं भारतस्य सर्वशास्त्रोत्तमत्वं प्रसाध्येदानीं सद्वेपात्सर्वशास्त्रार्थं भारतार्थं तु सारत इति प्रतिज्ञां समर्पयति। उक्तार्थ इति। माहात्म्यक्रमस्तारतम्यक्रमः सर्वोयमर्थस्य सोयं सर्वार्थो यथा सर्वशास्त्रेषु उक्तो यथा च भारतेपि क्रमेण निर्णयस्तारतम्यक्रमेण निर्णयो यः पूर्वोक्त उक्तस्तथा सर्वशः सर्वे सर्वशास्त्रोक्तं भारतोक्तं च = निर्णयं तद्वाक्यैर्भारतवाक्यैः प्रदर्शयिष्यामः ५६ ५७ ॥ ॥ ॥

२

ना०टी० कानितानिसर्वनिर्णीयार्थानिभारतवाक्यानीत्यतस्तावद्भारतोपक्रमवाक्यंपठतिनारायणमिति पं० कथंतस्योक्तंनिर्णीयार्थत्वमित्यतस्त
३० द्वाक्यंयथावद्व्याचष्टे। ज्ञानप्रदइत्यादिना। तत्रमूलंम १ श्लोकेनारायणंवंदइत्यन्वयः। नारायणस्यैववंद्यत्वेकोहेतुरित्यतउक्तंस्व
रगुरुमिति। तत्रस्वरशब्दोऽस्यादिसाधारणामरपरः। गुरुत्वंचज्येष्ठत्वादिनेत्यन्यथाप्रतीतिनिरासायतत्पदंतात्पर्यतोव्याचष्टे। ज्ञा
नप्रदइति। स्वरगुरुत्वंनज्येष्ठत्वादिमात्रेण। किंतुज्ञानप्रदत्वेनस्वरशब्दोपितसाधारणादेवपरः। किंतुपद्मापद्मभवाद्युपदेपचेतन

नारायणंस्वरगुरुंजगदेकनाथंभक्तप्रियंसकललोकनमस्कृतंच। त्रैगुण्यवर्जितमजंविभुमाद्यमीशं
वंदेभवघ्नममरासुरसिद्धवंद्यं॥ पं० ज्ञानप्रदः सभगवान्कमलाविरिंचशर्वादिपूर्वगंजग
तोनिखिलाद्वरिष्टः॥ भक्तेष्वेवतुष्यतिहरिःप्रवणात्त्वमेवसर्वस्यधर्मइतिपूर्वविभागसंस्थः पं० २

परइतिव्याख्यातंभवति। मूलेरमादिसर्वस्वरगुरुत्वमेवकथमित्याकांक्षायामुक्तंजगदेकनाथमिति। तत्रराजादिवत्स्वामित्वमात्रंप्रती राम
यतेतेनचनगुरुत्वसाधनमित्यतस्तात्पर्यमाह। निखिलाद्वरिष्टइति। निखिलाद्रमादिचेतनवर्गाद्वरिष्ट अतिशयेनोत्तमः। अतःस्वर
गुरुत्वंयुक्तमितिभावः। स्वरगुरुपदोक्तंज्ञानप्रदत्वंनलाभाद्युपाधिना किंतर्हिस्वभावतोभक्तप्रियत्वादित्यभिप्रायेणोक्तंमूलेभक्त ३०
प्रियमिति। तदभिप्रायंस्पष्टयति। भक्तेष्वेवेति। नत्वत्रभयसमाप्त्याद्यभीष्टफललाभार्थंनारायणवंदनंक्रियते। तत्प्राप्तिश्चान्यवंदने
नापिभवत्यतः किंतद्वंदनेनेत्यतोमूलेसकललोकनमस्कृतमित्युक्तं। तदोक्तशंकापरिहारः स्पष्टंनप्रतीयतइत्यतस्तत्तात्पर्यमाह। हरि
प्रवणात्त्वमेवसर्वस्यधर्मइति। हरिप्रवणत्वदर्शेपुंसांभावएवसर्वस्यधर्मोनान्यप्रवणत्वमित्यतोभीष्टसिध्यर्थमप्यन्योनस्वातंत्र्येण
वंद्यइतिभावः। इतिज्ञानप्रदइत्याद्युक्तोर्थः पूर्वविभागसंस्थः श्लोकस्यपूर्वार्द्धेउक्तोस्तीत्यर्थः पं० २ ॥ ॥

इतोपिनारायणएववंद्यइतिहेत्वंतरंवक्तुंत्रैगुणपवर्जितमितितत्तरार्द्धे पोक्तं तस्यतात्पर्यमाह। निर्दोषकइति। सत्वादिगुणासंबंधस्यजन
नादिदो॰ षमूलत्वात्तदभावेसर्वदोषाभावएवोक्तोभवतीत्यर्थः। त्रैगुणपवर्जितत्वमेवकथंज्ञातमित्याकांक्षायामजमित्युक्तं। मूले। त-
त्रस्वरूपतोजननतनिषेधमात्रप्रतीतिनिरासार्थंव्याचष्टे। स्थितिविहीनइति। देहतोपिजननाभावस्तदर्थस्तथाचनित्यमुक्तत्वमेवोक्तंभ
वतीतिभावः। इदंतुरमासाधारणमित्यतोमूलेविभुमित्युक्तं। तत्रदेशतःकालतश्चव्यापकत्वंविभुत्वमितिभाति। तदपिरमासाधारण
मेवेत्यतोगुणतोपिव्याप्तिस्तदर्थइत्यभिप्रायेणतद्व्याख्याति। उदारेति। उदारागुणाःपूर्णाःप्रत्येकंपूर्णाःसंविदात्मकाश्चिद्रूपा
गुणायस्येतिविग्रहः। तथाचरमाव्यावृत्तिरितिभावः। अतएवोक्तंनित्यमुक्तत्वेहेतुत्वेनमूलेऽनाद्यमित्युक्तं। तत्रादौजातमित्यर्थ
स्यविरूढत्वात्तात्पर्यार्थमाह। प्रथमजइति। तथाचसर्वस्यजगतःप्रथमकर्तृत्वेनस्वस्यकर्त्रभावादजत्वंयुक्तमितिभावः।
।कथमाद्यत्वमित्याकांक्षायांमूले ईशमित्युक्तं। तत्रहेतुहेतुमद्भावस्यस्पष्टप्रतीतेर्व्याचष्टे। सकलात्मशक्तिरिति। सकलस

निर्दोषकःस्थितिविहीनउदारपूर्णसंविद्गुणःप्रथमजःसकलात्मशक्तिः। मोक्षै
कहेतुरखरूपखरैश्चयुक्तोवंद्यःसएकइतिचोत्तमपोत्तरार्द्धे ६० ॥ ॥इति

र्जनविषयास्वरूपशक्तिर्यस्यासौतथोक्तः। तथाचप्रथमकर्तृत्वंयुक्तमितिभावः। इत्तोपिनारायणएववंद्यहेत्वंतरंवक्तुंमूले
नेवघ्रमित्युक्तं। तत्रसंसारनिवृत्तिमात्रहेतुत्वप्रतीतिनिरासार्थंतत्तात्पर्यमाह। मोक्षैकहेतुरिति। आवरणनिवृत्यास्वरूपानंदा
विर्भावोमोक्षशब्दार्थः। तत्रएकोमुख्योहेतुरित्यर्थः। अतस्तस्यैववंद्यत्वंयुक्तमितिभावः। अनेनमुमुक्षुनिर्वंद्यत्वेलब्धेप्राप्तमो
क्षैर्वंद्योनस्यात्प्रयोजनाभावादित्याशंकानिरासार्थंमूलेऽमरास्वरसिद्धवंद्यमित्युक्तं। तत्रास्वरशब्दस्यप्रसिद्धार्थत्वप्रती
तिनिरासार्थंतदर्थंवदन्व्याचष्टे। अखरूपेति। अत्रास्वरत्वस्यामरविशेषणत्वात्पूर्वनिपातापेक्षयामराखरसिद्धेत्यस्य
खरूपखरैरितिविपरीत्येनयोजनंकृतं। अखिलाःस्वरूपेंद्रियैश्चिन्मात्रैःरमंतेस्वरूपेइंद्रियैश्चिन्मात्रैःरमंतेस्वरूपानंदमनुभव
तीत्यखराः। तेचतेसिद्धाश्चमुक्ताश्चेति। अखशब्दवाच्यानामिंद्रियाणांचिन्मात्रत्ववक्तुमेखरूपेत्युक्तं। अमरपदव्याख्यानंखरैरिति

सिद्धपदार्थकथनंमुक्तैरिति। सनारायणएकएववंद्यइत्य
न्नेनोभयत्रवंद्यत्वोक्त्यासर्वोत्तरार्द्धयोर्मित्रविषयत्वशंका
निवारयति। इतिश्लोकस्योत्तरार्द्धेनिर्दोषकइत्यादिप्रमेय
मुक्तमित्यर्थः ६० ॥

ता०टी०
३१

नतुपर्वार्द्धे सकललोकनमस्कृतमित्युक्त्वा उत्तरार्द्धे अमरासुरसिद्धैर्वंद्यमित्यनेनोच्यमानं वंद्यत्वं पुनरुक्तमित्याशंक्य प
रिहरति। नम्यत्वमिति। उभयत्र पूर्वार्द्धे उत्तरार्द्धे चास्य नारायणस्य नम्यत्वमुक्तं यतस्ततः कारणादस्य नारायणस्य अमुक्तैरनवगतोमु
क्तैश्चवितम्यता यथामुक्तैस्तथा मुक्तैरपि नम्यत्वमित्यर्थः। अन्यथा पौनरुक्त्यप्रसंगादेवेति भावः। नन्वेवं व्याख्याते स्मिन्श्लोके कः फ
लितार्थः सिद्ध इत्यत आह। त्वं हीति। अमुष्य विष्णोः सर्वगुणापूर्तिं प्रतिजानता भगवता व्यासेन त्वं सर्वगुणापूर्तिः प्रस्तावि
तोपक्रान्ता ६१ नोपक्रममात्रस्य तात्पर्यनिर्णायकत्वमित्यत उपसंहारवाक्येपि भगवतो गुणापूर्तिरेवोच्यत इत्युपक्रमोप

नम्यत्वमुक्तमुभयत्र यतस्ततोस्य युक्तैरमुक्तगणकैश्च वितम्यतोन्तः। त्वं हि सर्वगुणपू
र्तिरमुष्य विष्णोः प्रस्ताविता प्रथमतः प्रतिजानतैव ६१ ब्रह्मौघवन्ते रिज्यते सोमपूतैः ब्रह्म
वीरै रिज्यते विक्रमद्भिः। ब्रह्म लोवन्यै रिज्यते संप्रशान्तैः ब्रह्म ध्याने रिज्यते वीतमोहैः ६२ ॥

संहारैकरूप्यमप्यस्तीत्यभिप्रायेणोपसंहारवाक्यानि पठति। ब्रह्मौघवन्ते रित्यादिना। ब्रह्म परं ब्रह्म सोमपूतैः सोमपानेन पूतै
कतुभिर्यज्ञैः करणै रिज्यते। विक्रमद्भिः विक्रमं पराक्रमं कुर्वद्भिर्वीरैर्युद्धाख्यैर्यज्ञैः ब्रह्म एवेज्यते। एवं संप्रशान्तैः सम्यग्विचारशा
शीलैर्वन्यैर्वनस्थैस्तपस्विभिः ब्रह्म एवेज्यते। किं बहुना वीतमोहैरपगताज्ञानैर्मुक्तैरपि ब्रह्म एवेज्यत इति श्लोकार्थः। अनेन स
र्ववर्णाश्रमोपेतयुक्तायुक्तपूज्यत्वोक्त्या सर्वोत्कृष्टत्वमेवोच्यते ६२ ॥

राम
३१

पूर्वस्मात्साम्यस्य इति उ स्रष्टा ब्रह्मादय इति श्लोके पूर्वार्द्धे अन्यथाप्रतीतिनिरासार्थं स्वस्तुतिकं व्याचष्टे। स्रष्टृत्वं देवानामिति। ब्रह्मादि
देवानां यत्स्रष्टृत्वं स्रष्टा ब्रह्मादय इत्यनेनोच्यते तत्स्तुतिस्रष्टृत्वं मुक्तिदातृत्वमेवोच्यते। न तदुत्पत्त्यादिकर्तृत्वं महेशत्वं स्रष्टृत्वमु
च्यते। कुत इत्यत आह। उत्पत्तिरिति। यस्मात्कारणादुत्पत्तिर्दैत्यानामपि संमिता समाना। तस्माद्रक्षुक्तिरेव स्रष्टृत्वमित्ययं विशेषो वि
शेषार्थो ऽपूर्वार्थो ज्ञायत इत्यर्थः। यद्वा अविशेषोयमिति पदच्छेदः। यस्माद्दैत्यानामपि उत्पत्तिः संमिता तस्माद्ब्रह्मादयः स्रष्टा इति
विशेषोक्तिर्न स्यात्। तस्मात्तद्बलादपूर्वार्थो लभ्यत इति ६४ एवं येन वा निहता इत्यत्रापि या दैत्यहतिर्दैत्यानां हननं यदुच्यते। सा त

स्रष्टा ब्रह्मादयो देवा निहता येन दानवाः। तस्मै देवाधिदेवाय नमस्ते शार्ङ्गधारिणे ६३ स्रष्टृत्वं देवानां मु
क्तिस्रष्टृत्वमुच्यते नान्यत्। उत्पत्तिर्दैत्यानामपि यस्मात्संमिता विशेषोयं ६४ अथ च दैत्यहतिस्त
मसि स्थिरा नियतसंस्थितिरेव न चान्यथा। तत्तु विभागकृतिः सकलेष्वियं न हि विशेषकृता सुरदैत्ययोः ६५

मसि स्थिरा अपर्यवसिता नियता कालिमा रस्य यथायोग्यास्थितिरेवोक्ता न चान्यथा न तु तत्तु विभागकृतिरूपा हतिरत्रोक्ता। कुत इत्य
त आह। तत्तु विभागेति। इयं निहतशब्दापर्यालोचनया प्रतीयमाना तत्तु विभागकृतिर्देहवियोगकरणलक्षणा हतिः सकलेषु
देवेषु दैत्येषु च समाना हि यस्मात्तस्मात्सुरदैत्ययोर्देवेषु दैत्येषु च विद्यमाना तत्तु विभागकृतिर्न विशेषकृता येन दानवा निहता
इति विशेषोक्तिः स्यात्तु विभागकरणविषया न भवति किं तु तत्तद्विषयैवेत्यर्थः ६५ ॥ ॥ ॥ ॥

ननु परचित्तवृत्तेरप्रत्यक्षत्वाद्भगवतो व्यासस्यायमेवाभिप्राय इति कथं ज्ञायत इत्यत आह। तमिममिति। सुरासुरसंचये देवदैत्यसमुदा
ये हृदि हितं हरिणा वेदव्यासेन तत्कृतं विवक्षितं प्रविशेषं प्रकृष्टं विशेषं देवानां मुक्तिदातृत्वं दैत्यानां तमोदातृमित्येवंरूपं विशेषमुदा
हृतं अंतरणीतगपर्थत्वात् अप्रदर्शितं स्वपरपक्षभिदा स्वपक्षपरपक्षौ भिनत्ति विवेचयतीति स्वपरपक्षभित्तेन भगवता व्यासेन नमी
मसुयोधनो प्रतिविभज्य भीमो मदीयः पक्षः सुयोधनः परपक्ष इति भागं कृत्वा भारतीकथा कथिता तस्मादयं विशेषो व्यासस्या
भिप्रेत इति ज्ञायत इत्यर्थः। तथा च ब्रह्मादीनां मुक्तिदातृत्वेन कल्यादीनां तमोदातृत्वेन च भगवतो महामाहात्म्यमेव भारतवाक्ये
वगम्यत इति भावः ६६ भारते वैशंपायनाद्युक्तमंगलाचरणश्लोकेपि सर्वस्य भारतस्य नारायणपदवाच्यनिर्दोषाशेषस

तमिममेकं सुरासुरसंचये हृदि हितं प्रविशेषमुदाहृतं। प्रतिविभज्य च भीमसुयोधनौ स्वपरपक्षभिदा कथिता कथा ६६ न
मो भगवते तस्मै व्यासायामिततेजसे। यस्य प्रसादाद्वक्ष्यामि नारायणकथामिमां ६७ वासुदेवस्तु भगवान्कीर्त्यतेत्र सना
तनः। प्रतिबिंबमिवादर्शे पश्यंत्यात्मनि स्थितं ६८ नास्ति नारायणसमं न भूतं न भविष्यति। एतेन सत्यवाक्येन सर्वार्था
न्साधयाम्यहं ६९ ॥ ॥ ॥

गुणापूर्णत्वप्रतिपादकत्वमेव प्रतीयत इति भावेन तं श्लोकमुदाहरति। नम इति। अत्र भारत इति शेषः। इमां नारायणकथामिति ना
रायणकथात्वविधानात्तत्प्रतिपादकत्वमवगम्यत इति भावः ६७ वासुदेवस्त्विति। भारते श्लोकेपि अत्र भारते सनातनो भगवान्वा
सुदेवः कीर्तित इत्युक्त्या शेषभारतस्यानादिनित्यत्वपरमैश्वर्याद्यनंतमहिमोपेतत्वेन भगवत्प्रतिपादकत्वमवगम्यते ६८ राम ३२
नास्ति नारायणसममस्मिन्निति भारतप्रतिज्ञाश्लोकेपि नारायणस्य समं वस्तु नास्तीत्यादिरूपप्रमेयमभिधाय तत्परतरान् सर्वार्था
न्साधयामीति प्रतिज्ञया हरेः सर्वोत्कृष्टत्वमेव भारतस्य मुख्यः साध्योर्थ इतरेत्वर्थास्तदर्थत्वेन साध्या इत्यवगम्यत इति भाव ६९

यदर्थो वाक्योदाहरणं तद्दर्शयति । आद्यंतयोरिति । यस्मात्स उदारशक्तिर्व्यासः स उदारशक्तिर्व्यासात्मको विष्णुराद्यंतयोर्भारतस्यादावंते च इत्युक्तरीत्यावदत् । तस्मादुपक्रमोपसंहारैकरूप्याद्देव भारतगाः कथा हरिसद्गुणानां निर्णीतये निर्णयार्थं प्रवृत्ता इत्यर्थोऽवगम्यत इत्यर्थः ७० न केवलमुपक्रमोपसंहारैकरूप्यसद्भावाद्भारतस्य विष्णूत्कर्षे तात्पर्यं किं तर्हि अभ्यासादीतरलिंगसद्भावादपि तत्रैव तात्पर्यमवगम्यत इत्यभिप्रेत्य मध्यस्थानि बहूनि भारतवाक्यानि पठति । सत्यमित्यादिना । तत्र स्यादाद्यर्थं शपथत्वेन सत्यमित्यादित्रिरुक्तिः । शपथोऽयं क्रियत इति द्योतनाय भुजमुद्धृत्योच्यत इत्युक्तं । किमुच्यत इत्यत आह शपथविषयं दर्शयति । वेदशास्त्रादिति । परं प्रमाणमिति शेषः । वेदात्मगादयः शास्त्राणि तन्मीमांसारूपाणि चेति च विवेकवद्भावः । वेदरूपाच्छास्त्रादिति वा । विष्णुसर्वोत्कर्षस्य

आद्यंतयोरित्यवदत्स यस्माद्व्यासात्मको विष्णुरुदारशक्तिः । तस्मात्समस्ता हरिसद्गुणानां निर्णीतये भारतगाः कथेषा ७० सत्यं सत्यं पुनः सत्यमुद्धृत्य भुजमुच्यते । वेदशास्त्रात्परं नास्ति न दैवं केशवात्परं ७१ आलोड्य सर्वशास्त्राणि विचार्य च पुनः पुनः इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ७२ स्मर्तव्यः सततं विष्णुर्विस्मर्तव्यो न जातुचित् । सर्वे विधिनिषेधाः स्युरेतयोरेव किंकराः ७३

शास्त्रैकसमधिगम्यत्वात्तत्सिद्ध्यर्थमेव शास्त्रस्य सर्वोत्तमप्रामाण्यविषये शपथः क्रियते ७१ अत एवोक्तमालोड्य सर्वशास्त्राणीति । आलोडने इतिकर्तव्यतां दर्शयति । विचार्य चेति । उपक्रमादिभिरिति शेषः । विचारफलमाह इदमिति । कस्यायं परामर्श इत्यत आह ध्येय इति । सर्वोत्कृष्टत्वेनेति एरणीयं ७२ स्मर्तव्य इति श्लोके प्रातरुत्थायाघसंध्यामुपासीतेत्यादिसर्वविधिशास्त्रस्य विष्णुः सततं स्मर्तव्य इति प्रधानविधिशेषत्वं तथा न सुरां पिबेदित्यादिनिषेधशास्त्रस्य विष्णुर्जातुचित्कदाचिदपि न विस्मर्तव्य इति प्रधाननिषेधशेषत्वमित्युक्त्वा सर्वस्य विधिनिषेधरूपशास्त्रस्य विष्णोरेव सर्वोत्तमत्वेन सर्वादरणीयपरत्वमत्र तात्पर्येणात्यत्रेत्यवगम्यते ७३ ॥

ना०टी० कोहितमित्यत्रविस्रोरपरोन्योद्यः कश्चिद्यदितद्विधोविस्तुसदृशोनस्यात्। तर्हितंविस्तुंवेदितुंसाकल्पेनज्ञातुंकोहिशक्तस्यात्कोपीत्यर्थः। न
३३ नुविस्तुसदृशस्यान्यस्यसंभवेसएववेदितुंशक्तः स्यादित्यतोविपर्ययेपर्यवसानमाह। तद्विधश्चेति। ननुसर्वप्रमाणगोचरस्यशश
विषाणादिवदत्यंतासत्त्वमापद्यतइत्यतआह। तस्मादिति। सविस्तुस्तंविस्तुंस्वात्मानंस्वयंवेद। इतरज्ञानाविषयत्वेपिस्वज्ञानवि
षयत्वान्नप्रमाणगोचरत्वमितिभावः ७४ एतदेववाक्यांतरेणादर्शयति। कोहीति। अत्रमध्यमदीपिकान्यायेनतस्मादित्येतदुभ
यत्रसंबध्यते। अत्रापिस्वस्यस्वयमेवेति। इत्युक्तेःतत्सदृशस्यान्यस्याभावएवप्रतीयते ७५ अप्रमेयइत्यत्रापिअचिंत्यमहिम
त्वादिकमेवप्रतीयते। अनियोज्यः अनन्यप्रेर्यः। कामगमः स्वेच्छाचारी। वशीस्वतंत्रः अत्रपूर्वोक्तेउत्तरोक्तंहेतुत्वेनयोज्यं। एवमू

कोहितंवेदितुंशक्तोयोनस्यात्तद्विधोपरः। तद्विधश्चापरोनास्तितस्मात्तंवेदसःस्वयं ७४ कोहितंवेदितुंशक्तोनारायणमनाम
यंअतःतेसत्यवतीसूनोः कृष्णाद्वादेवकीसुतात् ७५ अप्रमेयोऽनियोज्यश्चस्वयंकामगमोवशी। मोदत्येषसदातैर्बालःक्री
डनकैरिव ७६ नप्रमातुंमहाबाहुःशक्योयंमधुसूदनः। परमात्परमेतस्माद्विश्वरूपान्नविद्यते ७७ वसुदेवसुतोनायंनायं
गर्भवसत्प्रभुः। नायंदशरथाज्जातोनचापिजमदग्नितः ७८ ॥ ॥

तैर्ब्रह्मादिजीवैर्मोदतिक्रीडते। कैः क्रीडनकैः पुत्तलिकाभिर्बालइव ७६ नप्रमातुमित्यत्रापिसर्वोत्कृष्टत्वेनाचिंत्यमहिमत्वमेवो
च्यते। नप्रमातुमिति। प्रमातुंस्वप्रमायाविषयीकर्तुंविश्वरूपात्परिपूर्णरूपादतएवपरमाद्उत्कृष्टादेतस्मात्परंउत्तमंनविद्यते
७७ ननुकथमेतत्कृष्णादिरूपेराजनंदनदर्शनादित्यतस्तद्वैतिरेकमेवेत्याह। वसुदेवइति। अयंपरमात्मावसुदेवसुतइत्यत्रप्रसि राम
द्धिरेवेत्यर्थः। ननुकथंतर्हिदेवक्यागर्भेवासइत्यतस्तदपितादृशोवेत्याह। नायंगर्भइति। उभयत्रहेतुःप्रभुरिति। वसुदेवेतिविशे ३३
षोक्त्याअन्यावतारेष्वजननप्रतीयतइत्यतःसर्वावतारेष्वप्येवमेवेत्याह। नायंदशरथादिति ७८ ॥ ॥ ॥ ॥

उक्तरीत्या जननाभावे मरणं कुतः स्यादित्याह। जायत इति। जात एव कारणादित्यर्थः। सर्वत्र चेतत्तेषु देहयोगवियोगयोरेव जननमरणश
ब्दार्थत्वाद्देहयोगरूपजननाभावे तद्वियोगरूपं मरणं कथं स्यादिति भावः। ननु स्वयं न म्रियते चेदन्येन वध्यः स्यादित्यत आह। न व
ध्य इति। एवं प्राकृतदेहयोगाभावे मोहादिदोषाः कथमेव स्युरित्याह। मुच्यत इत्यादिना। देहयोगवियोगमोहाद्यभावे दुःखशंकैव न का
र्येत्याह। कुत इति॥ किंच परमात्मन्यपि दुःखमाशंकमानेन किं परमात्मा स्वयमेव स्वस्मिन् दुःखमुत्पादयतीत्युच्यते। अन्य एव
कश्चित्तत्रोत्पादयतीति वा। नाद्यः। दुःखस्य नित्यं प्रतिकूलवेद्यस्वभावत्वेन स्वयमनपेक्षितत्वात्। न द्वितीय इत्याह। स्वतंत्रस्ये
ति। किंच नित्यानंदैकस्वरूपत्वेन दुःखस्यावकाश एव नास्तीत्यभिप्रेत्याह। नित्यानंदेति ७९ नन्वीश्वरोपि कर्माणि करोत्येव तत्

जायते नैव कुत्रापि म्रियते जात एव न। न बध्यो मुच्यते नायं बध्यते नैव केनचित्। कुतो दुःखं स्वतंत्रस्य नित्यानंदैकरूपिणः ७९ ई
शानपि हि देवेशः सर्वस्य जगतो हरिः। कर्माणि कुरुते नित्यं कीनाश इव दुर्बलः ८० नात्मानं वेद मुग्धोयं दुःखी सीतां च मार्गते
। बद्धः शक्रजितेत्यादि लीलेयासुरमोहिनी ८१ मुच्यते शस्त्रपातेन भिन्नत्वग्रुधिरस्रवः। अजानन्निव पृच्छति स्मात्पांस्तवत्य
क्त्वा दिवं गतः ८२ इत्याद्यसुरमोहाय दर्शयामास नाट्यवत्। अविद्यमानमेवेशः कुहकं तद्धि दुःखराः ८३ ॥ ॥

त्कर्मणां च कर्मणा बध्यते जंतुरिति वचनाद्बंधकत्वेन मतत्वाद्धेतुदुःखादिप्राप्तिरवर्जनीयेत्यत आह। ईशानपीति। ईशितापीत्यर्थः
। कीनाशः कर्षकः। कृषीवल इति यावत्। ईशानपि हीति हिशब्देन न कर्मणा बद्धस्तेनोक्तनीया नित्यादिरूपी लीलास्तुति प्रसिद्धिमा
ह ८० एवं कर्मणामबंधकत्वे अज्ञानादिदर्शनं दैत्यमोहार्थमेव कृतमित्याह। नात्मानं वेदेत्यादिना। मार्गते अन्वेषयति। इत्यादि
रूपा या लीला असुरमोहिनी दैत्यानां मोहजननार्था ८१ मुच्यते नरकासुरयुद्धे शस्त्रपातेनेत्यैवं भवत्रसंबध्यते भिन्नत्वगिति भिन्नं
वेदा। रुधिरस्य स्रवः स्रवणं यस्मादिति तथोक्तः ८२ नाट्यवदैंद्रजालवत् अविद्यमानमेवेशः प्रदर्शयामास। एवं प्रदर्शितेऽ
प्यसुराणामेव भ्रांतिरुत्पन्ना न देवानामित्याह कुहकमिति। तदेतत्प्रदर्शितं सर्वं देवाः कुहकं मन्वते इति विदुः ८३ ॥ ॥

ननुमूलरूपस्यनित्यानंदैकस्वरूपत्वेप्यवतारेषुप्राकृतदेहसंबंधात्दुःखादिदोषाःस्युरित्यतआह।प्रादुर्भावाइति।अत्रसर्वत्रैवैकै
कस्मिन्नर्थेप्रमाणसंप्लवमंगीकृत्यभारतस्यानिमित्तप्रकारेणोक्तानि अतेकानिवाक्यान्येकस्मिन्नर्थेउदाहृतानीति तन्नपौनरुक्त्यमा
शंकनीयं।प्राकृतदेहाभावेकथंतत्प्रतीतिरित्यतआह दर्शयतीति ८४ किमर्थमन्यथादर्शयतीत्यतःप्रयोजनद्वयोक्त्याघट
यते।दुष्टानामिति।कुत्रचित्सतामपिमोहनार्थायेत्यनुकर्षणार्थश्चशब्दः।ननुदुष्टानांतमोयोग्यत्वेनतत्साधनमिथ्याज्ञानसि
ध्यर्थंतन्मोहनंयुक्तं।सतांमोहनेकिमर्थमित्यतउक्तं।यथायोग्यफलप्राप्त्याइति।सद्भिरपिस्वयोग्यतातिरेकेणसाधनातिश
येऽनुष्ठितेसतिप्रादुर्भावविषयान्यथाज्ञानेनतद्विनाशार्थंसतामपिमोहनंक्रियतइत्यर्थः।नचैतावद्विचित्रकर्मकरतोहरेःकथं

प्रादुर्भावाहरेःसर्वेनैवप्राकृतदेहिनः।निर्दोषागुणसंपूर्णादर्शयत्यन्यथैवतु ८४ ॥ ॥
दुष्टानांमोहनार्थायसतामपिचकुत्रचित्।यथायोग्यफलप्राप्त्यैलीलैषापरमात्मनः ८५
ज्ञानंतेहंसविज्ञानमिदंवक्ष्याम्यशेषतः।यज्ज्ञात्वानेहभूयोन्यज्ज्ञातव्यमवशिष्यते ८६ ॥

क्लेशइत्यतउक्तं।लीलेति।केवलमानंदोद्रेकेणलीलैवेयंनक्लेशरूपमित्यर्थः ८५ भारतेगीतिकावरेतिवचनाद्भारतेपिगीता
भागस्योत्कृष्टत्वावगमात्तत्रत्यान्यपिबहूनिवाक्यानिउक्तार्थेप्रतिपादयंतीत्यभिप्रेत्यतान्युदाहरति।ज्ञानंतेहमित्यादि।त
।अत्रगीतायांज्ञानंतेहमितिविविज्ञानसहितंज्ञानंप्रवक्ष्यामीतिप्रतिज्ञायोत्तरत्राहंसर्वस्यप्रभवइतिप्रतिज्ञातंज्ञानमुच्यते ‎राम ३४
।ज्ञानविज्ञानशब्दाभ्यांचतद्विषयभूतंभगवन्माहात्म्यमुच्यते।यज्ज्ञात्वेति।वाक्यशेषपर्यालोचनयातथावगमात्।नहिज्ञा
नविज्ञानंवाज्ञात्वामुच्यतइतिसंभवति।किंतुस्तेयज्ज्ञात्वेति।ततोज्ञानविज्ञानशब्दौज्ञेयविज्ञेयपरौ ८६ ॥ ॥ ॥

तत्रज्ञेयस्वरूपमुक्तं अहंसर्वस्येति। प्रभवत्यस्मादितिप्रभवत्यस्मादितिप्रभवः कारणं। प्रलीयतेस्मिन्निति प्रलयोविनाशकारणंचाह
मेवेत्यर्थः। तस्मान्मत्तःपरतरमन्यत्स्रष्टृ किंचिन्नास्तीत्यर्थः अतेनजगदुत्पत्त्यादिकारणत्वेसर्वोत्कृष्टत्वंचभगवन्महात्म्यंज्ञेयमिति
युक्तंभवति। अत्रभगवदवतारस्यैवहृत्सस्येतन्माहात्म्यमुच्यतइत्यतःप्रकृतसंगतिः ०७ गीतायांभगवदवतारेषुदोषदर्शिनां
निंदाश्रवणात्तत्रावताराणांनिर्दोषत्वंज्ञायतइत्याह। अवजानंतीत्यादिना। मानुषींतनुंधीतनुमाश्रित्यतत्रियामवत्वेनस्थितंमा
मवजानंति अवज्ञानंकुर्वंति अत्रहरेरवज्ञानेनाम। ब्रह्मरुद्रमादीनांसाम्यदृष्टिरनन्यता। प्रादुर्भावमतस्यापिदोषदृष्टिर
दराति। धर्मदिहावताराद्दोषैर्दुष्टम्प्रसंकरः। अवतारेष्विति ज्ञेयमवज्ञानंजनाईनइतिगी। तातात्पर्यनिर्णयोदाहृतभविष्य

अहंकृत्स्नस्यजगतःप्रभवःप्रलयस्तथा। मत्तःपरतरंनान्यत्किंचिदस्तिधनंजय ०७ अवजानंतिमांमूढामानुषीं
तनुमाश्रितंपरंभावमजानंतोममभूतमहेश्वरं ०० मोघाशामोघकर्माणोमोघज्ञानाविचेतसः। राक्षसीमासुरींचैव
प्रकृतिंमोहिनींश्रिताः ०९ महात्मानस्तुमांपार्थदैवींप्रकृतिमाश्रिताः। भजंत्यनन्यमनसोज्ञात्वाभूतादिमव्ययं ९०

त्यर्थवचनादनेकविधंज्ञातव्यं। कुतोवजानंतीत्यतउक्तं। मूढाइति। तदेवविवृणोति। परंभावमिति। ममभूतमहेश्वरंभूतानां
ब्रह्मादीनांमहेश्वरंपरंभावंस्वरूपमजानंतइत्यर्थः ०० तेषांफलमाह। मोघाशाइति। तेषामामुष्मिकफलाशाव्यर्थेत्यर्थः।
एवंकर्मज्ञानयोरपिआमुष्मिकफलविषयेमोघत्वंदृष्टव्यं। ऐहिकबुद्ध्यादिकर्मणांसफलत्वदर्शनात्सफलत्वदर्शनादिति
भावः। अवज्ञातेभूतकारणमाहाराक्षसीमिति। मोहनकंराक्षसासुरस्वभावमाश्रितायतइत्यर्थः ०९ देवस्वभावास्तु
नैवमित्याह। महात्मानस्त्विति। नविद्यतेभगवतोन्यत्रस्वातंत्र्यमिदमितिमनोयेषांतेऽनन्यमनसइत्यर्थः। भूतानांब्रह्मादी
नामादिंस्वयमनादिं। अव्ययंविनाशरहितंज्ञात्वाभजंतीत्यन्वयः ९०

ता०टी० पितासीत्यत्रापि भगवदवतारस्य बालस्य सर्वोत्कृष्टत्वादिकमेव ज्ञायते। लोकत्रयेपि त्वत्समो नास्ति अधिकः कुतो न कुतोपी
३५ त्यर्थः। अत्र हेतुत्वेन अप्रतिमप्रभावेति संबध्यते ९१ परं भूय इत्यत्र ज्ञानानां मध्ये उत्तमं ज्ञानं भूयः प्रवक्ष्यामीति प्रतिज्ञा यथ
तिस्तां तज्ज्ञानमुच्यते. ९२ मम योनिरिति। महद्ब्रह्मप्रकृतिर्महालक्ष्मीर्मम योनिर्भार्या तस्मिन्महति ब्रह्मणि गर्भं दधामि। त
तो गर्भात्सर्वभूतानां ब्रह्मादीनां संभव उत्पत्तिर्भवतीत्यर्थः। अनेन रमा ब्रह्मादिसर्वचेतनोत्कृष्टत्वमुक्तं भवति ९३ द्वा
विमौ पुरुषावित्यादिनापि भगवता बालेन स्वस्य सर्वोत्तमत्वकथनादयुक्तार्थः सिध्यतीत्युच्यते। लोके अवलोकने सति

पितासि लोकस्य चराचरस्य त्वमस्य पूज्यश्च गुरुर्गरीयान्। न त्वत्समोस्त्यभ्यधिकः कुतोन्यो लोकत्रयेप्यप्रतिमप्रभावः
॥९१ परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमं। यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः ९२ मम योनिर्महद्ब्रह्म तस्मि
न्गर्भं दधाम्यहं। संभवः सर्वभूतानां ततो भवति भारत ९३ द्वाविमौ पुरुषौ लोके क्षरश्चाक्षर एव च। क्षरः सर्वाणि भू
तानि कूटस्थोक्षर उच्यते ९४

द्वाविमौ प्रथितौ पुरुषौ चेतनौ। अथवा द्वावेवेत्युक्त्या त्रयः पुरुषव्यावृत्तिः प्रतीयते सा त्वनुपपन्ना परमपुरुषस्यापि विद्यमान
त्वादित्यतो द्वावेवेत्युक्तिघटनार्थं परमपुरुषं व्यावर्तयितुं लोके इत्युक्तं लोके दृश्यमानावेवेत्यर्थः। इमौ काविंत्यत उक्तं राम
क्षरश्चेति। चकारौ परस्परसमुच्चयार्थौ क्षरश्चाक्षरश्चेति द्वावेवेति संबंधः। तत्र क्षरशब्दार्थमाह। क्षरः सर्वाणीति। स ३५
र्वाणि भूतानि ब्रह्मादयो जीवाः क्षरः क्षरशब्दवाच्याः। कूटस्थो महालक्ष्मीरक्षरोऽक्षरशब्दवाच्योच्यते श्रुताविति शेषः।
अत्र ब्रह्मादिजीवाः सर्वेपि शरीरैः क्षराः। लक्ष्मीरक्षरदेहत्वादक्षरा तत्परो हरिरित्येवंजातीयका श्रुतिर्द्रष्टव्या ९४

यदर्थं पुरुषद्वयनिरूपणं कृतं तदाह। उत्तम इति। अन्यः क्षराक्षराभ्यां। न पुनरेतयोर्मध्ये कश्चित्पुरुषोत्तमः कल्पनीयः। तुशब्देन
तत्पुरुषद्वयापेक्षया तस्य महान्विशेषोऽस्तीति दर्शयति। तत्र श्रुत्यादिसंमतिमाह। परमात्मेति। आत्मशब्देनैतत्पर्यायः। तत
श्रुत्यादौ परमात्मा क्षराक्षरात्मकनिखिलचेतनोत्कृष्ट एव स्वदाहृत इत्यर्थः। तस्य पुरुषोत्तमत्वे युक्तिरप्यस्तीत्याह। य इति।
अत्र यत इत्युपस्कर्तव्यं। लोकत्रयशब्दः सर्वोपलक्षणं। तथा च यस्माल्लोकत्रयमाविश्य बिभर्ति तस्मात्तदपेक्षयोत्तमः। यो
हि यस्य धारणपोषणादिकर्ता स तस्मादुत्तमोऽस्तु त इति व्याप्रेरिति युक्तिरुक्ता भवतीति द्रष्टव्यं। लोकत्रयाविष्टस्य प्रलये लोक
त्रयनाशेन नाशप्रसक्तिं निवारयति। अव्यय इति। न चैतद्विरुद्धं देहाविष्टस्य देवदत्तस्य देहदाहे तद्दाहनियमदर्शनादित्यतो चिंत्ये

उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः। यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ॥१७॥ यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ॥१८॥ यो मामेवमसंमूढो जानाति पुरुषोत्तमं। स सर्वविद्भजति मां सर्वभावेन भारत ॥

ऐश्वर्ययोगाच्च विरोध इत्याह। ईश्वर इति ॥१७॥ अन्य इति सामान्येनोक्तं सोऽन्यः क इति विशेषजिज्ञासायां स्वप्रभावं तदुक्तमाहमेवेत्याह। यस्
मादिति। चशब्दः क्षरमित्यनेन संबध्यते। यस्मात्कारणादहं क्षरं चातीतोऽक्षरादप्युत्तमोऽतो लोके पौरुषेयागमे वेदे च पुरुषोत्त
मः प्रथितः प्रसिद्ध इत्यर्थः ॥१८॥ स्वोक्तपुरुषोत्तमत्वे स्वस्य तात्पर्यं द्योतयितुं पुरुषोत्तमत्वं जानतः फलमाह। यो मामिति। य ए
वमुक्तरीत्या नन्वश्वकर्णादिशब्दवत्संज्ञात्वेनेत्यर्थः। असंमूढः एतत्पुरुषोत्तमत्वमपारमार्थिकमिति संमोहवर्जितः पुमान्पुरु ति
षोत्तमं जानाति स सर्ववित्सर्वज्ञ इत्युच्यते। अस्यैव सर्वशास्त्रार्थपरत्वादिति भावः। एवं जानन्मामेव सर्वभावेन सर्वप्रकारे
ण भजतीत्यर्थः। भारतेत्यर्जुनं प्रति संबोधनं ॥

२

ता०टी० तै एतव योग्यायोपदेष्टव्यमित्याह। इतीति। गुह्यतमं शास्त्रमित्यनेन भगवतः स्वरूपोत्तमत्वमेव सर्वशास्त्रप्रमेयमित्यभिप्रैति। अत
२६ एव सर्वविदित्युक्तं। ननु सर्वविद्भजति मामेव च सर्वभावेन भजतीति फलद्वयमुक्तं तस्य कथं फलं सं[?]ष्टं ज्ञानप्राप्त्यादिरूपफलमस्मि
आवा दित्यत स्तत्साध्यं फलमाह। बुद्धिमान् स्यात् कृतकृत्यश्चेति। बुद्धिमान परोक्षज्ञानी कृतकृत्यो मुक्तः अत्र सर्वविदिति इदं शास्त्रमिति
मिति चोक्तत्वात्सर्वं पंचोरूपे यागमानां विज्ञोः सर्वोत्तमत्व एव महातात्पर्यमित्यादि सूचितं सती पतइ[?]लो[?]लवति। द्वौ भूत
द्वौ भूतसर्गावित्यत्रापि देवासुरविभागेन स्पष्टिद्वय सुत्वा सुरं सर्गं स्वभावं प्रतिविति प्रतिज्ञाय्या सुराणां तमङ्ख्याते। असत्
त्यमित्यादिना। तेऽसुरा असत्यं जगदाहुः कथमसत्यं यतोऽप्रतिष्ठं ज्ञानवाध्यं। जगतो पारमार्थिक वेर्ममी[?]कुलातसाधु[?]

इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ। एतद्बुद्ध्वा बुद्धिमान्स्यात्कृतकृत्यश्च भारत ॥ द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसु
र एव च। दैवो विस्तरशः प्रोक्त आसुरं पार्थ मे शृणु ॥ ९९ असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरं। अपरस्परसंभूतं
किमन्यत्कामहैतुकं १०० ॥

ज्ञानवाध्यत्वं हेतुमाहुरित्यर्थः। नन्वीश्वरनिमित्तकारणकत्वात्कथं जगदसत्यमाहुरित्यत उक्तं अनीश्वरमिति। ईश्वरनिमित्तकं
न भवतीत्याहुरित्यर्थः। तच्चेश्वराधिष्ठितादव्यक्तान्महत् महतोऽहंकार इत्यादिक्रमेणाजातं तत्र यत्तः कथमनीश्वरत्वमित्यत उ राम
क्तं अपरस्परसंभूतमिति। महतोऽहंकार इत्यादिक्रमेणैकस्मादेकस्योत्पत्तिं ताः न वैती[?]त्यर्थः। ननु जगत्सत्यं न भवति चेत्कि ३६
मत्यंतासदेवेति पृच्छति किमिति। उत्तरमाह। अन्यदिति। सदसद्भ्यामिति शेषः। सदसद्विलक्षणत्वादसत्यमाहुरित्यर्थः। ननु
परस्परसंभूतं न चेत्किं नित्यमेवोतस्वतो जातमिति प्रश्ने किमित्येतदावर्तनीयं। तस्याप्युत्तरमाह। कामहैतुकमिति। कामइ
तिकार्येणामविद्योपलक्ष्यते। कामो विद्या हेतुरुपादानं यस्य तत्कामहैतुकं अविद्याकल्पितमितिया[?]वत् १०० ॥ ॥

×तत्का रषा×

xतानाहमिति।५

एतांदृष्टिमवष्टभ्यनष्टात्मानोदृष्टचित्ताअतएवाल्पबुद्धयःदाऽज्ञानातउग्रकर्माणोभस्मवारणाद्ववैदिककर्मकर्त्तारःकलियुग
दौजगतःक्षयकारकाःअहितकारकाःस्वपरदेहाःपरात्रासर्यंतःप्रभवंतिजायंतइत्यर्थः १०१ सतःविंविषमासहमतमिसत
आह।ईश्वरइति।अभिमानेनाहमेवेश्वरःतमत्तोन्यईश्वरःपरमार्थतोस्तीत्यादिमन्यंतइत्यर्थः १०२ आत्मदेहेषु चान्योनियामको
स्तीत्युक्तेतदसहमानानास्येवान्योनियामकइतिमांप्रद्विषंतः।तत्रहेतुःअभ्यसूयकाइति।अभितःसर्वतःअसूयायेषांते
तथा।नन्वेवंद्विषत्सुतेषुत्वयोपेक्षैवत्वयाक्रियतेकिमित्यतआह।संसारेषुक्षिपामीतिसंबंधः॥ १०३ तत्रापिआसुरीष्वेवयो

एतांदृष्टिमवष्टभ्यनष्टात्मानोल्पबुद्धयःप्रभवंत्युग्रकर्माणःक्षयायजगतोहिताः १०१ ईश्वरोहमहंभोगीसिद्धोहंबलवान्सु
खी।आढ्योभिजनवानस्मिकोन्योस्तिसदृशोमया १०२ मामात्मपरदेहेषुप्रद्विषंतोभ्यसूयकाः।तानहंद्विषतःक्रूरान्सं
सारेषुनराधमान् १०३ क्षिपाम्यजस्रमशुभानासुरीष्वेवयोनिषु।आसुरींयोनिमापन्नामूढाजन्मनिजन्मनि।मामप्राप्यैवकौंतेयततोयांत्यधमांगतिं १०४ ॥ ॥ ॥

निषुक्षिपामीत्यर्थः।आसुरयोनिक्षेपणेनसिद्धंफलंदर्शयतिजन्मनिजन्मनिमूढाइति।ततोपिकिमित्यतआह।मामप्राप्यैवेति।
ततोधमांनिकृष्टांगतिंतमोलक्षणांयांतीत्यर्थः।अत्रयेअभिमानेनमन्यंतेपरमेशोहमित्यपिमिथ्याजगदिदंसर्वंभ्रमजत्वान्न
तिमिथ्यात्वान्नेश्वरोस्यास्तिपरेभ्योनचजायते।स्वस्मिन्नपितथान्यस्मिन्नियंतान्यइतीरिते।प्रद्विषंत्यसुरास्तेतुसर्वेयांत्य
धरंतमइतिब्रह्मवैवर्तवचनमपीमनमेनार्थंसंवादयतीतिप्रच्छन्नबौद्धानांमायिनामेवमतंनिंद्यतइतिनिष्कृष्टोयंतइति
भावः १०५ ॥ ॥

ता०टी०
३०

विष्णोः सर्वोत्तमत्वात्सर्वं कर्म विष्णुप्रीत्यैव कार्यमित्यत्र गीतावाक्यमुदाहृतं सर्वेति । ३ २

नन्वेतदक्षरमतं चेत्सात्त्विकं मतं कीदृशमित्यपेक्षायामुच्यते । सर्वभूतेष्विति । विभक्तेषु विस्तुनापरस्परं चात्यंतविलक्षणेषु सर्वेषु भूतेषु
विद्यमानेषु जीवजडात्मकेषु पदार्थेषु नियामकत्वेन विद्यमानमविभक्तं स्वगतभेदरहितं अव्ययं भावं पदार्थं येन ज्ञानेनेक्षते
विषयीकुर्वीतेति ज्ञानं सात्त्विकं विद्धीत्यर्थः १०५ सर्वगुह्यतममित्यत्र ते हितं गुह्यतमं वचो वक्ष्यामीति ब्रूतेवृत्तिप्रतिज्ञायां
इच्यते मन्मना इति । अत्र मन्मनस्त्वादि नाम त्वा प्रियेव भविष्यतीत्युक्त्या विष्णोः सर्वोपास्यत्वं सर्वप्राप्यत्वादि महत्त्वमहात्म्यं
वोच्यते इति प्रकृतोपयोगः १०६ १०७ एवं ज्ञानं तेह मित्याद्युदाहृतगीतावाक्यपर्यालोचनया शेषभारतस्य भगवदुत्कर्ष
एव तात्पर्यमिति त्ववगम्यते इत्युक्तं इदानीं मोक्षधर्मे भगवदेकनिष्ठपंचरात्रप्रशंसाकरणान्यथानुपपत्त्यापि भारतस्य त

सर्वभूतेषु येनैकं भावमव्ययमीक्षते । अविभक्तं विभक्तेषु तज्ज्ञानं विद्धि सात्त्विकं १०५ सर्वगुह्यतमं भूयः शृणु मे परमं वचः ।
इष्टोसि मे दृढमिति ततो वक्ष्यामि ते हितं १०६ मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु । मामेवैष्यसि सत्यं ते प्रतिजाने प्रि
योसि मे १०७ पंचरात्रस्य कृत्स्नस्य वक्ता नारायणः स्वयं । सर्वेषु तेषु राजेंद्र ज्ञानेष्वेतद्विशिष्यते १०८ ॥ ॥

देकनिष्ठत्वमवसीयत इत्यपि प्रेत्य मोक्षधर्मवचनान्युदाहरति पंचरात्रस्येति । मोक्षधर्मे हि सांख्यं योगः पाशुपतं वेदारण्यकं
[illegible] वचानि ज्ञानान्येतानि भिन्नानि नात्र कार्या विचारणेति । अत्र कपिलहिरण्यगर्भशिवप्रणीतानां पाशुपतादीनां । वेदारण्यकं स्वयं
व्याख्यातां वेदपंचरात्रादयो वसदागमानां च ज्ञानसाधनत्वेन सानशाख्याख्यानांमिन्नानीति परस्परविरोधित्वमुक्त्वा पंचरात्रस्य
कृत्स्नस्य त्वतेन पंचरात्रस्य पाशुपताद्यपेक्षया वैशिष्ट्यालक्षणं प्रामाण्यमुच्यते । तत्र हेतुः पंचरात्रस्येति । पूर्वार्धेनोच्यते
। यस्मादित्युपस्कर्तव्यं तस्मादेतेषु सर्वेषु ज्ञानेषु पाशुपतादिषु एतत्पंचरात्राख्यं ज्ञानं विशिष्यत इति हितो पार्थैस[illegible] । अ
त्र विरोधिसिद्ध्यन्यतरत्निंदाप्यर्थतो लभ्यते । राजेंद्रेति जनमेजयं प्रति वैशंपायनस्य संबोधनं १०८

×ज्ञानसाधनेषु र

राम
३०

एतेषु ज्ञानेषु ज्ञानसाधनेषु शास्त्रेषु यथायोगं योगमनतिक्रम्य योगेन यथान्यायं यथायुक्तमादित्याये नापि
नारायणः परः उत्कृष्ट इति निष्ठाज्ञेयवस्तु भवति। निष्ठेति हर्षेण वस्तु यानि य निष्ठानं न्याये आदिपद इत्याह योगेनैतेषामपि विशेषमुपपन्नता ये
न्त्वेवं पंचरात्रस्यैव वैशिष्ट्ये सांख्यादीनामप्रामाण्ये च सांख्यादिषु तत्किमप्युपादेयं न स्यात्। न चैवं वक्तुं शक्यं। सांख्यादिशास्त्रादिप्रदेशे तिभावः १२
विशेषेषु विस्तृतत्वकर्मस्य प्रतीयमानत्वादित्यत आह। ज्ञानेष्वेतेष्विति। एषां यत्र विरोधः स्यात्तत्रैतं तत्र नार्यते। अन्यशास्त्रेषु प
रमो विष्णुरुच्यत इति पर्वाध्यायोदाहृतवाक्यबलात्सांख्यादिष्वपि यो ऽशो विष्णौ योजयितुं शक्यस्तेषु यथोपक्रमादित्यायोपे
तस्तत्र नारायण एव परो निष्ठा। तदंशस्य नारायणस्यैव सर्वोत्कृष्टत्वेन निरतिशयपर्यवसानमित्यर्थः। यद्वा ऽयोग्यजनव्यामोहना
यप्रणीतानां तेषां तन्मात्रपर्यवसानाद्भगवदुत्कर्षविरोधित्वमेव तास्तात्पर्यः। तत्त्वज्ञानायोग्येषु विपरीतज्ञानजनकत्वेन ता
त्वमेव रहितमिति भगवन्माहात्म्यमेव प्रकटितं स्यादिति भावः १०९ पंचरात्रस्यैव वैशिष्ट्ये हेतुमाह। पंचरात्रविद इति। य

ज्ञानेष्वेतेषु राजेंद्र सांख्यपाशुपतादिषु। यथायोगं यथान्यायं निष्ठा नारायणः परः १०९ पंच
रात्रविदो मुख्या यथाक्रमपरा नृप। एकांतभावोपगता वासुदेवं विशंति ते ११० जनमेजय
उवाच बहवः पुरुषा ब्रह्मन्नुताहो एक एव तु। को ह्यत्र पुरुषः श्रेष्ठस्तं भवान्वक्तुमर्हति १११ ॥

यथाक्रमपरा देवतातारतम्ये तात्पर्यवंतः। एकांतभावेनाव्यभिचरितभक्त्योपगताः अत एव मुख्या भवंतीत्यर्थः। महात्म्यज्ञानपूर्वकं
दृढस्नेहजनक ज्ञानमोहे हेतुत्वात्पंचरात्रस्य वैशिष्ट्यमिति भावः ११० भारतस्य वाक्यांतरपर्यालोचनयापि अशेषभारत
स्य विष्णोः सर्वोत्तमत्वे तात्पर्यमवसीयत इत्यभिप्रेत्य वाक्यांतरमुदाहरति। बहव इति। पुरुषा इत्यादिना। तत्र वैशंपायनं प्रति ज
नमेजयस्य प्रश्नः। हे ब्रह्मन् वैशंपायन पुरुषा आत्मानः किं बहवो भिन्ना उताहो एक एवात्मेति। तत्रैकात्म्यमतं अप्रामाणिकत्वा
मतभवविरुद्धं चेति द्वितीयं पक्षं स्वयमेव परिहृत्य प्रामाणिकत्वादाद्यमंगीकृत्य वैतत्रापि जनमेजयः पृच्छति। को हीति॥
अत्र बहुषु पुरुषेषु अंगीक्रियमाणेषु अधिकः पुरुषः श्रेष्ठः श्रेष्ठं ६ पुरुषं विविच्य भवान्वक्तुमर्हतीति १११ ॥ ॥ ॥

ता०टी०
३८

२

एवं एवं तं राजानं प्रति वैशंपायनः परिहारं वदिष्यन् राजानंगीकारे प्रामाणिकसंमतिं दर्शयति। एकमेव पुरुषमिच्छंतीति यत्तदेतत्र पुरुषमि
त्यर्थः। यद्वा प्रामाणिका एतत्र द्वितीयपक्षोक्तं नेच्छंति नांगीकुर्वंति। एतदिति सामान्यतः परामृष्टं विशिष्य दर्शयति। पुरुषमेकमिति
एक एवात्मेत्येतन्मतं प्रामाणिका नांगीकुर्वंतीति भावः। किं तर्हि बहवः पुरुषाः संति तेषां बहूनां पुरुषाणां यथैका योनिरेक एव पु
रुषः कारणं भवति। तथा तं सर्वगुणाधिकं पुरुषमाख्यास्यामीत्याह। बहूनां पुरुषाणामिति २२ किंच परमात्मेतब्रह्मणा शि
वायायमेवार्थ उक्तस्ततो र्थसमाख्ययापि भारतस्य तत्रैव तात्पर्यमवसीयत इत्याह। आहेति। इममेवार्थं पृच्छते महादेवाय ब्रह्मा

वैशंपायन उवाच नैतदिच्छंति पुरुषमेकं कुरुकुलोद्वह। बहूनां पुरुषाणां च यथैका योनिरुच्यते। तथा तं पुरुषं
विश्वमाख्यास्यामि गुणाधिकं २२ आह ब्रह्मैतमेवार्थं महादेवाय पृच्छते। तस्यैकस्य ममत्वं हि स चैकः पुरुषो
विराट् २३ अहं ब्रह्मा चाद्य ईशः प्रजानां तस्माज्जातस्त्वं च मत्तः प्रसूतः। मत्तो जगत्स्थावरं जंगमं च सर्वे वेदाः
सरहस्याश्च पुत्र २४ ॥ ॥

चतुर्थ एव एतमेवार्थमाह। तमेवार्थं दर्शयति। तस्येति तस्य त्रिलोकेकस्यैवममत्वमहमेकः स्वतंत्रः इतरत्सर्वं विश्वं ममममदीयमिति
मत्वनात् तस्यास्वतंत्रत्वादित्यर्थः। तस्यैकस्यैव ममत्वं कुतस्त्यं तत्राह। सचैक इति। स एक एव पुरुषः परोधिगुणः। अनेन
कः स्वतंत्रो यस्मादित्यर्थः २३ न केवलमेतावत् किंतु ब्रह्मा ब्रह्मणामकः प्रजानामाद्य ईशश्चाहं तस्माद्विष्णोर्जात उक्तः। ननु
विष्णोस्त्वं जात इत्येतावता किं विष्णोर्महत्त्वमागतमित्यत उक्तं। त्वं चेत्यादि। न केवलं त्वं प्रसूतः। किंतु स्थावरजंगमात्मकं जगत् सर
हस्याः सर्वे वेदाश्च मत्त एव प्रसूता इत्यर्थः। पुत्रेति ब्रह्मसूतं संबोधनं महादेवं प्रति २४ ॥ ॥ ॥

राम
३८

तथैतदर्थप्रतिपादकं भीष्मवचनं विष्णोः सर्वोत्तमत्वे प्रमाणमस्तीत्याह। तथैवेति। तदेव वचनं दर्शयति। ब्रह्मेति। सर्वदा समेतैर्व्याख्यातुं गुणाः समेत्य मि-
लित्वा व्याख्यातुं ब्रह्मादिभिर्यद्गुणाः शक्याः यस्य कृष्णस्य गुणैकदेशोऽवसाययितुं एतावानिति निश्चाययितुं न शक्यत इत्यर्थः ११५ स एव कृष्णो
भगवान् न मानुषो मनुष्यमात्रं न भवतीत्यर्थः। अनेन ब्रह्माद्यविदितानंतगुणत्वमप्राकृतविग्रहत्वादिकं च महत्त्वमस्तीत्युक्तं भवति। तथा
स्य कृष्णस्य ब्रह्माद्युत्पादकत्वमप्यस्तीत्याह। यस्येति। यस्य कृष्णस्य प्रसादतः प्रसादाज्जातो ब्रह्मा। रुद्रश्च क्रोधसंभवः क्रोधात्संभवः
उत्पत्तिर्यस्य सोऽतथोक्तः ११६ एवं भगवता श्रीकृष्णेनापि स्वस्य ब्रह्माद्याधारत्वे सत्यनन्याधारत्वमुक्तमस्तीति प्रतिज्ञायतद्वाक्य

तथैवं भीष्मवचनं धर्मजं प्रत्युदीरितं। ब्रह्मेशानादिभिर्देवैः समेतैर्यद्गुणांशकाः। नावसाययितुं शक्यो व्याचक्षाणोऽपि सर्वदा ११५ स ए-
व भगवान् कृष्णो नैव केवलमानुषः। यस्य प्रसादजो ब्रह्मा रुद्रश्च क्रोधसंभवः ११६ वचनं चैव कृष्णस्य ज्येष्ठं कुंतीसुतं प्रति। रुद्रं
समाश्रिता देवा रुद्रो ब्रह्माणमाश्रितः। ब्रह्मा मामाश्रितो नित्यं नाहं कंचिदुपाश्रितः ११७ यथाश्रिता नि ज्योतींषि ज्योतिः श्रेष्ठं
दिवाकरं। एवं मुक्तगणाः सर्वे वासुदेवमुपाश्रिताः ११८ भविष्यत्पर्वगं चापि वचो व्यासस्य सादरं। वासुदेवस्य महिमा भार-
ते निर्णयोदितः॥ तदर्थाः स्तुकथाः सर्वे नान्यार्थं नैकवचनं यथाः ११९ ॥ ॥ ॥ ॥ ॥

मुदाहरतीति। वचनं चेत्यादिना। देवा इंद्राद्याः स्पष्टोऽर्थः ११७ ननु संसारे भेदसद्भावेन ब्रह्माद्याधारत्वेऽपि मुक्तौ भेदाभावान्न तदाधारत्व-
मित्याशंक्य तत्रापि ब्रह्मादिमुक्तगणानां भगवानेवाधार इति सदृष्टांतमाह। यथेति ११८ तथा भविष्यत्पर्वगतमपि व्यासस्य सतात्प-
र्यं विष्णोः सर्वोत्तमत्वप्रतिपादकं वचनमस्त्यतो शेषभारतस्य तत्रैव तात्पर्यमवगम्यत इत्याह। भविष्यदित्यादिना। यस्मान्न यावा-
सुदेवस्य महिमा महत्त्वं सर्वोत्कृष्टत्वमिति यावत्। भारते निर्णयेनोदितः। तस्माच्चान्यकथाः सर्वास्तदर्थाः भगवन्महिमार्था वैष्ण-
वैकयशोतान्यार्था किंतु स्वप्रधानमेव ११९ ॥ ॥

2

ता० टी० ३९

तस्मात्तत्प्रतीपं तस्मैस्य विष्णुसर्वोत्कृष्टत्वस्य यत्प्रतीपं विरुद्धं दृश्येत तत्र आपाततः प्रतीत्यावगतं तत्तन्मम मनीषितमभिप्रेतं न भवेत् भाषाद्वयपरिज्ञानापराधेनापाततः प्रतीयमानोऽप्यर्थो न मदभिप्रायविषय इत्यर्थः १२० ननु तत्र प्रतीपदर्शनमेव कथं स्यादित्यत आह। भाषा इति। भाषात्रयेण मया भारतं प्रवर्तितं तत्र भाषापरिज्ञानाभावे आपाततोऽन्यथाप्रतीतिसंभवादिति भावः। तत्र कया भाषया किमुक्तमिति दर्शयिष्यन् भाषात्रयस्वरूपं निर्धारयति। उक्त इति। यो विष्णोर्महिमा सर्वोत्कर्षः स तु समाधिभाषयोक्त इति ज्ञातव्यमित्यर्थः। अनेन विष्णुमहिमप्रतिपादकभाषा समाधिभाषेत्युक्तं भवति १२१ दर्शनभाषया किमुक्तमित्यत आह। शैवेति शैवी।

तत्प्रतीपं वय दृश्येन्न तन्मम मनीषितं १२० भाषास्तु त्रिविधास्तत्र मया वै संप्रदर्शिताः। उक्तो यो महिमा विष्णोः स
तूक्तो हि समाधिना। १२१ शैवदर्शनमालंब्य क्वचिच्छैवी कथोदिता समाधिभाषयोक्तं यत्तत्सर्वं ग्राह्यमेव हि १२२
अविरुद्धं समाधेस्तु दर्शनोक्तं च गृह्यते। आद्यंतयोर्विरुद्धं यत्तद्दर्शनं तदुदाहृत १२३ ॥ ॥ ॥

शिवस्य विद्यमाना कथा तस्योत्तमत्वप्रतिपादिका वा या उक्ता सा दर्शनभाषयेति वाक्यशेषः। उक्तत्वाविशेषादुभयमपि ग्राह्यमित्यागतमित्यत आह। समाधेति १२२ सर्वं ग्राह्यमित्युक्त्या दर्शनभाषयोक्तं किंचिद्ग्राह्यमिति प्रतीतं तत्स्पष्टयति। अविरुद्धमिति। समाधिभाषयोक्तस्यार्थस्याविरुद्धं चेत्तद्दर्शनभाषयोक्तमपि ग्राह्यमेव तद्विरुद्धं तु न ग्राह्यं पूर्वोत्तरविरुद्धत्वात्। अनेन पूर्वोत्तरविरुद्धार्थप्रतिपादकभाषा दर्शनभाषेति सूचितं तल्लक्षणं स्पष्टमाह। आद्यंतयोरिति। आदावुपक्रमे विष्णोः सर्वोत्तमत्वमंते उपसंहारे वा तदेव मध्ये चैतद्विरुद्धं शिवस्योत्तमत्वमुच्यते तद्दर्शनभाषयोक्तमित्यवगंतव्यमित्यर्थः १२३॥ ॥ ॥

राम

राम

३९

दर्शनांतरसिद्धंचेत्यनेनदर्शनभाषयालक्षणांतरमुच्यते।यथाभाष्योक्तंप्रमेयंविरोधिदर्शनांतरसिद्धंसापिदर्शनभाषेत्यर्थः।सुत्त्यभा
षास्वरूपमाह।सुत्त्येति।अन्यथाप्रतीयमानार्थादन्यार्थप्रतिपादिकाभाषासुत्त्यभाषेत्यर्थः।सायथा।उच्छिष्टंशिवनिर्माल्यंवांतंचमृ
तकर्पटं।काकविष्ठासमाभुक्तंपंचरत्नानिभारते।इति।अत्रोच्छिष्टं एतन्नमित्यापाततः प्रतीयतेतच्चविरुद्धंअतोवत्सोच्छिष्टंवत्सपी
तंक्षीरंएतन्नमितिप्रतीयमानार्थादन्यार्थप्रतिपादनसुत्त्यभाषयाकृतं।यथाशिवनिर्माल्यस्यायात्य त्वेपितच्छब्देनांगाह्रुदक
मेवकथ्यते।तथावांतंमधिकावमनंमध्वेवकथ्यते।तथामृतकर्पटंकौशेयमेवकथ्यते।तथाकाकविष्ठासमाभुक्तंमरकतादिकामे
वयात्यं।नान्यदितिद्रष्टव्यं।एवंवासुदेवस्यमहिमाभारतेनिर्णीयोदितइत्युक्तमुपपाद्योपसंहरति।तस्मादिति १२४ एवंतावत्त्रि

दर्शनांतरसिद्धंचसुत्त्यभाषान्यथाभवेत्।तस्माद्धि सोर्हिमहिमाभारतोक्तोयथार्थतः १२४ तस्यांगंप्रथमंवाद्युः
प्रादुर्भावत्रयान्वितः॥प्रथमोहनुमान्नामद्वितीयोभीमएवच।पूर्णप्रज्ञस्तृतीयस्तुभगवत्कार्यसाधकः १२५

नीता
र्णयाच्चक्षमीतिवक्तव्यत्वेनप्रतिज्ञातेषुनिर्णयेषुविश्लोः सर्वोत्कृष्टः स्वरूपनिर्णयः कृतः॥इदानींवाद्यादीनामंगभूतारतस्यक्रमेण
स्वरूपनिर्णयमाह।तस्यांगमित्यादिना।वाद्युस्तस्यहरेः प्रथममंगंप्रधानसाधनं।नकेवलंमृत्तरूपेणप्रधानांगत्वंकिंत्वव
ताररूपेणापीत्याह।प्रादुर्भवितेति।तदवतारत्वयंदर्शयति।प्रथमइति।अंगत्वस्वरूपकथनार्थमुक्तंभगवत्कार्यसाधककार
तिसर्वत्रसंबध्यते।भगवतिवलकार्येज्ञानकार्येचप्रवृत्तेसतितत्प्रधानसाधनत्वात्सर्वाधिकाद्वितीयोवायुरेवेत्यर्थः १२५

ता०टी० ४०

२

नन्वेतदवतारत्रयं वायुना कदा कृतमित्यत आह। त्रेताद्येष्विति। त्रेताद्येषु त्रिषु युगेषु एकैकशः। एकैकस्मिन्युगे पृथक्पृथक् एकैकावतारक्रमे
णाकेशवाज्ञया संभृतत्यर्थः॥ एवं प्रधानांगत्वेन वायुमुक्त्वा तदनंतरभावत्वेन सरस्वतीमाह। द्वितीयांगमिति। अत्र सरस्वतीश
ब्दोत्त भारतीमप्युपलक्षयति। अत एव पूर्वं वायुशब्देन ब्रह्मापि यात्वित्यादि इति सूचितं १२६ ननु द्वितीयांगत्वेन श्रीः कुत्रचिदभि
धीयते तस्य कांगतिरित्याशंक्य तत्रत्यश्रीशब्दार्थमाह। शंरूपइति। शंरूपे सुखस्वरूपे वा यौ रतेः रमणात् श्रीमित्तात् सरस्वत्येव
श्रीरिति कीर्त्यते। तस्मात्क्वचिद्यो द्वितीयांगत्वाभिधायकवचनेषु श्रीशब्देन सरस्वत्युच्यते तेन न विरोध इत्यर्थः। यथा च वायोरव
तारस्वरूपेणापि प्रधानांगत्वं तथा भारत्या अपि अवतारस्वरूपेणापि द्वितीयांगत्वं पूर्वोत्तरीत्या वैराग्युत्पत्तिहेतुत्वादित्यभिप्रे

त्रेताद्येषु युगेष्वेवं संभृतः केशवाज्ञया। एकैकशस्त्रिषु पृथक् द्वितीयांगं सरस्वती १२६ शंरूपे तु रतेर्वा यो श्रीरित्येव
च कीर्त्यते। सैव च द्रौपदी नाम काली चंद्रेति चोच्यते १२७ तृतीयांगं हरेः शेषः प्रादुर्भावसमन्वितः। प्रादुर्भावांतरस्यैव लक्ष्म
णो बल एव च १२८ रुद्रात्मकत्वाच्छेषस्य शुको द्रौणिश्च तत्तनुः। इंद्रेतरांशसंपत्त्या पार्थोपीशन्नदात्मकः १२९ ॥ ॥

त्याह। सैवचेति १२७ एवंभूतपूर्वगत्या भारत्यादिरूपायाः सरस्वत्या द्वितीयांगत्वमुक्त्वा तदनंतरत्वेन तृतीयभावत्वेन शेष
माह। तृतीयांगमिति। शेषस्य प्रादुर्भावानाह। प्रादुर्भावा इति १२८ तथा च पूर्ववदेव मूलरूपवदवताररूपाणामपि तृतीयांग
त्वमस्तीति। न केवलमेतदवतारत्रयेण किंतु कयाचिद्विवक्षयावतारांतरेणापि तृतीयांगत्वं शेषस्येत्याह। रुद्रात्मकत्वादिति
। रुद्रस्य सतत्त्वकल्पे शेषत्वाज्ञाविभावेन नाज्ञदाती शेषस्य सतः पूर्वं रुद्रत्वाद्वा भूतपूर्वगत्या शुकाश्वत्थाम्नोरपि शेषाव
तारत्वेन तृतीयांगत्वमेवेति भावः। क्वचिदिंद्रस्यापि तृतीयांगत्वोक्तिरस्ति तस्या अभिप्रायमाह। इंद्रेति। अर्जुनेनेतरांशाभिप्रा
ईदृःईडालिन्न ईद्रावतारोपि पार्थः अर्जुनः शेषनद्धात्मकः तत्र × येणाइंद्रस्य तृतीयांगत्वोक्तिरिति भावः १२९ ॥ ॥
स्मशेषस्यात्मकः स्वरूपस्तेन तृतीयांगमिति।

राम ४०

अन्यथातपार्थोद्यात्मनाप्रादुर्भूतांशांशहरेस्तत्तद्योगत्वेनद्रष्टव्याइत्याह। प्रद्युम्नाद्याइति। अत्रप्रद्युम्नस्यकामावतारत्वान्नद्वहर्णेने
ऽपिगृहीतएवेतिद्रष्टव्यं। ततःपंचमत्वोदितावप्यात्रममतिरुद्धाद्याद्रष्टव्याइत्याह। क्रमेणत्विति। ननुविष्णोःसर्वोत्तमत्वेएव
सर्वशास्त्रप्रामाण्येसर्वेषुशास्त्रेषुतदेववक्तव्यंतत्रतत्रतारतम्यक्रमेणांशभूतानांदेवानांमहिमात्रमःकिमर्थंकथ्यतइत्यत
आह। चरितमिति। विष्णुसंबंधितांदेवानांगुणकर्मादिवर्णनस्यापिभगवन्महिमावर्णनोपयोगित्वात्तत्रैवतात्पर्यमिति
भावः। अनेनतदर्थास्तुकथाःसर्वाएतद्धिवृत्तंभवति १३० एवंतस्यांशभूतमित्यादिनावाद्यादीनामंशभूतानांस्वरूपंनिरूप्यपु
नर्भगवदवतारेषुनिर्दोषत्वंयत्प्रतिज्ञातंतदेवश्रीभागवतादिवचनेनापिद्रढयति। तथाभागवतेपीति। तदेवर्किंपुरुषस्वं

प्रद्युम्नाद्यास्ततोविष्णोरंशभूताःक्रमेणहि। चरितंवैष्णवानांतुविस्तृदेकायकथ्यते १३० तथाभागवतेप्युक्तंहनूमद्वच
नंपरं। मर्त्यावतारस्त्विहमर्त्यशिक्षणंरक्षोवधायैवनकेवलंविभोः। कुतोस्यहिस्युरमतःस्वआत्मन्सीताकृतानिव्यस
नानीश्वरस्य १३२ ॥ ॥

इत्यन्वस्तूपदिष्टंहनुमद्वचनंपठति। मर्त्यावतारस्त्विति। विभोर्नारायणस्यइहलोकेमर्त्येषुअवतारोनकेवलंरक्षःसंहा
रणादीनामर्थायैवजातः। किंतर्हिमर्त्यशिक्षणांप्रयोजनमुद्दिश्यापि। विषयासक्त्यातद्वियोगजन्यमहद्दुःखंस्यात्तस्मादतोभा
र्यादिविषयेष्वासक्तिर्नकर्तव्येतिमनुष्यान्शिक्षयितुंचावतारःजातइतिभावः। अतएवसीतावियोगजसंतापादिकंजा
तमित्यसातांप्रदर्शितंवस्तुतस्तुतन्नास्त्येवेत्याह। कुतइति। स्वेआत्मन्स्वस्वरूपेरमतोरममाणस्यरामस्यसीताकृतानि
सीतावियोगजसंतापादिरूपाणिव्यसनानिकुतएवस्युर्नकुतोपीत्यतस्तत्प्रदर्शनस्यमर्त्यशिक्षणार्थत्वान्नत्वतीतिभ्रांति
रितिभावः १३२

×प्रदर्शितमित्यतस्तथा ५

एतदेवविवृणोतिनवाइति। आत्मवतांधीराणांआत्मास्वामीअधीश्वरोवासुदेवोभगवान्दुःखंनभुंक्तेहियस्मात्तस्मात्स्त्रीकृतं
सीताप्रतिकृतिवियोगकृतंकश्मलंनाश्नुवीत। कोपादिदोषाभावादेवलक्ष्मणंचनजहात्यपि। अत्रहृदयंसीताद्यरिप्रवेशितदु
तिकोपेनलक्ष्मणःपरित्यक्तइतिरामायणोकथास्तिसापिदुष्टजनमोहनार्थमेवप्रवृत्तेतिभावः १३२ इतोपिनरामस्यदुःख
संभावनानास्तीत्याह इहन्नमानायत्यादर्पकजेति। यद्वरणापद्मरेणसेवकानांप्राणिनांसर्वाणिदुःखानिनाशंयांति। तस्यक
तोदुःखसंभावनापीत्यर्थः। तर्हिकिमर्थंतथाप्रदर्शनंतस्यप्रयोजनद्वयमाह। सत्वस्थेति। जनानांदुर्जनानांमोहनायेत्येकं

नवैसआत्मात्मवतामधीश्वरोभुंक्तेहिदुःखंभगवान्वासुदेवः। नस्त्रीकृतंकश्मलमश्नुवीतनलक्ष्मणंचापिजहातिकर्हि
चित् १३२ यत्पादपंकजपरागनिषेवकाणांदुःखानिसर्वाणिलयंप्रयांति। सत्वस्थितंह्यचरणोजनमोहनायस्त्रीसं
गिनामितिरतिंप्रथयंश्चचार १३३ क्वचिच्छिवंक्वचिद्विष्णुंक्वचिद्देवान्क्वचिन्नरान्। नमत्यर्चयतिस्तौतिवरान
र्पयतेपिच १३४ लिंगंप्रतिष्ठापयतिद्वाणोत्यसुरतोवरान्। सर्वेश्वरःस्वतंत्रोपिसर्वशक्तिश्चसर्वदा। सर्वज्ञोपिवि
मोहायजनानांसुरूपोत्तमः १३५ तस्माद्योमहिमाविष्णोःसर्वशास्त्रोदितःसहि। नान्यदित्येवशास्त्राणांनिर्णयःसमुदाहृतः १३६

प्रयोजनंस्त्रीसंगिनामितिरतिंविरतिंइत्युक्तप्रकारेणदुःखसाधनभूतांरतिंलोकेप्रथयन्नितिद्वितीयंप्रयोजनमितिभावः
१३३ एतद्भागवतोक्तमेवसमाख्यावाक्येनापिद्रढयति। क्वचिच्छिवमित्यादिना। नमतीत्यादिकंक्वचिच्छिवमित्यादौसर्व
त्रप्रत्येकंसंबध्यते। विमोहायेत्यत्रहेतुः। सर्वेश्वरइत्यादि १३४ १३५ एवंदृष्टपक्षदृष्टग्रंथेषुविचार्यमाणेष्वयंनिर्णयः
संपन्नइत्याहतस्मादिति १३६ ॥ ॥

तत्रापिभारतस्यभगवदेकनिष्ठत्वात्सर्वशास्त्रोत्तमत्वंयदुक्तंतदुपपादयितुंभारतप्रतिपाद्यमर्थत्रयमाह। भारतार्थइति। तात्येवभग
वद्वाक्यानिपठतिमन्वादानि। केचिद्व्याख्यातारोभारतंमन्वादीतिब्रुवतोमन्वादिसंज्ञकार्थप्रतिपादकंव्याचक्षते। अपरेचभा
रतंआस्तिकादिब्रुवते। आस्तिकादिसंज्ञकार्थप्रतिपादकंव्याचक्षतेति। अन्येचभारतमुपरिचरादीतिपरिचक्षतेतत्सं
ज्ञकार्थप्रतिपादकंव्याचक्षतइत्यर्थः १३७ केतेत्रयोर्थाइत्यतोनंतरमुद्दिष्टस्याप्यास्तीकाद्यर्थस्यशब्दशक्त्याप्रथ
मप्रतीतेरितरयोरर्थयोस्तदधीनप्रतीतत्वेनप्राधान्यात्प्रथमतस्तमाह। सकृष्णाविति। कृष्णेनसहवर्त्तमानान्पांडवान्स

भारतार्थस्त्रिधाप्रोक्तःस्वयंभगवतैवहि। मन्वादिकेचिद्ब्रुवतेह्यास्तिकादितथापरे। तथोपरिचराद्यन्येभारतंपरिच
क्षते १३७ सकृष्णान्पांडवान्ह्येषयोयमर्थःप्रवर्त्तते। प्रातिलोम्यादिवैचित्र्यात्तमास्तीकंप्रचक्षते १३८ धर्म्मो
भक्त्यादिदशकःश्रुतादिशीलवैनयौ। सब्रह्मकास्तुतेयत्रमन्वादिंतंविदुर्बुधाः १३९ ॥ ॥ ॥ ॥

एत्वप्रपत्वह्यधिकृत्ययोयमर्थःप्रवर्त्ततेशब्दशक्त्यैवसर्वसाधारण्येनप्रतीयते। तत्रापिविशेषोस्तीत्याह। प्रातिलोम्यादिवै
चित्र्यादितिव्यत्यासः प्रातिलोम्यगोमूत्रीत्यादिसपद्मकप्रकारभेदादित्यर्थः। तत्रापिपुरुषकालादिभेदेनव्यत्यासादेर्बहुप्रका
रत्वमत्रैवग्रंथेभागवत्यादेर्लेशतोदर्शितं। प्रातिलोम्यादिभेदेनापाततःप्रतीयमानोयोर्थस्तमर्थमास्तीकसंज्ञमाचक्षतइ
तिभावः १३८ मन्वादिसंज्ञमर्थमाह। धर्मइति। धर्मोनिवृत्तिधर्मःभक्त्यादिदशकोवक्ष्यमाणः। श्रुतंश्रवणंमादिर्यस्यमनना
देरसौतथोक्तः। शीलंस्वभावः। वैनयोविनयः। केतेधर्मादिपदार्थाइत्यतस्तदभिमानिनोब्रह्माद्याएवेत्याह। सब्रह्मकाइति
। एवमध्यात्मंप्रतीयमानोयोर्थस्तंमन्वादिसंज्ञंबुधाज्ञानिनोविदुरित्यर्थः १३९

श्रौपरिचरार्थं दर्शयति। नारायणस्येति पदवर्णस्वरसमन्वयेन सर्वाणि वचनानि नारायणस्य नामानि संपाद्य तस्य नारायणस्य
नामानि संपाद्य तस्य नारायणस्य सामर्थ्यानि वायकानीति योयमर्थस्तं मौपरिचरं विदुरित्यर्थः १५० तत्रत्रास्तिकाद्यर्थस्य
मनुष्योत्तमादिस्वावारणत्वेपि वोढुं शक्यत्वादुपरिचराद्यर्थस्य सर्वाधिकारित्वान्मन्त्राद्यर्थस्य तु सर्वाधिकारित्वे
नतमेव लेशतः स्पष्टयितुमाह। भक्तिर्ज्ञानमिति। भक्त्यादिदशक इत्युक्तस्येदं व्याख्यानं। अत्रायमाशयः। यस्मिन्प्रकरणे

नारायणस्य नामानि सर्वाणि वचनानि तु। तत्सामर्थ्याभिधायीनि तं मौपरिचरं विदुः १५०
भक्तिर्ज्ञानं सवैराग्यं प्रज्ञा मेधा धृतिः स्थितिः। योगः प्राणो बलं चैव वृकोदर इतीरितः १५१
एतद्दशात्मको वायुस्तस्माद्भीमस्तदात्मकः। सर्वविद्या द्रौपदी तु यस्मात्सैव सरस्वती १५२

वृकोदर उच्यते तत्र भक्त्यादिकं प्रतिपादितमिति ज्ञातव्यं वायोर्भक्त्यादिनियामकत्वेन तदात्मकत्वाद्वृकोदरस्य च वायुरू
पत्वात् १५१ यदा तु द्रौपदीप्रसंगः तदा सर्वविद्याप्रतिपादितेति ज्ञातव्यं। सरस्वत्याः सर्वविद्यानियामकत्वेन तदभिमानि
त्वात्। द्रौपद्याश्च सरस्वतीरूपत्वात्। एवं यदा युधिष्ठिरार्जुनादिप्रसंग उच्यते। तदा धर्मश्रवणमननादिकमुक्तमिति ज्ञा
तव्यं। यमादीनां धर्मादिनियामकत्वात्। युधिष्ठिरादीनां च तदवतारत्वात् १५२ ॥ ॥ ॥ ॥

यदा तु दुर्योधनप्रसंगः तदा द्वेषाज्ञानावैराग्यादिदशाकमुक्तमिति ज्ञातव्यं। कलेरज्ञानादिरूपत्वाद्दुर्योधनस्य च कलिरूपत्वात्।
यत्र दुःशासनप्रसंगः तत्र विपरीतं ज्ञानमुच्यत इति ज्ञातव्यं दुःशासनस्य विपरीतज्ञानात्मकत्वात् १४३ यत्र तु शकुनेः प्र
संगः तदा नास्तिक्यमुक्तमिति ज्ञातव्यं। तस्य तदात्मकत्वात्। यदा तु परेषां धार्तराष्ट्राणां विकर्णादीनां प्रसंगस्तदा सर्वदो
षा उच्यंते। इति ज्ञातव्यं। तेषां सर्वदोषात्मकत्वात्। यदा तु द्रोणो रुच्यते तदाहंकारत्वमुक्तमिति ज्ञातव्यं। रुद्रस्याहंकारा
त्मकत्वात्। द्रोणोप्यतदवतारत्वात् १४४ यदा द्रोणादीनां कथा तदाध्यात्ममिंद्रियाण्युक्तानीति ज्ञातव्यं। बृहस्पत्यादी

अज्ञानादिस्वरूपस्तु कलिर्दुर्योधनः स्मृतः। विपरीतं तु यज्ज्ञानं दुःशासन इतीरितः १४३ नास्तिक्यं शकुनिर्नाम सर्व
दोषात्मकाः परे। धार्तराष्ट्रास्त्वहंकारो द्रोणो रुद्रात्मको यतः १४४ द्रोणाद्या इंद्रियाण्येव पापान्यन्ये तु सैनिकाः। पांडवे
यास्तु प्राणानि तेषां विष्णुर्नियोजकः १४५ एवमध्यात्मनिष्ठं हि भारतं सर्वमुच्यते। दुर्विज्ञेयमतः सर्वैर्भरितं तु सुरैरपि १४६

नामिंद्रियात्मकत्वात् द्रोणादीनां च तदवतारत्वात्। यदा तु तत्तेभ्यो दुर्योधनादिभ्योऽन्ये सैनिकाः सेनासंबंधिनो निर्वीर्यंते तदा पा
पान्युक्तानीति ज्ञातव्यं। तेषां तदात्मकत्वात्। यदा तु पांडवेयाः पांडवसंबंधिनो राजान उच्यंते। तदा तु प्राणा उक्तानीति ज्ञातव्यं
। तेषां तदभिमानित्वात्। यदा तु तेषां पांडवादीनां नियंता कृष्ण उच्यते तदा ब्रह्मादिनियामको विष्णुरुक्त इति ज्ञातव्यं कृष्णस्य
तदात्मकत्वादिति १४५ तस्मादुक्तरीत्याशेषभारतस्याध्यात्मनिष्ठत्वात्साकल्येन सुरैरपि ज्ञातुं न शक्यते किमितरैरित्याह।
एवमध्यात्मेति १४६ ॥ ॥ ॥

ता०टी०
५३

दुर्विज्ञेयत्वंप्रवक्ष्यति।स्वयमितितस्यव्यासस्यप्रसादतोब्रह्मावावेदेत्यर्थः।नन्वत्यंदुर्विज्ञेयंचेद्भारतंतर्हितेभ्यंतेनकिंप्रयोजनमि २
त्यतआह।तथापीति।भारतस्यदुर्विज्ञेयत्वेपिविष्णावेवतात्पर्यमस्तीतिसामान्यतोभारतसारसंग्रहस्यज्ञातुंशक्यत्वात्तेनतेषा
मपिप्रयोजनमस्त्येवेतिभावः ४७ एवंभारतेपियथाप्रोक्तइतिप्रतिज्ञातंनिर्णयंभारतवाक्यैस्तत्समाख्यावाक्यैश्चदृष्ट्वोप
संहरति।इत्यादीति।ननुतत्रप्रतिज्ञावाक्येमाहात्म्यक्रमएवंकइति ब्रह्मादिदेवतातारतम्यनिर्णयस्यापिप्रतिज्ञातत्वा
त्तत्किमर्थंभारतवाक्योदाहरणेनतत्समाख्यावाक्योदाहरणेनचनत्वत्तइत्यतएवंभवन्तयेतिन्यायमनुसृत्याह।वाय्वादी

स्वयंव्यासोहितद्वेदब्रह्मावातत्प्रसादतः।तथापिविष्णुपरताभारतेसारसंग्रहः २४७ इत्यादिव्यासवाक्यैस्तुविष्णूत्कर्षो
वगम्यते।वाय्वादीनांक्रमश्चैवतद्वाक्यैरेवचिंत्यते २४८ वायुर्हिब्रह्मतामेतितस्माद्बुद्ध्यैवसस्मृतः।नब्रह्मसदृशःकश्चि
त्शिवादिषुकथंचन २४९ ज्ञानेविरागेहरिभक्तिभावेहृतिस्थितिप्राणबलेषुयोगो।बुद्धौचनान्योहनुमत्समानःपु
मान्कदाचित्क्वचकश्चनैव २५० ॥ ॥

नामिति २४८ ननुब्रह्मादीनांक्रमइतिवक्तव्येवाय्वादीनांक्रमइतिकिमर्थमुक्तमित्यतआह।वायुर्हीति।सर्वत्रतारतम्यप्रक राम
रणेवायुपदेनब्रह्मणोपिग्रहणं।ब्रह्मपदेनचवायोरपिग्रहणं।ब्रह्मपदेनववायोरविपिग्रहणं।ब्रह्मपदेननेसूचयति।तत्रा ५३
धिकारिषुसर्वाधिकारीत्तमत्वंब्रह्मण एवेतिप्रमाणेनसमर्थयितुंप्रतिजानीते।नब्रह्मेति २४९ प्रतिज्ञातमर्थंसाधयितुंभा
रतवाक्यंपठति।ज्ञानइति।विरागोवैराग्यं।ज्ञानादिगुणेषुहनुमत्समानःपुमान्कदाचित्कालेक्वचित्स्थानेकश्चनरुद्रादिपु
रुषःसमानोनास्तीत्यर्थः २५० ॥ ॥

नत्वनब्रह्मसद्दशइतिप्रतिज्ञायहनुमत्समानोनास्तीत्येतदर्थप्रतिपादकंवाक्यमुदाहृतमित्यतःकिंकेनसंगतमित्यतोहनुमदादिरू
पत्रयस्यवाय्ववतारत्वाद्वायोश्चभाविब्रह्मत्वेनब्रह्मत्वाद्धनुमत्समानोनास्तीत्युक्तेवायोःसमानोनास्तीत्यर्थस्यलाभात्सूक्तंसंग
तिरित्यभिप्रेत्यहनुमदादिरूपत्रयस्यवाय्ववतारत्वेवेदमेवप्रमाणयति।वलित्थेत्यादिना।तत्रप्रथमायामृचिएवंहेतवायोः
स्वरूपमुक्त्वाद्वितीयाद्धेनतदवतारभूतंहनुमद्रूपमुच्यते।तथाहि।सहसःवायोर्देवस्ययन्महत्तरूपंतद्वद्बलात्मकं।नकेवलं
बलरूपंकिंतुदर्शतंज्ञानेनततंज्ञानरूपमित्यर्थः।पुनःकथंभूतंतन्महत्तरूपमित्यपेक्षायामाह।भार्गइति।भरणगमनयोःकर्त
भर्त्र्वारणोगम्भृगतो।आभ्यामसुन्प्रत्ययोद्विचरित्वाद्विलोपेभर्गइतिसकारांतंनपुंसकंरूपंसिध्यति।अत्रवहूपदर्शत
पदाभ्यांभार्गइतिपदेनचवाशुशब्दस्यार्थद्वयमुक्तं।तथाहि।बलज्ञानात्मकत्वाद्वावाशुःवशब्दस्यबलवाचित्वात्।अयगतावि

वलित्थातद्वपुषेधायिदर्शतंदेवस्यभर्गःसहसोयतोजनि।यदीमुप
ह्वरतेसाधतेमतिर्ऋतस्यधेनाअनयंतसस्रुतः २५१ ॥ ॥

तिधातोर्व्याख्यानादयइतिधातुर्गत्यर्थः।गत्यर्थाज्ञानवाचिनाप्तथिः।ततउणप्रत्ययेआदिदृद्धौचआइरितिसिध्यति।वक्ष्यासोअ
इच्छेतिवाइरिति।एवंवातेर्गत्यर्थत्वात्सर्वंविदयतेऽणप्रत्ययेभरणगमनकर्तृत्वंवाशुशब्दार्थइत्यर्थद्वयंद्रष्टव्यं।एताद्द
शंयद्वायोर्महत्तरूपंतदित्थाइत्थंवक्ष्यमाणप्रकारेण।वपुषेअवतारायअवतारंकर्तुमितितावत्तथाधिअधायिअविस्तृताय
इतमित्यर्थः।यतःयस्मात्तन्महत्तरूपाज्जनि।अजनिजातंप्रथममवताररूपमित्यर्थः।तत्किमित्यपेक्षायामुच्यते।यदीमुपह्वरतइति
द्वितीयार्धेनायंदीयदेवंमतिःहनुमदाख्यं।हनुशब्दोज्ञानवाचीहनुमानितिशब्दितइतिवचनात्।उपसमीपेरामस्येत्यर्थः।ह्वरते
तिष्ठति।साधतेच।रामकार्याणिसाधयतीत्यर्थः।पुनःकथंभूतंयेनरूपेणऋतस्यरामस्यसस्रुतःअमृतस्वावद्युक्ताधेनाअर्थ
पुष्टिमत्यःवाचःअनयंतसीतांप्रतिनीताइत्यर्थः।अथवाऋतस्यरामस्यवाचःतत्सर्वोत्तमत्वप्रतिपादिकामहत्तरामायणादि

॥ २५ रूपावांः शिष्यास्त्रत्यनयंतित्यर्थः

ता०टी० ४४ अथषष्ठीमाख्योद्वितीयावतारउच्यते। षट्क इति। द्वितीयोवतारः षट्कनामकः। षट्तंसेनांद्विगोतीतिषट्कः। षट्कद्दोपपदात्द्विद्धं
यइत्यस्मात्डप्रत्यये डित्वाट्टिलोपे च षट्क इति रूपं सिध्यति। उपपदतकारस्तोपोनिरुक्तत्वात्। अन्यदपि भीमसेनस्य ज्ञापकं लि
गमुच्यते। पितृमातिति। पितृरित्यस्यनाम। असाधारणेन व्यपदेशा भवंतीतिन्यायेन वक्तृत्रमोक्तृत्वात्तद्वानित्युच्यते। प्रसिद्धं चषष्ठी
मेवक्तृत्रमोक्तृत्वं वकास्तुरवचादौ। भीमशब्दप्रवृत्तिनिमित्तमप्यत्रोच्यते। सप्तशिवास्तुसप्तचताः। शिवाः अपौरुषेयत्वादितानिद्दीपत्वे
नमंगलरूपाश्चेतिसप्तशिवास्ताखक्रगाद्याश्चत्वारइतिहासः। सुराणिपंचरात्रं चेति सप्तवंक्रगाद्याइतिहासस्कुराणिपंचरात्रकं

षट्कोवक्तः पितृमात्रित्य आशये द्वितीयमासप्तशिवास्तुमातृषत्तृतीय
मस्यद्वषभस्यदोहसेदशप्रमतिंजनयंतयोषणाः २५२ ॥ ॥

षणोक्ताः सप्तशिवास्तत्रशयोभीमस्ततः स्मृतइतिसत्तत्त्ववचनात्। द्रष्टव्यांमातृस्तुमापयंतिपरमात्मानमितिमातरः। तत्रनित्याः नित्ये
आसमंतात्मायेशेतेरेमेइतियावत्। अनेनमाः प्रमाणानिस्टतायस्मिन्निति भीमशब्दार्थज्ञोभवति। तथाच सत्तत्त्ववचनं मह राम ५५
तमोभीमइत्युक्तइति। अथ दशाविधोमाख्यस्तृतीयावतारउच्यते। तृतीयमस्येति। अस्यद्वषभस्यवायोस्तृतीयं वपुरित्यस्तुवर्त्तते।
तृतीयंरूपमित्यर्थः। तत्किंनामकमित्यतउक्तं दशप्रमतिं दशाविधस्तानामकमित्यर्थः। तत्रामकं रूपं दोहसे विश्वाख्यतत्त्वज्ञा
नदोहनार्थं योषणाः स्त्रियः। युरुत्वाद्धृवचनं जनयंत। उत्पादितवत्यः। अत्रसर्वत्राडभावः छांदसः २५२ ॥ ॥ ॥

तदवतारप्रयोजनमर्धेनोच्यते। निर्यदीमिति। यत् यस्मात् ईं एवं यस्मात्तृतीयादेवरूपात्कथंभूतात् बुध्नाद्देवरूपात्परमाद्व्योमाख्यात्
ईशानासः लोकेशाः रुद्राद्याः इतरे मनुष्योत्तमपर्यंताः सूरयश्च महिषस्य महितस्य गुणस्य हरेर्वर्पसः वरणीयत्वादिना वर्पः संज्ञका
त्स्वगुणात् शवसा स्वबलेन निःक्रंतत् आक्रंतत् नितरां सतात्वंत इत्यर्थः। यदीं यदेवमनु अनंतरं प्रदिवः प्रकृष्टद्युतिकांत्यादिरूपो मधुः
आनंदतीर्थाख्यः। मधुशब्दः सुखवाची। मधु द्यौरस्तु नः पितेति श्रुतेः। वशब्दश्चावगतिकरणवाची। अवगत्यर्थाद्वातेः करणार्थे क

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रंत सूरयः। यदीमनु प्र
दिवो मध्व आधवे गुहा संतं मातरिश्वा मथायति १५३ ॥ ॥ ॥

प्रत्ययः। घञर्थे कविधानमिति वचनात्। ततश्च सुखसावनं तीर्थशास्त्रपरपर्यायवशब्दवाच्यं शास्त्रमस्येति मध्वा इत्युक्तं भवति। स्वरित्य
त्रेकवकारलोपो निरुक्तत्वात्। स एव मातरिश्वा मातरिश्रमाणमूर्तेः गादेश्वयति गच्छतीति मातरिश्वा वायुस्तदवतारः गुहा संतं नि
र्गुणात्वाद्बुद्धि निर्मोहितं संतं परमात्मानं आधवे भावप्रवाततो निर्हे शः। आ समंतात्प्रतिपत्तिर्षे सर्वेस्वामित्येतज्ज्ञापनतार्थमिति यावत्। म
मथायति मथ्नाति शास्त्रेण विचार्य निर्णायतीति भावः १५३ ॥

ता॰टी॰
४५

२

तस्यैवावतारस्य सामर्थ्यातिशय उच्यते। यस्तत्तनीयं रूपं पितुः स्वजनकात्परमात्सर्वेश्वराद्विष्णोः सकाशात्प्रणीयते विष्णुना सर्वेषु कार्येषु प्रे-
र्यते। अयं च एतद्भवः प्रथमरूपा वीरुधः ततः खंडतार्थं दंष्ट्रदं तेषु पर्यारोहति स्थापयति। यथा कश्चित्पुरुषो वीरुधः खंडयितुं दंतेषु धारयति
एवं प्रथमान्खंडयितुमनृद्य चर्वितवत्कवलीकरोतीत्यर्थः। यद्यस्मात्कारणाद्यदस्य वायोर्जन्तुरूपं जन्म अवतारं उभाउभौ लक्ष्मीनारायणौ
उद्वतः प्रेरयतः तस्मात्कारणात् आदरतः आभ्यामेव लक्ष्मीनारायणाभ्यामेव यविष्टो वरो भवत्। तद्व्यतिरेकेणान्यस्य प्रेरकस्याभावा-
त्तदंतरमयमेवेति भावः। तथा घृणाशुचिः। वपयाशुद्धः १५५ अत एव मातृगर्भसंबंधात् दुःखलेशोऽपि नास्तीत्युच्यते। यस्मात्कारणा-
द्वायुः आदरतः प्रवृत्तात् लक्ष्मीनारायणप्रेरणादेव मातृदराविशत्। न तु नरस्य गर्भवासनिमित्तं विकर्मास्तीति भावः। यास्तु मातृकुआ

प्रयत्रपि[illegible]परमात्रीयते पर्यापद्दवो वीरुधो दंष्ट्रारोहति उभा यदस्य जन्तुरूपं यदिह तत्त्वादि घविषोऽभवत् घृणाशुचिः १५५
आदिन्मातृदराविशद्यास्त्वाशुचिरहिंस्यमान उर्विया विवाहवे। अनुयत्पूर्वा अरुहत्सनाजुवो निनव्यसीषवरासुधावते १५५

त समंताच्छुचिः शुक्लशोणितसंबंधरहितः। अत एव उर्वियाउरुत्वेन महिमोत्कर्षेण हिंस्यमानः गर्भवासनिमित्तकदुःखेनाबाध्यमानः विवहवे र-
विशेषेणाभिवृद्धोऽभूदित्यर्थः। सप्रशिवास्तु मातृषित्वत्तं तत्र विशेषमाह। पूर्वाः आगाद्याः कथंभूता सनाजुवः सर्वदा विद्यमानं परमात्मा-
नं महायोगवृत्त्या महारूढ्या च तात्पर्येणाज्जुषते प्रतिपादयंतीति सनाजुवः। एवंभूतेषु चाल्पर्द्धं आगादिषु यत् अरुहत् तत्त्र अनुक्रमादे राम
वारूहत् उपक्रमादिलिंगैः क्रमेणैवार्थं विचारयामासेत्यर्थः। अवरासु त्रिष्विति हासपुराणपंचरात्रादिष्वामातृषु कथंभूतासु नव्यसी- ४५
षु नूतनत्वेन नूतनासु निवावते उपक्रमोपसंहारादिपर्यालोचनतां विनैव नितरां धावते शीघ्रमेवार्थं विचारयतीत्यर्थः। तदर्थस्य पूर्व-
मेवावगतत्वात्सद्य एव यथावदर्थप्रतीतिराविर्भवतीति भावः। शीघ्रगमनं हि धावनं लोके प्रसिद्धमिति १५५ ॥ ॥ ॥

अनतीसनोजीवस्तस्यआसमंताइतिवल्छार्न

एवंहनुमदादिरूपस्यवायोः सर्वाधिकार्द्धन्तमत्वंवेदेनप्रसाध्यप्रमाणांतरेणापिसाधयति॥ अश्वमेधइत्यादिना॥मनुष्यइश्येषुज्योतिःषु
दिवाकरः श्रेष्ठइत्यर्थः॥स्पष्टमन्यत् १५६ १५७ वायुर्भीमइत्यस्मिन्भारतवाक्येयस्मादित्युपस्कर्त्तव्यं॥यस्माद्वायुर्भीमः अक्षराणांम
वंकरः॥तत्र हेतुर्भीमनादइति॥भीमोभयंकारोनादोयस्येतिवस्यासौतथोक्तः॥तथामहतउग्रंओजोयस्यासौमहौजाः॥सर्वेषांप्राणिनांजीव
नंप्राणाभृतः चेष्टादिप्रदः॥तथादेहिनांप्राणिनांदेहपातेकार्यैकत्वस्यवायोरहानिःकारणमित्यर्थः॥मुख्यप्राणोनदेहेपरित्यक्तेतत्पातोभव
तिनान्यथेतिभावः॥अथवादेहिनांमुमुक्षूणांदेहपातेचरमदेहपातेअनाहतिर्यत्प्रसादाद्भवतीत्यर्थः॥यस्मादेतादृशोवायुस्तस्मा

अश्वमेधःक्रतुश्रेष्ठोज्योतिःश्रेष्ठोदिवाकरः॥ब्राह्मणोद्विपदांश्रेष्ठोदेवश्रेष्ठस्तुमारुतः १५६ वलमिंद्रस्यगिरिशोगिरिशस्यवलं
मरुता॥वलंतस्यहरिःसाक्षात्नहरेर्बलमन्यतः १५७ वायुर्भीमोभीमनादोमहौजाःसर्वेषांचप्राणिनांप्राणभृतः॥अनाहृ
तिर्देहिनांदेहपातेतस्माद्वायुर्देवदेवोविशिष्टः १५८ तत्वज्ञानेविष्णुभक्तौधैर्यस्थैर्यपराक्रमे॥वेगेचलाघवेचैवप्रलाप
स्यचवर्जने १५९ भीमसेनसमोनास्तिसेनयोरुभयोरपि॥पांडित्येचपटुत्वेचशूरत्वेचवलेपिच १६० तथायुधिष्ठिरे
णोक्तमीमंप्रतिसमारितां॥धर्मश्चार्थश्चकामश्चमोक्षश्चैवयशोध्रुवं॥त्वय्यायत्तमिदंसर्वंसर्वलोकस्यभारत १६१

देवानामपिदेवोत्तमएवाविशिष्टः सर्वोत्तमएवेत्यर्थः १५८ तथाअन्यत्रस्पष्टंतरेपिभारतेभीमात्मकस्यवायोःसर्वाधिका
र्द्धन्तमत्वमुक्तमस्तीतितद्वाक्यमुदाहरतितत्वज्ञानइत्यादिना॥सेनयोरुभयोरपीतिपांडवसेनायांकौरवसेनायांचभीमस
नसमोनास्तीत्युक्त्याश्वत्थामादुर्योधनत्वादिभ्योउत्तमत्वमेवलभ्यतइतिभावः॥प्रलापस्यदुःखस्यपट्टत्वेहठत्वेसर्वलोकोत्त १५९।१६०।
मात्वे १५९ १६० भीमस्यप्रमाणांतरमपिदर्शयितुमाहतथेति तद्वाक्यमुदाहरति॥धर्मश्चेतिसर्वलोकस्ययदिदंसर्वंधर्मादि
कंतत्त्वय्यायत्तंचदधीनमित्यर्थः १६१ ॥ ॥

ना०टी० ४६

2

नत्रयुधिष्ठिरादिवचनं स्नेहेनोक्तमिति तन्न तेनोक्तार्थनिश्चयः इत्यतो मुख्यद्वेषिणा दुर्योधनेनापि भीमसेनस्य रूपस्थितिरुक्तास्तीति भा
वेन विराटपर्वस्थं दुर्योधनवचनमुदाहर्तुमाह विराटेति। तद्वचनमुदाहरति। वीराणामित्यादिना। शारीरसंबंधिन्या उत्पन्नो। अन्योन्या
न्यानंतरबला इति बलभद्रापेक्षया भीमस्याधिक्यात्त्वोत्तमा सर्वाधिकार्जुनमत्वेन ल्पते १६४ तथा उद्योगपर्वस्थे परमात्मना तत्र
कृष्णेनापि भीमसेनस्योत्कृष्टत्वमुक्तमस्तीति तद्वाक्यमुदाहर्तुमाह। वचनमिति। तदेव वचनमुदाहरति यत्किं चेति। पांडवेति

विराटपर्वणि चापि च दुर्योधनस्य हि। वीराणां शस्त्रविदुषां कृतीनां तत्त्वनिर्णये। सत्त्वे बाहुबले धैर्ये प्राणे शारीरसंभवे
१६२ सांप्रतं मानुषे लोके सदैत्यनरराक्षसे। चत्वारः प्राणिनां श्रेष्ठाः संपूर्णा बलपौरुषाः १६३ भीमश्च बलभद्रश्च मद्रा
जश्च वीर्यवान्। चतुर्थः कीचकस्तेषां पंचमं नानुशुश्रुमः। अन्योन्यानंतरबलाः क्रमादेव प्रकीर्तिताः १६४ वचनं वा
सुदेवस्य तथोद्योगगतं परं। यत्किं चा[त्म]नि कल्याणं संभाव्यं क्षिपांडव। सहस्रगुणमप्येतत्त्वयि संभावयाम्यहं १६५
यादृशो वै कुले जन्म सर्वराजाभिपूजिते। यादृशानि च कर्माणि भीमस्त्वमसि तादृशः १६६ अस्मिन्युद्धे भीमसेन त्वयि
भारः समाहितः। धूरर्जुनेन वोढव्या वोढव्या इतरैर्जनैः १६७ ॥ ॥ ॥

भीमसेनस्य संबोधनं। यत्किंच कल्याणं महिमातिशयं आत्मनि संभावयसि मन्यसे ततोपि सहस्रगुणां कल्याणमहं त्वयि संभा राम
वयामि मन्य इत्यर्थः न केवलमेतावत् किं तु आह हे भीम सर्वराजाभिपूजिते यादृशे कुले जात। यादृशानि च कर्माणि करोषि तादृशो ४६
कुले जननार्थं तादृशानि च कर्माणि कर्तृत्वं तादृशस्त्वं योग्योसीत्यर्थः १६६ हे भीमसेन अस्मिन्युद्धे सर्वोपि भारस्त्वयि समा
हितः। तत्र धूर्धुर्गमर्जुनेन वोढव्या नेतव्येत्यर्थः। इतरैर्जनैर्वोढव्या नेतव्या स्वदशाकपः सर्वो भारस्त्वयि समाहित इति भावः १६७

वायोरनंतरं भारत्याः स्वरूपं वक्तुमाह उक्तमिति। तदेव ब्रह्मांडपुराणस्थं वाक्यमुदाहरति। यस्या इति। यस्या भारत्याः प्रसादात्परमं
सर्वोत्तमं विष्णुं शेषः खगपतिर्गिरिशः सुरेंद्र इत्येते विदंति जानंति। या येषां शेषादीनां प्रथमार्या माता च भारती सा द्रौपदीति प्रसि
द्धा स्मौव भूत्वेति संबंधः १६८ या च भारती शेषादीभ्य इतरेभ्यश्च सह शांभवतरः कुमारानुगमत्विनद भारस्येति संबंधः॥ अनेन सर
स्वतीस्वरूपमप्युक्तं भवति १६९ अथ भारत्यनंतरं त्वेशेषं निरूपयितुं तदवतारभूतबलभद्रस्वरूपं प्रमाणेन निर्धारयति। य
स्येति। यस्य बलभद्रस्य बलादिविषये एवं भीमसेनमंतरेणान्यो धिको नास्ति स एव इति संबंधः १७० यस्य बलरामस्य प्रति(

भ्र.ब उक्तं पुराणे ब्रह्मांडे ब्रह्मणा नारदाय च। यस्याः प्रसादात्परमं विदंति शेषः खगपतिर्गिरिशः सुरेंद्रः। माता च एषां प्रथमैव भा
रती सा द्रौपदी नाम बभूव भूमौ १६८ या भारती तु परमं च वदेत्पूर्वं शेषं खगपतिं गिरिशं सुरेंद्रं। चतुर्मुखा शांभवतरः कुमाराद्रमा
द्रौपदी नाम बभूव भूमौ १६९ यस्याधिको बलेनास्ति भीमसमो। कमृते क्वचित्। न विज्ञानेन च ज्ञाने एव रामः स लांगली
१७० यस्य न प्रति योद्धास्ति भीममेकमृते क्वचित्। अन्विष्यापि त्रिलोके षु स एष मुसलायुधः १७१ तथाप्युधिष्ठिरेतो
व भीमाय स सुदारितं। अतुलातो रौहिणेयात्त्वया चैवापराजितः। सर्वविद्यासु वीभत्सुः कृष्णेन च महात्मना १७२ अ
न्वेष रौहिणेयं चात्वां च भीमापराजितं। वीर्ये शौर्ये बले नान्यस्तृतीयः फाल्गुनादृते १७३ ॥ ॥ ॥ ॥ ॥

योद्धा त्रिलोके ऽप्यन्विष्य मार्गयित्वा विचार्य मातोपि एवं भीममृते क्वचिदपि नास्ति स एष इति संबंधः॥ १७१ इदानीं शेषानंतरत्वे
नेंद्र उक्तं तदवतारस्यार्जुनस्य स्वरूपं वक्तुमाह। तथेति। तदेव वचनमुदाहरति। अतुलातइति। हे भीम त्वया रौहिणेयात् बलभद्रा
च अतुल अनंतरं अपराजितो वीभत्सुरर्जुनो महात्मना कृष्णेन चानुज्ञात इत्यर्थः १७२ उक्तमेवस्पष्टमाह। अपराजितं त्वां च रौहि
णेयं चानु एव फल्गुन इत्यर्थः। तस्माद्वीर्यादिविषये फल्गुनादृते तृतीयो नास्तीत्यर्थः १७३ ॥ ॥ ॥

ता०टी०
४०

२

एतस्मिन्नेवार्थे वाक्यांतरमप्यस्तीत्याह । तथैवेति । तदेव वाक्यमुदाहरति । अविजित्यमिति । भीमपार्थाभ्यां भवतश्चान्यत्रान्यैर्गांडि
वंधरं विजित्यं अध्यारोपितज्याकं कर्त्तुं न शक्यं तदिति संबंधः । अनेन द्रोणभीमानंतरत्वं सर्वेभ्योधिकत्वं च पार्थस्योक्तं भवति १७४
न च बलभद्रानंतरत्वेनाश्वत्थाम्नो वक्तव्यत्वेर्जुनस्यात्यंतीयत्वेन कथमुक्तिरित्यतो बलभद्रनिरूपणेनैवाश्वत्थाम्नापि व्याख्यात
त्वप्रसिप्रायेण सिंहावलोकन्यायेन तत्र प्रमाणं दर्शयितुमाह । तथैवेति । तदेव वचनमुदाहरति । द्वावेवेति । लक्ष्मीव्याप्त्यपर्यंतु
रूपाविष्टत्वं । तत्रापि साम्यं न मंतव्यमित्याह । भीमस्त्विति १७५ तन्नैवं तर्हि क्वचिदश्वत्थाम्नोप्यधिकोर्जुनस्तुतिरस्ति सा कथं

तथैव द्रौपदीवाक्यं वासुदेवं प्रतीरितं । अविजित्यमपि कर्हैयत्तुसावपतेनैव गांडिवं । अन्यत्र भीमपार्थाभ्यां भवतश्च जनार्दन
१७४ तथैवान्यत्र वचनं व्यासद्वैपायनेरितं । द्वावेव पुरुषौ लोके वासुदेवा द्वासुदेवादनंतरौ । भीमस्तु प्रथमस्तत्र द्वितीयो द्रौ
णिरेव च १७५ अक्षयाविषुधी दिव्ये ध्वजो वानरलक्षणः । गांडीवं च धनुः श्रेष्ठं तेन द्रौणेर्वरोर्जुनः १७६ इत्याद्यनंते
वाक्यानि संत्येवार्थे विवक्षिते । कानिचिद्दर्शितान्यत्र दिग्मात्रप्रतिपत्तये १७७ ॥ ॥ ॥

घटत इत्यत आह । अक्षयाविति । इषुधी मारुतस्य पुल्लिंगत्वमाश्रित्याक्षयाविषुधी इत्युक्तं स्त्रीलिंगत्वं चाश्रित्य दिव्ये इति । तयोर
क्षयत्वं नाम अक्षयबाणपूर्णत्वमिति द्रष्टव्यं । वानरो हनूमान् लक्षणं चिह्नं यस्य स तथोक्तः । तेन पूर्वोक्तेन कारणत्रयेण कुत्रचि जाम
द्वरोर्जुनो भवति । तदपेक्षयार्जुनोधिक इत्युक्तिर्घटत इति भावः १७६ एवं विष्णोः सर्वोत्तमत्वदेवतातारतम्यादौ प्रमाणवाक्य ४१
मुदाहृत्योपसंहारे कारणं दर्शयन्नेव निगमयति । इत्यादीति विवक्षिते तात्पर्यविषयीभूते विष्णोः सर्वोत्तमत्वादावर्थे वा
क्यानामनंतत्वेन साकल्येनोदाहर्तुमशक्यत्वादुपरम्यत इति भावः । अनंतेषु वाक्येषु कानिचिदेव वाक्यानि मार्गमात्रप्रदर्शना
र्थमुदाहृत्य दर्शितानीत्यर्थः १७७

प्रमाणवाक्योदाहरणेनतयमर्थंसाधितवांस्तमर्थंसपिंडीकृत्योपसंहरतितस्मादिति। उत्तमक्रमेणोत्तमतारतम्यक्रमेणलघुरूपोत्तम
ताक्षराक्षरात्मकसर्वोत्तमता अनौपचारिकीमुख्यैवसिद्धा। तत्रहेतुर्विनिर्णयादिति। नकेवलंलघुरूपोत्तमता किंतुब्रह्मतापूर्णा
ताचसिद्धेत्यर्थः १७८ इदानींस्वग्रंथस्यपरमाप्तिमूलत्वेनप्रेक्षावदुपादित्सामुत्पादयन्स्वनामनिर्देशपूर्वकमध्यायंसमाप
यति। पूर्णप्रज्ञेति। अत्रान्येषामपिस्ववाक्यानामुदाहरणेपिप्राधान्यापेक्षयाश्रीमद्भारतगानामित्युक्तं। अतएवोपक्रमेमुक्त
भारतार्थानुसारतइत्यादि १७९ एवमध्यायंपरिसमाप्यांतेपियद्गुणविशिष्टतयैतदध्यायेनहरिःप्रतिपादितवांस्तद्गुणविशि
ष्टतयातंस्तुवन्नेवनिर्णयकरणफलत्वेनतत्प्रीतिमेवप्रार्थयते सप्रीयतामिति। परमादुत्कृष्टात्पद्मापद्मभवादेःपरतमो

तस्मादुत्तमक्रमेणैवलघुरूपोत्तमताहरेः। अनौपचारिकी सिद्धाब्रह्मताचविनिर्णयात् १७८ पूर्णप्रज्ञकृतेयंसंदृ
पाडुकृतिःस्ववाक्यानां। श्रीमद्भारतगानांविष्णोःपूर्णत्वनिर्णयायैव १७९ सप्रीयतांपरतमःपरमादनंतःसंतारकः।
सततसंस्तुतिरुदक्षरणार्णवः। यत्पादपद्ममकरंदजुषोहिपार्थाःस्वाराज्यमापुरुभयत्रसदाविनोदात् १८० इतिश्रीम
दानंदतीर्थभगवत्पादाचार्यविरचितेश्रीमन्महाभारततात्पर्यनिर्णयेस्ववाक्योद्धारोनामद्वितीयोध्यायः॥ ॥ ॥

तिशयेनोत्कृष्टः। तत्रहेतुः अनंतइति। सततसंस्तुतिरनादिप्रवृत्तिवेदएवइत्यक्षरणः। महाप्रयत्नमंतरेणानवरतमयोग्यो
र्णवः। तस्मात्सम्यगुत्तारयितुसमर्थइत्यर्थः। मत्वर्थेतद्धितोयमतोऽणः शब्दस्योदकवाचित्वेपितत्संबंधवत्त्वाभात्समुद्रेतात्पर्यं
लक्ष्यते। अतएवाभिप्रायेणारंभेपिनिखिलगुणार्णवस्तुतमिति द्रष्टव्यं। यत्पादपद्ममकरंदजुषः यस्यविष्णोःपादाख्यपद्मयो
र्मकरंदमन्तपारख्यसुखरसंसेवमानाः पार्थाःपृथायाः कुंत्या अपत्यानि युधिष्ठिरादयः तत्रराजानः उभयत्रसंसारेमुक्तौसदाविनोदा
त्। सदासंतोषेणैवस्वाराज्यंस्वीयंराज्यंऐहिकं आनंदाविर्भावलक्षणमामुष्मिकंचप्रापुः सप्रीयतामितिसंबंधः १८० श्रीमहा
भारततात्पर्यनिर्णयाध्यायएवहिद्वितीयोव्याकृतस्तावत्प्रीत्येमाधवमध्वयोः २ इतिश्रीमहाभारततात्पर्यनिर्णयदीटीकायां

ता०टी० ५८

॥ ॥श्रीवेदव्यासायनमः॥ ॥एवंतावत्प्रथमाध्यायोपक्रमेऽत्यंविचिंत्यपरमःसद्भावस्तुदेवनामावभूवेत्यादिवासुदेवाद्यवतार
चतुष्टयप्रसंगसंगात्याऽशेषशास्त्रनिर्णयस्तुवाक्योद्धारैर्यथात्क्रमव्याख्यत्वयेविधायेदानींतामेवकथांभारतानुसारेणाविस्ता
रयिष्यन्महाभारतस्यव्यासोवज्ञतासिद्धेभारताद्यकर्तृत्वेनश्रीवेदव्यासस्तुतिंतत्प्रतिपाद्यत्वेनरामकृष्णयोस्तुतिंचक्रमेणाक
रोतिभगवानाचार्यः।जयतीत्यादिना।व्यासइत्यवतारोयस्यासौव्यासावतारोहरिरात्मभास्करःस्वतंत्रभास्करोजयत्युत्कर्षे
वर्त्ततइतिसंबंधः।आत्मभास्करइत्यनेनप्रसिद्धभास्करापेक्षयामहान्विशेषोस्तीत्युक्तं।तंविशेषमाह।अजइत्यादिनाअखं
डःपरिपूर्णोऽनंतान्गुणाएवोरुउत्कृष्टंमंडलंयस्यासौतथोक्तः।प्रसिद्धभास्करस्तुनैवमित्यर्थः।सदोदितत्वमपिविशेषः।

श्रीवेदव्यासायनमः ॐजयत्यजोऽखंडगुणोरुमंडलःसदोदितोज्ञानमरीचिमाली॥स्वभक्तहार्दोच्चतमोनिहंताव्यासाव
तारोहरिरात्मभास्करः १ जयत्यजोऽक्षीणसुखात्मबिंबःस्वैश्वर्यकांतिःप्रततःसदोदितः।स्वभक्तसंतापहरिष्टहंता
रामावतारोहरिरीशचंद्रमाः २ ॥ ॥

ज्ञानाख्यकिरणमालीचास्वभक्तानांहार्दंहृदिस्थंउत्कृष्टंयत्तमोऽज्ञानंतद्गुणांतस्यनिहंतासंहारकइत्यर्थः।अतोऽप्यंतवैलक्ष
ण्यात्स्वतंत्रमात्मभास्करत्वमितिभावः १ एवंश्रीवेदव्यासस्यस्तुतिंविधायेदानींरामचंद्रस्यापिस्वतंत्रचंद्रत्वेनस्तु
तिंविधत्तेजयतीति।अत्रापिप्रसिद्धात्महावैलक्षण्यमस्तीत्याह।अजइत्यादिना।नाशरहितसुखात्मबिंबः।स्वरूपभूतैश्वर्य
रूपकांतिमान्प्रततःव्याप्तः।नप्रसिद्धचंद्रवत्परिमितपरिमाणवान्सदाउदितःनतुप्रसिद्धचंद्रवत्कदाचिदप्यस्तमेति। ४८
स्वभक्तानांसंतापाआध्यात्मिकादित्रिविधाःसंतापाएवइरिष्टमतिरिष्टंतस्यहंतारामइत्यवतारोयस्यसहरिरीशचंद्रमाः
सुत्कर्षेणवर्त्ततइत्यर्थः २ ॥ ॥

राम

इदानीमपूर्वसागरत्वेनश्रीहरिं संस्तौति। जयतीति। असंख्यमनंतंतथुरूत्वा एवं चलमेवांबुपूरो यत्रासौ तथोक्तः। गुणाएवोरुरत्ना
पामाकरः आत्मवैभवः स्वरूपैश्वर्यवान् सदा सर्वदा। संतिष्ठते आत्मनाः परमात्मा परो ज्ञानिनस्त एव नद्यस्ताभिराप्यः कृष्णा
त्त्यवतारोयस्य स हरिरेव सागरो मुख्यसागरः प्रसिद्धसागरापेक्षया विलक्षणः सागरो जयतीत्यर्थः ३ एवमवतारत्रयमंनवी
इदानींवैशंपायनानुष्ठितमंगलाचरणप्रपनात्मकभारताद्यश्लोकोदाहरणमपि प्रसिद्धयेसर्वग्रंथारंभे सर्वैः कर्त्तव्यमिति प्रि
ष्यान्प्रत्याह यथितंतं श्लोकमुदाहरति। नारायणमिति ४ अत्राप्रतीत्यन्यथाप्रतीतिनिरासाय श्लोकं यथावद्व्याचष्टे। जयइत्यादि

जयत्यसंख्योरुबलांबुपूरो गुणोरुरत्नाकर आत्मवैभवः सदा सदात्मज्ञनदीभिराप्यः कृष्णा ॥
वतारो हरिरेव सागरः ३ नारायणं नमस्कृत्य नरं चैव नरोत्तमं देवीं सरस्वतीं चैव ततो जयमु
दीरये ४ जयो नामेतिहासोऽयं कृष्णद्वैपायनेरितः। वासुर्नरोत्तमो नाम देवीति श्रीरुदीरिता ६

नाम्नायं भारताख्य इतिहासो जयो नाम जय इति प्रसिद्धः व्याचिख्यासितत्वेन बुद्धिसंनिहितत्वादयमित्युक्तं कृष्णद्वैपायनेरित
मित्यनेनेदं मंगलाचरणं वैशंपायनकृतमेव न तु व्यासकृतमिति सूचयति। ननु सतीषु विशिष्टासु इष्टासु च देवतासु नरन
रोत्तमयोर्नमस्कारः किमर्थ इत्यत्रस्तत्य दृष्टयस्या पूर्वमर्थमाह। वासुरिति। नामेति प्रसिद्धिद्योतकनिपातेन यस्मान्नरा उ
त्तमो वासुः सन्नरः सोप एव भवितुमर्हतीति द्योतयति नतु तथापि सरस्वतीमित्युक्त्वा देवीमिति पुनरुक्तमित्यत आह्योः
पदयोरर्थभेदमाह। देवीति। ५ ॥ ॥

व्यासं

ननु तथापि नारायणमित्युक्ते व्यासमिति कुत उक्तमित्यत आह नारायणादिति। नारायणस्य भारतप्रतिपाद्यत्वेन तद्रूपस्यापि व्या
सस्य भारतवक्तृत्वेन च पदद्वयेनापि भगवानेक एवोक्तः। ननु तत एव कुत उक्तमित्यत उक्तं वाच्यवक्तृस्वरूपक इति वाच्यत्वसंबंधे
न वक्तृत्वसंबंधेन च तन्निमित्तविशेषेण रूपद्वयस्यापि वंद्यत्वात्सनरुक्तिर्दुष्टेत्यर्थः। ननु नरोत्तमशब्देन वायुग्रहणेपि वायुर्ग्रं
थारंभे केन निमित्तेन वंद्य इत्यत आह। साधक इति। अभीष्टकार्यसाधकानामाशास्वामायत्त तस्मादित्युक्तत्रसंबंधः ६ वायो

नारायणो व्यास इति वाच्यवक्तृस्वरूपकः। एकः स भगवानुक्तः साधके प्रोन्नरोत्तमः ६ उपसा
धको नरः प्रोक्तो देवी भाग्यात्मिकान्तरां। सरस्वती वाक्यरूपा तस्मात्त्रस्म्याहिते रिवताः ७ ॥

रन्तरं योगस्यापि साधकत्वात्तस्यापि वंदनं युक्तमित्याह। उपेति। ननु देव्या वंदने किं निमित्तमित्यत उक्तं देवी भाग्यात्मिका भाग्या
भिमानिनी। सरस्वत्या अपि ग्रंथारंभे तन्नमस्कार्यत्वे हेतुमाह सरस्वतीति। वाक्यानामभिमानिनी। अतो वाक्यप्रयोगतद्र्थाव
धारणरूपे कार्ये तत्क्रियात्मकदेवतानमस्कारो युक्त इत्यर्थः। तस्मात्सर्वत्र निमित्तसद्भावाद्ग्रंथारंभे वश्यं नमस्कार्यत्वमित्युप
संहरति। तस्मादिति। तेन नारायणादयो खिलानमस्याः इत्यर्थः॥ ७ ॥ ॥ ॥ ॥

श्री

उक्तोपि भारतारंभे तेन नमस्कार्य इत्याह। कृष्णाविति। अत्रैकः कृष्णो नारायणावतारो देवकीनंदनः। द्वितीयस्तु सत्यवतीनंदनो व्यासः। सत्या
सत्यभामादेवीस्वरूपा भीमो भीमसेनो वायुस्वरूपो नरो नाम शब्दवाच्यः। पार्थश्च नरावेशीतरशेषवाच्यः। कृष्णा द्रौपदी सरस्वत्य
भिकेत्येते भारते तु उक्ताः प्रतिपादिता हि यस्मात्तस्मादेते तेरिवलावंद्या इति पूर्वेणान्वयः। नारायणादीनां भारतप्रतिपाद्यत्वेन तत्तदा
रंभे वंद्यं ते वंद्या इति विशेषं पायतादिभिस्तु एव तन्नमस्कृता इति भावः ८ एवं प्रसंगात्संगत्या प्राप्तप्रमेयमध्यायद्वये प्रतिपादितं
इदानीं प्रकृतमनुसरामीत्याह। सर्वस्येति। निर्णयपदस्य नित्यसापेक्षत्वात्समासः। सर्वशास्त्रनिर्णयस्तु वाक्योक्तः रीत्यध्या
यममध्यायद्वये विधायेत्यर्थः। तत्रेत्थं भावमाह। हरिपदेति। तेन निमित्तेनेत्यर्थः। मरुतो वायोरानंदतीर्थवरनामवतो भीमो।भीमात्मा

तृती

कृष्णौ सत्याभीमपार्थौ तु शेषस्तूक्ता हि भारते ८ सर्वस्य निर्णयस्तु वाक्यसंस्तुतीस्तु व्याययोर्हरिपदस्मरणेन कृत्वा।
आनंदतीर्थवरनामवतीया भीमा तनुर्मरुत आहकथाः परस्य ९ व्यूह्यस्त्वतश्चमावान्सएकोमायाश्रियंसृष्टिवि
धित्सयारारूपेणाद्वेधा स वासुदेवनाम्नाविरिंचं स सुषुवे च सात्त्वतः १० ॥ ॥ ॥

विद्यमानात्तृतीयात्तत्स्तृतीयं रूपं मद्वापरनामकं परस्य सर्वोत्तमस्य हरेः कथा जगत्सर्जनादिचरितानि आह वक्तीति संबंधः ९
तत्रेत्यं विचिंत्येत्यादिना सर्वाध्याये मूलरूपी भगवान्वासुदेवादिरूपेण विभर्त इत्युक्तं ततः किमकारीत्यत आह संक्षेपेणोक्तं मिश्र
सृष्टिं प्रपंचयति। व्यूह्येत्यादिना। एक एव स भगवान्वासुदेवादिरूपेण चतुर्धा व्यूह्य व्यूहो व्युत्पत्त्या वर्तमानः स च चतुर्रूपेषु पूर्वेणाद्ये
न वासुदेवनाम्ना वासुदेवनामकेन सृष्टिंकर्तुमिच्छया मायां श्रियं मायारूपां श्रियं देवीं आर प्राप्तवान्। तत्र वासुदेवरूपो भग
वान्सृष्टिंकर्तुं मायादेव्यां स्वभार्यायां वीर्यमाधत्तेति भावः। तदनंतरं स मायातो वासुदेवाद्विरिंचं सुतं सुषुवे इत्यन्वयः १० ॥

तां॰टी॰
५०

अथचतुर्मुखोत्पत्त्यनंतरंसंकर्षणात्तद्भार्यायांजयायांवायोरुत्पत्तिमाह।संकर्षणादिति।साक्षान्मुख्यतयावतसंविदात्मावलसंविदो
रात्माभिमानी।तदात्मकश्चवायुः।संकर्षणाद्वक्षवेत्पन्नयः।वायो:स्वरूपंनिर्धारयति।यएववायुरयएतद्ब्रह्मकल्पानंतरमुत्तरक
ल्पेभविष्योविरिंचोहियस्मात्ततस्तस्मात्ततोविरिंचादन्य:परोनास्तीत्यर्थः ११ तत्रान्यत्रग्रंथेवासुदेवसंकर्षणायो।स्तत्रसुरूपा
त्पत्राविस्तुच्यतेतस्तद्विरोधस्त्यतस्तत्रापितत्वद्ध्वाच्यो ब्रह्मवायुरएवेत्याह।स्तत्रामिति।सवायुःयःसंकर्षणादुत्पन्नःसस्तत्र

संकर्षणाच्चापिजयातन्नूजोवन्हवसाक्षाच्चलसंविदात्मावायुर्यएवाथविरिंचनामाभवि
ष्यन्नाद्योनपरस्ततोहि ११ सूत्रंसवायुःसुरूपोविरिंचःप्रद्युम्नतश्चाथपन्नतोस्त्रियो
त्वेप्रजज्ञातेर्यमतेतत्र पूर्वाप्रधानसंज्ञा प्रकृतिर्जनित्री १२ ॥ ॥ ॥ ॥

मित्युच्यतेसर्वाधारत्वात्।वासुदेवादुत्पन्नःसब्रूपस्त्रुच्यते।सर्वजीवाभिमानित्वात्।सर्वजीवाभिमानीडपरःसुरूपउच्यतइ राम
तिवचनात्।अथतृतीयरूपस्यप्रद्युम्नस्योत्पत्तिमाह।प्रद्युम्नतश्चेति।प्रद्युम्नभार्यायांकृतौप्रद्युम्नात्रदेवस्त्रियोउत्पन्नइत्य ५०
र्थः।विलंवेनोत्पत्तिंनिवारयतियमतेतिप्रद्युम्नादुत्पन्नयो:सरस्वतीभारत्योस्तद्रूपविशेषापेक्षयानामविप्रोषंजनेत्याह।
तत्रसर्वेति।तत्रतयोर्मध्येपूर्वापूर्वमुत्पन्नाप्रधानाभिमानित्वात्प्रधानसंज्ञाएवंप्रकृतिःप्रकृतिसंज्ञायत।प्रकृतिर्वाराजनि
त्रीत्यर्थः १२ ॥

द्वितीयास्त्रीश्रद्धासंज्ञेत्यर्थः।अथतदुत्पत्त्यनंतरंतयोःस्त्रियोर्यथाक्रमंपुंसापुरुषेणविरिंचेनस्वतनावाहुनाचयोगःसंबंधोबभूवे
त्यर्थः।ननुहरिप्रेरणामंतरेणाकथंतयोःसंबंधोबभूवेत्यतउक्तं।हरेर्नियोगादिति।अथयोगानंतरमेवशेषःखपर्णाख्यतयोःसका
शात्प्रसूतावित्यन्वयः।सहैवेति।यमलाविवोत्पन्नाविति।तयोःपुरुषस्त्रियोःसहैवप्रत्येकमेवोत्पन्नावितिचार्थः। १३ शेषख
पर्णयोरपितद्रूपविशेषापेक्षयातामविशेषमाह।शेषइति।तयोरेवमध्येशेषोजीवनामाखपर्णाख्यकालात्मकःकालनामास

श्रद्धा द्वितीयाथतयोर्यथायोगोबभूवपुंसैवचस्वतनाम्नाऽहरेर्नियोगादथसंप्रसूतौ
शेषःखपर्णाख्यतयोःसहैव १३ शेषस्तयोरेवहिजीवनामाकालात्मकःसोऽथख
पर्णआसीत्।तौवाहनंशयनंचैवविष्णोःकालाजयाद्याश्चततःप्रसूताः १४

ता तयोःसृष्टिरूपहरिसेवाभावेपिअन्यैवसेवासमजनीत्याह।ताविति।शेषःखपर्णाख्येतिनिर्देशक्रममात्रंनतुतयोस्तारतम्यम
स्तीतिसूचनार्थंवाहनंशयनंचेतिक्रमोल्लंघनं।अन्यथाशेषस्यप्रथमनिर्देशाच्छयनंवाहनमित्यवक्ष्यत्।खपर्णोविष्णोर्वाहनं
शेषस्तुशयनमितिभावः।शेषखपर्णयोःपार्षदत्वान्तरत्वनिरूपसंगेनकालादीनामुत्पत्तिरुक्तास्तिपुराणोक्तंतदनुवादपूर्वकं॥
तामुत्पत्तिंघटयित्वमाह।कालाइति॥ १५ ॥ ॥

ततस्तयोर्गरुडशेषयोःकालाःकालनामकाःजयाद्याःजयविजयाद्याःगरुडात्कालाःशेषाज्जयाद्याइतिज्ञेयं॥

विष्णोर्ब्राह्मणजातिः सन् ब्रह्मा लब्धे चतुर्मुखः। यतो यद्‌गतस्तस्मात्स्वजातिरजायत। वायुः सदाशिवो नेतगणुडःशाङ्कर एव च। कामं

नन्वादिसृष्टौ पूर्वोत्पन्नानामाधिक्यमितिहि स्थितिस्तत्रेंद्रादिभ्यः पूर्वमुत्पन्नत्वस्योक्तौ जयादीनां तदाधिक्यप्राप्तिरित्यत आह। कालादयोऽति।
काला: कालाख्या जयाद्याश्च विष्णुपार्षदा अपि यस्मात्कारणाद् दंडात्परतः ब्रह्मांडोत्पत्तेरनंतरं तदंतरा नित्यत्वो विपर्ययेणाप्रसृता
स्तत: कारणात्ते खिला: कालाद्या: स्वरेभ्यस्तत्त्वाभिमानिभ्यो देवेभ्यो नीचा एवेत्यर्थ:। स्वराणां बुशेषात्युत्पत्त्यनंतरं जयादीनामुत्पत्ति
कथनेपि सोत्पत्तिर्नस्वस्मात् किं तु ब्रह्मांडोत्पत्त्यनंतरोत्पत्तित्वात्स्थूलेति तदपेक्षया स्वराणां वचनानां प्रवृत्तत्त्वेपि नतावताधिक्य
प्राप्तिरिति भाव:। पार्षदेष्वपि विशेषोऽस्तीत्याह। विष्वक्सेनद्रति वायुजः वायोर्जातो विष्वक्सेनः पार्षदः खेनाकाशाभिमानि
नागणपतिनातुल्यः समानद्रत्यर्थः। अतएतदितरेषां पार्षदानां बलजत्वं तत्त्वाभिमानिभ्यो नीचत्वं चोक्तं भवति २५ एवं ताव‌द्

कालाजयाद्या अपि विष्णुपार्षदा यस्माद् दंडात्परतः संप्रसृताः नीचाः स्वरेभ्यस्तत एव ते खिला विष्वक्सेनो वायुजः खेन तुल्यः
२५ व्रहात्स्तृतीयात्तु नरेव विष्णोर्देवांश्च तु वर्णागतान्समस्तान्। संगत्यवीजात्मतया निरुद्धोन्यधत्त शांत्यां त्रिगुणात्मिकायां

स्वदेवादिमूर्तित्रयात्सदृग्रूपेण ब्राह्मणादिचतुर्वर्णाभेदेन विरिंचादि देवानां सृष्टिं वदता भगवताचार्येण यत्प्रायुक्तं शारदांस   ॥ २६ ॥
हसंस्थित्वास्व मूर्तिभिरिति तदनुक्त कथनेन सम्यक्प्रपंचितं भवति। अथ यदुक्तं प्रद्युम्नरूपक इमानि त्यादि तदपि प्रपंचय
तिव्रहादिति। विष्णोस्तृतीयाद्व्रहात्प्रद्युम्नाच्चतुर्वर्णागतान्समस्तान्वीजात्मतया संगत्य गृहीत्वा सत्वादिभेदेन त्रिगुणात्मिका
यां शांत्यां भार्यायां अनिरुद्धोन्यधत्तस्थापितवान्। तान्तेव स्वदृग्रूपेण स्रष्टान्देह योगेनोत्पादयितुं शांत्यापयामासेत्यर्थः
॥ अत्र त्रिगुणात्मिकायामित्यनेन सत्वादिगुणसृष्टिः पूर्वं व तत्वसृष्टिमप्यभिप्रैति   २६ ॥ सां ॥   ॥

उ स्वर्वर्णश्चैव सोमश्च सूर्यस्तथैव च। एवमाद्याश्च त्रियास्तु दैवा× येनो गतं नृपेण३× देवा ब्रह्मविनिर्मिताः। विवस्वानिंद्र वरुण
विष्णुश्चोत्पे हितेस्तुताः। नुद्गा द्रव्येतपानुद्गा वायो नभ्ये च वायवः। अग्नेरन्ने च वसवो येष्टयाज्ञे सेव कीर्तिताः। अश्विनौपृथिवी

राम ५२

ततस्तदनंतरंमहत्तत्वंतत्त्वदेहोयस्यासौतथोक्तः।तथाभूतःस्थूलात्मनैवाजनितत्वपूर्ववत्सूक्ष्मरूपेण।वाक्देवीसरस्वतीवाक्वागभि
मानितयास्थूलात्मनाजनीतिचशब्दार्थः।एवंचतत्त्वसरस्वत्योःस्थूलसृष्टिमुक्त्वारुद्रस्यापिस्थूलसृष्टिमाह।तस्यामिति।सम
हत्तत्वाभिमानीविरिंचस्तस्यांवागभिमानिन्यांदेव्यामहंकारतत्वमहंकारतत्वाभिमानिनंरुद्रंबुद्धिंचबुद्ध्यभिमानिनीउमांतदर्धदेहांत
नां स्यरुद्रस्यार्धदेहांपत्नींससर्जेत्यर्थः १७ एवंस्थूलात्मनासृष्टांरुद्रादीनामपिस्थूलात्मनासृष्टिमाह।बुध्यामिति।बुध्यांबुध्यभिमा
निन्यामुमायांसशिवः।योहंकाराभिमानित्वेनसृष्टःसइत्यर्थः।त्रिरूपः।वैकारिकतैजसतामसाहंकाररूपवान्त्रयथाक्रमेणरूप
त्रयेणससर्जेतिसंबंधः।केनरूपेणकिंससर्जेत्यतोवैकारिकादिक्रमेणाह।मनश्चेतिमनस्तत्वंतदभिमानिदेवंचवैकारिकदेवसंघा

ततोमहत्तत्वतनुर्विरिंचःस्थूलात्मनैवाजनिवाक्चदेवी।तस्यामहंकारतनुंसरुद्रंससर्जबुद्धिंचतदर्धदेहां १७ बुध्यामुमायांस
शिवस्त्रिरूपोमनश्चवैकारिकदेवसंघान्दशेंद्रियाण्येवचतैजसानिक्रमेणखादीन्विषयैश्चसार्द्धं १८ ॥ ॥

निंद्रियाणिविषयेषुप्रेरयितृत्वाविकारजनकत्वेनतद्रूपत्वाच्चानिंद्रियाभिमानिनोदेवांश्चवैकारिकाहंकारादात्मरूपात्ससर्जेत्य
र्थः।तैजसाहंकारकार्यमाह।दशेति।तैजसानितैजसाहंकारकार्याणिज्ञानेंद्रियकर्मेंद्रियभेदेनविद्यमानानिघ्राणादीनिवागादी
निचतैजसाहंकाररूपादुत्पादितवानित्यर्थः।तामसाहंकारकार्यमाह।क्रमेणेति।विषयैस्तन्मात्राभिःसार्द्धंखादीनाकाशादि
भूतानितामसाहंकाररूपाद्भूतादेरुत्पादितवानित्यर्थः।क्रमक्रमेणेत्यनेनादौशब्दतन्मात्राततआकाशस्योत्पत्तिस्ततःश
ब्दतन्मात्रासहितेनाकाशेनस्पर्शतन्मात्रोत्पत्तिस्ताभ्यांवायुभूतोत्पत्तिस्ततःपंचभिस्तेजसउत्पत्तिःइत्येवंक्रमेणतन्मा
त्राभूतोत्पत्तिर्भवतीतिसूचयति १८ ॥ ॥

तत्ररुद्रस्यवैकारिकादिभेदेनत्रिरूपत्वंसंपादयितुंपुनःपुरुषनामकाद्विरिंचादुत्पत्तिमाह।हंसइति।अत्रचशब्देनकल्पनविशेषःप्र
मारांतरसिद्धःसूच्यते।तथाहि।सत्वादिभेदेनत्रिविधायांप्रकृत्यभिमानित्वेनप्रकृतिशब्दवाच्यायांसरस्वत्यांविरिंचेतमहत्तत्वा
भिमानिनावीर्यमुत्सृष्टं।ततएकीभूतात्तस्माद्वीर्यात्सूत्रात्मकस्यवायोःस्वस्यचसहैवोत्पत्तिस्ततउत्पन्नाद्वायोरुत्पन्नोरुद्रस्तैज
सउच्यते।तस्माद्वीर्यादुत्पन्नात्खचतुर्मुखादुत्पन्नोरुद्रोवैकारिकउच्यते।तस्मादेवचोत्पन्नाच्छेषादुत्पन्नोरुद्रस्तामसउच्यते।एवं
रुद्रस्यत्रिरूपत्वंसंपन्नं।तदुक्तं।वायुस्तुब्रह्मणःपुत्रःप्रकृतौसमजायत।त्रिगुणात्मासबुद्धिष्टःप्रायःसात्वात्मकस्तथा।गायत्रीवे
वसावित्रीतथैवचसरस्वती।एवंरूपाहिप्रकृतिरेकासत्वादिभेदतः।तास्तुवीर्यंसमुत्सृष्टंब्रह्मणोकत्वमागतं।ससूत्रात्माहतु

हंसःप्रकृत्यांचपुनर्विरिंचाच्छिवोऽथतस्मादखिलाःसुरेशाः।जाताः
सशक्राःपुनरेवसूत्रंचवाक्श्रुतानापस्वरप्रवीरात् १९ ॥ ॥

द्विष्टोवायुर्लोकप्राणायकः।तस्यापिसूत्रंमहाबीन्द्रधारणा॥द्विस्वरव्ययः।सत्रवपुत्रस्त्वहंकारः।सरुद्रःसमुदाहृतः।सूत्रात्मनाम
हंस्याप्यिसहजोजातश्चतुर्मुखः।तस्यापिपुत्रोऽहंकारःसचानंतउदाहृतः।अनंतादपिरुद्रोभूत्तब्रह्मणश्चेतिसत्रिधा।वैकारिको
ब्रह्मजस्तुतैजसोऽजवायुजःस्मृतः।तामसोऽनंतजश्चैवसएकोगुणभेदतःइत्यादि।तत्रश्लोकेवंयोजना।हंसःपुरुषात्प्रकृत्यांगाय
त्र्यादिभेदेनत्रिविधायांसरस्वत्यामभिव्यक्तात्स्वस्माच्छिवउत्पन्नइतिवैकारिकाहंकाररूपकथनं।तथाविरिंचादुत्पन्नाच्छेषा
च्छिवउत्पन्नइतितामसाहंकारकथनं।तथाविरिंचोत्पन्नाद्वायोःशिवोजातइतितैजसाहंकारकथनं।एवमुत्पन्नाच्छिवाच्छक्राद्युत्पत्ति
प्रकारमाह।अथतस्मादिति।इदानींरुद्रस्यतृतीयंरूपंवक्तुंपुनःसूत्ररूपाद्वायोःशेषाद्युत्पत्तिप्रकारमाह।पुनरेवेति।सूत्राद्वायोः
अस्वानाम्निभारतीस्वरप्रवीरात्स्वरश्रेष्ठात्सुतानापेत्यन्वयः १९ ॥

तानेवस्तुतात्रिर्दिशाति।शैवमिति।अयंशिवस्तैजसस्तत्तुत्तंभवति।अथवायोरुत्पन्नादिंद्रात्सृष्टिप्रकारमाह।अथेंद्रतश्चेति।यज्ञगणास्त
दभिमानिनोदेवाश्चेत्यर्थः।ब्रह्मांडोत्पत्तेःपूर्वंसृष्टिकथनसंगत्याप्राधान्यंवासुदेवस्वरूपाद्विभूर्तिंभगवदवतारत्वंदर्शयति।ततश्चे
ति।मायावासुदेवपत्नीसत्वादिरूपैःसत्वादिगुणाभिमानित्वेनत्रिविधाबभूव।अथानंतरंवासुदेवात् २० सत्वात्मिकायांसत्वा
भिमानिन्यांश्रीसंज्ञिकायांनिरंतरोपिनिर्भेदोपिसन्नारायणोविष्णुनामाबभूवेत्यन्वयः।एवंरजस्तनौरजोभिमानिन्यांभूसंज्ञिकायां

शैवंशिवंचेंद्रमथेंद्रतश्चसर्वेसुरायज्ञगणाश्चजाताः।ततश्चमायात्रिविधाबभूवसत्वादिरूपैरथवासुदेवात् २० सत्वा
त्मिकायांसबभूवतस्मात्सविष्णुनामैवनिरंतरोपि।रजस्तनौचैवविरिंचिआसीत्तमस्तनौशर्वइतित्रयोस्मात् २१ ॥१॥

विरिंचःविरिंचनामकंविरिंच्यंतर्गतंरूपमासीत्प्रादुर्भूतमित्यर्थः।तथातमस्तनौतमोभिमानिन्यांदुर्गासंज्ञिकायांशर्वःशर्वनाम
कंशर्वांतर्गतंरूपमासीदितिउक्तप्रकारेणत्रयोविष्णुब्रह्मशिवावासुदेवाज्जाताइत्यर्थः।एतदज्ञानादेवाहुस्त्रितयैकंभ्रांतिईशानाभि
तिज्ञातव्यं।तथाचसौकरायणश्रुतिः।अथपत्रपीवाचप्रकृतिःसत्वंरजस्तमइतितांनारायणःपर्यपश्यत्।अन्नत्यप्रतिष्ठंनं
वाएतमाह।सुरूपरतिद्रष्टोत्येषभवति।सत्रेधाबभूवेपांडुराणामुपादानार्थंविष्णुर्वावसत्वस्यरजसोब्रह्मेशानोनामत
मसःसत्त्वाविवेशाब्जसानांचतुर्मुखं ईशईशा ईशानेपंचमुखः।योवाईश ईशानमाविवेशांतवाएतंकालइत्याचदंतइति
॥ २२ ॥

३

ता०टी०
५३

एवंब्रह्मांडोत्पत्तेः पूर्वं विरिंचादीनां पुरुषादित्वेन सूक्ष्मसृष्टिं उक्त्वा तत्वसृष्टिपूर्वकं तत्वाभिमानित्वेनानिरुद्धात्स्थूलसृष्टिमुक्त्वाधुना।
पुरुषादिरूपेभ्यो विरिंचादिभ्यः शेषादीनां स्थूलसृष्टिं चोक्त्वाप्येदानीं ब्रह्मांडोत्पत्त्यनंतरं तदंतर्ब्रह्मादीनां विष्णोः सकाशात्स्थूलसृ
ष्टिं वक्तुं ब्रह्मांडसृष्टिं वदिष्यन् तत्सृष्टौ ब्रह्मादीनामशक्तिं ततएव तन्निर्माणार्थं तेषामेव श्रीविष्णुप्रार्थनप्रकारं च दर्शयति। एते हि
त्यादिना। एते पूर्वं स्वप्रादेवा विरिंचाद्या अंडसृष्टौ ब्रह्मांडनिर्माणे स्वतोऽशक्नुवंतो हरिमेत्य तं तुष्टुवुः स्तुतिं चक्रुरित्यर्थः। तामेव स्तु
तिं दर्शयति। त्वंच इति। जगतश्चित्रः सर्गः आश्चर्यरूपा सृष्टिः विचित्रः सर्गः नानाप्रकारसृष्टिः तादृशसर्गाभिः सीमा अपरिमिता

एते हि देवाः पृथगंडसृष्टावशक्नुवंतो हरिमेत्य तुष्टुवुः। त्वं नो जगच्चित्रविचित्रसर्गनिःसीमशक्तिः कुरु सन्निकेतं २२ इति स्तु
तस्तैः पुरुषोत्तमोऽसौ स विष्णुनामा श्रियमाप सृष्ट्यै। स्वपावसैवाऽभवो द्वजस्य भूषं हिरण्यात्मकमंडं भुवमध्ये २३ ॥

शक्तिर्यस्यासौ तथोक्तः। तादृशस्त्वं नोऽस्माकं सन्निकेतं संकेतं मार्गप्रदर्शनं ब्रह्मांडाख्यं गृहं वा कुर्विति प्रार्थितवंत इत्यर्थः। नन्वहमपि
भवत्स्वेवैक इति मत्प्रार्थने किं स्यादित्याशंकानिरासार्थं जगच्चित्रविचित्रसर्गनिःसीमशक्तिरिति हेतुगर्भविशेषणं २२ एवं स्तुत्या
भिमुखस्य विष्णोर्ब्रह्मांडनिर्माणप्रकारमाह। इतीति सोऽसौ सोऽसौ अयं पुरुषोत्तम इति अनेन प्रकारेण स्तुतः प्रार्थितश्च विष्णुनामा वि
ष्णुरूपः सृष्टये सृष्ट्यर्थं श्रियमाप प्रापेत्यर्थः। सा श्रीरेवाथो द्रजस्य सकाशाद्धिरण्यात्मकं भूषं वीर्यमंडं यथा भवति तथा भुवम
ध्ये सुषावेत्यर्थः २३ ॥

राम
५३

सद्गुणानामालयस्वामी २ वामादिक्रमेणानिस्रत ४

तस्मिन्ब्रह्मांडे हरिणा सार्द्धं सर्वे विरिंच्याद्याः सुराः प्रविष्टा इत्यन्वयः। अत्र ब्रह्मांडे विष्णोर्नाभेः सकाशाल्लोकात्मकं लोकाधारत्वेनैतं पद्मम
भूदित्यर्थः। अमुष्य पद्मस्य मध्ये सद्गुणात्मा विरिंचः सुतरञ्जनिजात इत्यर्थः २४ तस्मात्पद्माद् उत्पन्नाद्विरिंचात्सुतः सर्वे सुरा रुद्राद्या जाता
इत्यर्थः। ते रुद्राद्याः सुरा जातमानाः श्रीमुख्यप्राणस्य स्वोत्तमत्वं जानंतोपीत्यर्थः। तथाप्यन्वयव्यतिरेकाभ्यां श्रीमुख्यप्राणस्य सर्वदे
वोत्तमत्वनिर्णयाय निर्णयार्थं पद्मयोनेः कायाच्छरीरात्तरतिः सत्यमारुतं ताताः क्रमशः पुनः पद्मयोनिदेहं संप्राविशन्संप्रविष्टा इत्यर्थः
२५ तत्र च तद्देहस्वशरीरनिर्गमनप्रवेशाभ्यां कथं मारुतस्योत्तमत्वं निर्णीतमित्यत आह पपातेति। तस्यैव वायोरेवावेशात्पुनरु

तस्मिन्प्रविष्टा हरिणैव सार्द्धं सर्वे सुरास्तस्य बभूव नाभेः। लोकात्मकं पद्ममसुष्य मध्ये सुतो विरिंचो जनि सद्गुणात्मा २४
तस्मात्सुताः सर्वसुराः प्रसूतास्ते जातमाना अपि निर्णयाय। तिः सत्यकायादुत पद्मयोनेः संप्राविशन्क्रमशो मारुतां
ताः २५ पपात वायोर्गमनाच्छरीरं तस्यैव चावेशत उत्थितं पुनः। तस्मात्स एको विबुधप्रधान इत्याश्रिता देवगणास्तमेव २६

त्थितं चेत्यर्थः। अत एव ते ता अहिंसंताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हंतास्माच्छरीरादुत्क्रामामेत्यादि। तथा ता अहिंसंतैवाहमुक्
थमस्म्यहमुक्थमस्मीति ता अब्रुवन्हंतेदं पुनः शरीरं प्रविशामेत्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यतीत्यादि श्रुतिविवादाख्यायिको
क्ता भवति। एवं वायोर्निर्गमनप्रवेशनिमित्तकशरीरपातोत्थानलिंगेन सर्वदेवोत्तमत्वे निर्णीते पुनर्देवाः किं कृतवंत इत्यपेक्षायां च सुरा
क्थमसि त्वं वयं स्मेत्यादिखंडशेषार्थानुवादरूपेण देवानां मुख्यप्राणाश्रयणप्रकारमाह। तस्मादिति। स एक एव मुख्यप्राणो विबुध
प्रधानः सर्वदेवोत्तमः इति निर्णीय सर्वदेवगणास्तमेवाश्रियतादित्यर्थः २६ ॥

नबतं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत्प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषमित्युपक्रमे विस्नोरपि ब्रह्मपदोक्तस्य पुरुषपदोक्तस्य च ब्र
सुखस्याप्युक्तेर्विरिंचस्य च तत्सुखयोः शरीरे सतोरपि देहपातस्य जातत्वात्तत्पातयोः सतोरपि शरीरोत्पत्तेरप्रयोजकत्वाद्वा यो
स्तदुभयोत्तमत्वमपि प्राप्तमित्यत आह। हरेरिति। हरिविरिंचयोर्मध्यसंस्थितेर्मध्यस्थत्वेन स्थितत्वाद्वायोः सर्वोत्तमत्वप्रकटनाय
शरीरपातादौ स्वयमुदासीनत्वेन स्थितत्वादित्यर्थः। चक्षुः श्रोत्रं मनो वाक् प्राणा इति चक्षुरादिपदोक्तानां तदभिमानिनां रुद्रा
दीनामेव ता अहिंसतेति तच्छब्देन परामर्शेन विचादोक्तेः विष्णुविरिंचयोर्विवादव हिम्हेतत्वेनोदासीनत्वविद्यमानत्वात्। तद

हरेर्विरिंचस्य च मध्यसंस्थितेस्तदन्यदेवाधिपतिः समारुतः। ततो वि
रिंचो भुवनानि सप्त सप्त प्रकान्याशु चकार सोऽज्ञात् २७ ॥ ॥

तिरिक्तसर्वदेवाधिपतिर्मारुत इति निर्णयो जात इति भावः। तथा च प्रमाणं मत्रा उदासीनवदासीनो लोके मावस्था असंभवः। तेषां ब
लपरीक्षार्थं वाय्वादीनां समस्तशरीरेति। लोकात्मकं पद्मनित्यनेन च तद्देशभुवनानां प्रादुरुत्पत्तिः सूचिता तां विस्तारयन्नतस्मा
त्वतः सर्वसुरा इत्यादि प्रपंचयति। ततद्त्पादिता। ततो नंतरं प्रादुरुत्पन्नो विरिंचस्तदंतर्यामी च सप्तकानि सप्तभिरतलवि
तलादिभिः सहितानि सप्तपृथिव्यादिभुवनानि च तद्देशभुवनानीति यावत्। अज्ञाद्व तद्देशदलात्मकारेत्यर्थः। आशिव काद्धु
त्यनेन विचित्रलोकनिर्माणे ब्रह्मणो नायासं सूचयति २७ ॥ ॥

तस्माद्विरिंचाद्देवपुनर्ब्रह्मांडांतरेपिवैकारिकाद्याद्देवावैकारिकाहंकारोत्पन्नाइंद्रियाभिमानिनोदेवास्ताद्यायेषांतैजसाहंका
रोत्पन्नानामाहंकारिकाप्राणादीनांतेनतथाउक्तः कथंभूताःसशिवाः।शिवेनसहवर्तमानाःतथाऋषयोमरीचिप्रमुखाश्चवभूवु
रित्यर्थः।उक्तानामेवशिवादीनांचतुर्मुखादुत्पत्तिस्थानविवेचनेनविवेचयति।अथअहमिति।ब्रह्मणोंतःकरणंवृत्तिभेदेनत्रि

तस्माद्वद्देवाऋषयःपुनश्चवैकारिकाद्याःसशिवावभूवुः।अग्रे
शिवोहंभवएवबुद्धेरुमामनोजौसहशक्रकामौ २८ ॥ ॥

धामितंअहंवृत्तिबुद्धिवृत्तिमनोवृत्तिरिति।तत्राग्रेपूर्वमेवशिवोहंभवः।अहंवृत्तेःसकाशात्भवउत्पत्तिर्यस्यासौतथोक्तः।अहं
वृत्त्याख्यांतःकरणेनशिवउत्पन्नइत्यर्थः।तथाउमापार्वतीबुद्धेर्बुद्धिवृत्तेःसकाशादुत्पन्नेत्यर्थः।शक्रकामौसहमनोजौमनोवृ
त्त्याजाताविन्यर्थः।सहेत्यनेनवक्ष्यमाणादुर्वादीनांमनोवृत्तिजातत्वाविशेषात्किंचिद्वांतरतम्याभाववदत्रापिशक्रका
मयोःस्वरूपतारतम्यंनास्तीतिसूचयति २८ ॥ ॥

×पूर्वश्लोके शक्रकामयोर्मनसोजातत्वमुक्तं तरश्लोके अश्विनीनाम्नासोजातत्वं निरूपयन्नाह :=

ता०टी० ५५ तकेवलं शक्रकामावेवमनोजौ किं तर्हि अन्येपि मनोभूत्वाजाता इत्याह युरुरिति अत्र शक्रकामादीनां सर्वेषां मनोजातत्वेपि तत्सा
म्यं मंतव्यं किंतर्हि युक्तवर्दीनां शक्रकामावरत्वं ज्ञातव्यमिति ज्ञापयितुं योगविभागः अथ चक्षुर्मुखस्य चक्षुरादीन्द्रियेः सूर्यादी
नामुत्पत्तिमाह चक्षुरित्यादिना चक्षुःश्रुतिभ्यां चक्षुरिंद्रियश्रोत्रेंद्रियाभ्यां स्पर्शात्त्वगिंद्रियाच्च यथाक्रमं रविशशीवर्मद।ती

सुरुर्मक्षुर्द्दृगुतानिरुद्धः सहैव शच्यामतसः प्रसूताः चक्षुःश्रुतिभ्यां स्पर्शात्सहैव रविः शशीवर्मदमे प्रसूताः २९
जिह्वाभवो वारिपतिर्नसोष्णता सत्पदस्रौ क्रमशः प्रसूताः ततः सनाद्याश्च मरीचिमुख्या देवाश्च सर्वे क्रमशः प्रसूता ३०

मैत्रयोदेवाः प्रसूता इत्यर्थः २९ तथा वारिपतिर्वरुणो जिह्वाभवो जिह्वायाति जिह्वेंद्रियाद्भव उत्पत्तिर्यस्यासौ तथोक्तः जिह्वाया
वरुण उत्पन्न इत्यर्थः तथा नासत्यदस्रौ अश्विनौ तौ तसौ ब्रह्मणो नासापुटयोः सकाशादुत्पन्नावित्यर्थः क्रमश इत्यनेन पूर्व राम
दिष्विवसूर्यादिषु साम्यं ध्यानमंतव्यमिति सूचयति ततश्च तन्मुखादेव सनाद्याः सनकाद्यास्तथा मरीचिमुख्याः मरीचिर्मुख्यो ५५
येषां अत्र्यादीनां तथा सर्वे देवाः तत्तोन्ये देवाश्च क्रमशः प्रसूता इत्यर्थः ३० ॥

न केवलं देवर्ष्यादय एवोत्पन्नाः किंत्वसुरादयोपि तत एवोत्पन्ना इत्याह । तत इति । असुरा आद्या येषां राक्षसयातुधानादीनां ते त
थोक्ताः । तथान्ये ऋषयो मनुष्याश्च जाता इत्यर्थः । किं बहुना चित्रं विचित्रं जगद्विरिंचत एवोत्पन्नमित्याह । जगदिति । नन्वेवं देव
दीनां क्रमेणोत्पत्तिकथने किं प्रयोजनमित्यपेक्षायां तेनैव क्रमेण तेषां स्वरूपतारतम्यज्ञानं प्रयोजनमित्याह । उत्तमादि

ततोऽसुराद्या ऋषयो मनुष्या जाता द्विचित्रं च विरिंचतोऽन्तरा । उत्तमा
त्पूर्वभवस्तु यो यः श्रेष्ठः स सर्व्वोऽसुरकान्ततेच ३२ ॥ ॥

दिति । उत्तमेन क्रमेण यो यः पूर्वभवः पूर्वमुत्पन्नः स स श्रेष्ठ उत्तम इति ज्ञातव्यमित्यर्थः । ननु हिरण्यमधुकैटभादीनामसुराणां
देवर्ष्यादिभ्योपि पूर्वमुत्पत्तिश्रवणात्तत्र श्रेष्ठत्वं नास्ति अथ च पूर्वमुत्पन्नत्वं विद्यत इति हेतोर्व्यभिचारोऽन्यथा तेषामपि
देवर्ष्याद्युत्तमत्वं प्राप्तमित्यतो व्याप्तेरपवादमाह । असुरकान्त इति । असुरव्यतिरिक्तो यः पूर्वमुत्पद्यते स स्वानंतरमु
त्पन्नादुत्तम इति व्याप्तेर्न कोपि दोष इति भावः ३२ ॥

नचतथापिव्यभिचारः। रुद्रापेक्षया सनकादीनां पूर्वमुत्पन्नत्वश्रवणात्। तत्र हेतुसद्भावेपि साध्याभावादित्यत आह। पूर्वस्त्विति
। आदिसृष्टौ पूर्वमुत्पन्नः पुनरवांतरसृष्टौ पश्चादुत्पन्न इत्येतावता स्वस्वस्मात्पूर्वजातस्य स्वावरस्य सकाशादश्रेष्ठताम
वरतां कथंचित्केनापिप्रकारेण नैतिनप्राप्नोतीत्यर्थः। तथाचादिसृष्टौ योयः पूर्वमुत्पन्नः सः सः स्वोत्पत्त्यनंतरमुत्पन्नादुत्तमत्

पूर्वस्तु पश्चात्तु नरेव जातो नाश्रेष्ठतामेति कथंचिदस्य। गुणास्तु
कालात्पितृमातृदोषात्स्वकर्मतो वाभिभवं प्रयांति ३२ ॥

तिव्याप्तेराश्रयणात्। नकोपिदोष इतिभावः। नन्वत्तदेवर्ष्यादिषु मातृपत्र्वेनावृत्तेरुत्तमेणोत्तमेषु पितृानादयो गुणान दृ
श्यंतेतत्र किंकारणमित्यत आह। गुणास्त्विति। गुणाः ज्ञानादयः कालात्कलिकालात्तत्संबंधात्पितृमातृदोषात्मातृदोषात्
परिणीततद्रेतः शोणितसंबंधात्स्वकर्मतो वा स्वार्जितप्रारब्धादिकर्मसंबंधाद्वाभिभवमननभिव्यक्तिं प्रयांति गच्छंतीत्यर्थः
पुनस्तद्दोषवियोगेते गुणाः प्रादुर्भवंतीतिभावः ३२ ॥ ॥

एवमादिसृष्टौ पूर्वोत्पन्नत्वहेतुना पूर्वपूर्वस्य विरिंचादेराधिक्यक्रमं प्रसाध्येदानीं व्युत्क्रमेण लयान्यथानुपपत्त्यापि तेषां पूर्वपूर्वस्या
धिक्यमित्याह। लयइति। हि यस्मात्तेषां व्युत्क्रमतः उत्पत्तिक्रमापेक्षया विपरीतक्रमेण लयो भवेत्। अतस्तस्मादेव हरिः प्रलये श्री
सहायः शेत इत्यन्वयः। व्युत्क्रमेण लये हि उत्तरेषां पूर्वपूर्वेषु लयइत्युक्तं तस्मात्तथाचोत्तरोत्तरापेक्षया पूर्वपूर्वेषु विद्युसत्विधाना
धिक्यं स्वरूपसामर्थ्याधिक्यं व्याप्त्याधिक्यं च लभ्यते। अतएव व्युत्क्रमेण लये विरिंचिपर्यंतलयप्राप्तौ रमारमणमात्रावशेषउप
पद्यते। अन्यथा सतस्यादिति भावः। हरेरत्यंतसामीप्यं लयोलक्ष्म्याः प्रकीर्तितइति वचनात् श्रीसहायइत्युक्तं शेतइत्यनेनेतरवा
यनवच्छयनप्राप्तावाह। निजेति। अनंता महत्त्वेयोवताराः यस्य सोनंततयोक्तः तथा अनंतः कालतो देशतो गुणतश्च परिच्छेदशून्यः। त

लयो भवेद्व्युत्क्रमतो हि तेषां ततो हरिः प्रलये श्रीसहायः। शेते निजानंदममंदसांद्रसंदोहमेको ह्यनुभवन्ननंतः। अनंता ॥ ॥
शीर्षस्य करोरुपादः सोनंतमूर्तिः स्वगुणाततंतान्। अनंतशक्तिः परिपूर्णभोगो भुंजन्व्रजंस्तैर्निजरूप आस्ते ३३ ३४

यः अनंतशीर्षस्य करोरुपादः अनंता अपरिमिताः शिरोमुखहस्तोरुपादा यस्य स तथा। एतादृशः परमात्मा स्वस्यविद्यमानानंतान्गुणा
न् अनुभवन् साक्षात्कुर्वन् तथा अमंदसांद्रसंदोहं निजानंदं भुंजन् अनल्पनिरंतरसमुदायरूपं स्वरूपानंदं भुंजानस्तथानं
तः शक्तयो यस्य स तथा परिपूर्णभोगायस्य स तथा। अत्रानंदसमुदायस्य समुदायिभ्यो भेदशंकानिरासाय संदोहस्य विशे
षणं निजानंदमिति। तथा भुंजन्नित्यनेन तापर्तात्वशंका प्राप्ता तन्निवृत्त्यर्थमुक्तं परिपूर्णभोगइति। प्रलयइत्युक्त्या कालविशेषए
वायमानंदभोगइतिशंकानिवृत्त्यर्थे भजस्वमित्युक्तं निजरूपो मूलरूपः एवंभूतः सन्नास्ते तिष्ठतीत्यनेन शेतइत्येतद्व्याख्या
तं भवति ३३ ३४

3

नन्वेवंप्रलयेवस्थितस्यहरेःसुतः किंज्ञात्पमित्यपेक्षायामाह। एवंसुतनमिति। एवंपूर्वोक्तरीत्यासर्वमेतज्जगत्सुतः। सृजते। हियस्माज्जगत्प्रवाहो
नाद्यनंतइत्यर्थः। ननुमहाप्रलयेसर्वपदार्थानांपरिसमाप्तत्वात्कथंसुतः सृष्ट्युपपत्तिरित्यतआह। नित्याहीति। नतावत्सृज्यानांजीवानां
परिसमाप्तिः। तेषांनित्यत्वात्अनंतत्वाच्चनाप्युपादानाभावाद्देहविशिष्टत्वेनतदुत्पत्त्युपपत्तिः प्रकृतेरपिनित्यत्वात्तानापिसृष्टि

एवंसुतः सृजतेसर्वमेतदनाद्यनंतोहिजगत्प्रवाहः। नित्याश्चजीवाः प्रकृतिश्चनित्याकालश्चनि
त्यः किमुदेवदेवः ३५ यथासमुद्रात्सरितः प्रजाताःसुतस्तमेवप्रविशंतिशश्वत्। एवंहरेर्नित्य
जगत्प्रवाहस्तमेवचासौप्रविशत्यजस्त्रं ३६ ॥ ॥श्रीगणेशायनमः॥ ॥ ॥

कालरूपनिमित्तकारणाभावात्। कालस्यापिनित्यत्वात्। यदैवंजीवादेःपराधीनस्यापिनित्यत्वंतदादेवदेवस्यहरेर्नित्यत्वंकिमु
वक्तव्यमतः कार्याभावादपिसुतः सृष्ट्यनुपपत्तिर्नसंभवतीत्यर्थः ३५ नन्वेवंजीवादीनांनित्यत्वेतेषांप्रलयोनामकइत्यपे
क्षायांसदृष्टांतेसृष्टिप्रलयावुपपादयति। यथेति। तमेवसमुद्रमेवशश्वत्प्रविशंति। तथाहरेःसकाशात्रिःसरत्ययंनित्यजग
त्प्रवाहस्तंहरिमेवासौनित्यजगत्प्रवाहोजस्त्रंप्रतिलयंप्रविशतीत्यर्थः ३६ ॥

नेदंजगज्जन्मादिकर्तृत्वंमिथ्येतिमंतव्यंतज्ज्ञानमात्रेणासर्वज्ञरूपार्थोत्तममोक्षप्राप्तेर्नहिमिथ्यात्वतस्यज्ञानेनतत्किंचित्फलमित्याश
येनाहएवमिति।एवमुक्तरीत्यापुरुषोत्तमस्यहरेःपरमात्मत्वाख्यामनंतांअपरिमितांशक्तिंसृष्टिसंहारकर्तृत्वशक्तिंयेविदुःतेअ
नंतस्यहरेःप्रसादाद्दग्धदोषाःभस्मात्कृतसर्वकर्माणःसंतस्तंपरेशंसर्वोत्तमंपरंविलक्षणंहरिमाप्नुवंतीत्यर्थः।अत्रविदुरि
त्यनेनवैराग्यभक्तिश्रवणमननतिदिध्यासनजन्यमपरोक्षज्ञानंभगवत्प्रसादजनकंविवक्षितमितिसूचयितुंतस्यप्रसादादि

एवंविदुर्येपरमामनंतामजस्यशक्तिंपुरुषोत्तमस्य।तस्यप्रसादादपदग्धदोषास्तमाप्नुवंत्याशुपरंपरेशं ३७ ॥
देवानिमान्मुक्तसमस्तदोषान्स्वसन्निधानेविनिवेश्यदेवः।मुक्तस्तदन्यानधिकारयोग्यान्तत्तद्गुणानेवपदेनियुंक्ते ३८

मुक्तौ ३७ नचैवंमुक्तःसृजतेसर्वमेतदित्युक्त्यासंसारान्मुक्तानामपिपुनःसृष्टिःप्रतीयतइत्यतआहदेवानिमानिति।इमान्देवान्
देवादीन्मनुष्योत्तमपर्यंतान्सज्जीवान्स्वसंनिधानेयथायोग्यंश्वेतद्वीपादौविनिवेश्यस्थापयित्वामुक्तस्तदन्यानधिकार
योग्यान्ततद्गुणान्ब्रह्मरुद्रादितत्तद्गुणास्थान्जीवान्पदेतत्तद्गुणयोग्यपदेनियुंक्तेनियोजयतीत्यर्थः।विमुक्तसमस्तदोषानि
तिहेतुगर्भविशेषणंतेषांमुक्तःसंसारप्रापककर्माद्यभावात्तदन्यानेवनियुंक्तेइतिभावः ३८ ॥ ॥७७७॥ ॥

एवंप्रासंगिकं प्रलयादि निरूप्य प्रकृतां सृष्टिमेवाह। सनन्देति। चतुर्मुखादुत्पत्त्यनंतरं सनः मारीचतः मरीचिसुतात्कश्यपाद दित्यां दक्षसु
तायां तद्भार्यायां देवा जाता इत्यर्थः। तथा असुराश्च दित्यां। दितिसंज्ञकायां दक्षसुतायामेव कश्यपभार्यायां जाता इत्यर्थः। गावो मृगाः
पतत्र्युरगादिसत्वाः प्राणिनो दाक्षायणीष्वेव सुरभिविनताकद्र्वित्यादिषु कश्यपभार्यासु समस्तशः सर्वे पि जाता इत्यर्थः ३९
एवं सृष्टिसंहारमोक्षकर्तृत्वरूपं श्रीविष्णोर्महिमानं निरूप्य स्थितिकर्तृत्वरूपं महन्माहात्म्यमुपवर्णयितुं प्रक्रमते तत इत्यादिना

सनन्दमारीचत एव देवा जाता अदित्यामसुराश्च दित्यां। गावो मृगाः पतत्र्युरगादिसत्वा दाक्षायणीष्वेव समस्तशो
पि ३९ ततः समग्रामलयो लयोदधौ महीं विलोक्याशु हरिर्वराहः। हृत्वा विरिंचार्थमिमां सशैलां सुहृत्य वारा
सुपरि न्यधात्स्थिरं ४० ॥

स्थितिर्नाम लोकोपद्रवकारिदुर्जनसंहरणपूर्वकसज्जनसंरक्षणं तच्च वराहादिलीलावतारैर्भगवतानुष्ठितमित्यभिप्रेत्य प्रथमत
स्तावद्वराहप्रादुर्भावनिमित्तमाह। तत इति। ततः सर्वसृष्ट्यनंतरं अलयः लयरहितः स हरिर्लयोदधौ प्रलयसमुद्रे मग्नां मही
मिं विलोक्याशु वराहो भूत्वा विरिंचार्थं सशैलामिमां महीं सुहृत्य वारां प्रलयजलानामुपरि स्थिरं यथा भवति तथा न्यधात्
स्थापयामासेत्यर्थः। अत्र विरिंचार्थमित्यनेन स्वायंभुवमनुना प्रार्थितस्य चतुर्मुखस्य ध्यायमानस्य नासापुटाद्वराहपोतो
निर्गतादिति भागवतीकथां सूचयति ४० ॥

अत्र लयोदधौ मग्नामिति विशेषणेन द्विवारं मग्नां महीं समुद्धरता वराहेण हिरण्याक्षोऽसुरोपि द्विवारं हत इति विशेषं सूचितवान् भगवानाचार्यस्त
त्र कथंभूतो द्विवारं मग्नत्वं कथं च द्वौ हिरण्याक्षौ केन प्रकारेण च हतावित्याकांक्षायामाह ॥ अथेत्यादिना ॥ अब्जनाभस्य पद्मनाभस्य ह
श्रि रेः प्रतिहारिणौ द्वारपालकौ जयविजयाख्यौ आस्तां तत्र तौ निरुद्धानां सनकादीनां शापात् । त्रिशः त्रिवारं भूमितले प्रजातावित्यर्थः ॥
श इत्युक्तं विवृणोति दित्यामिति । आदौ हि दित्यां हिरण्यो हिरण्यकशिपुर्हिरण्याक्षनामानौ तत्राभकौ सुरविद्वेष्टारौ जातावित्यर्थः ॥ अ
थ तदनंतरं राक्षसौ रावणकुंभकर्णनामानौ जातावित्यर्थः । परस्तात्तृतीये जन्मनि हरेः पैतृष्वसेयौ पितुर्वसुदेवस्य भगिन्याः पु
त्रौ शिशुपालदंतवक्त्रनामानौ जातावित्यर्थः ४१ ततः किमित्यत आह । हत इति । तत्रापि दितेः सुतो हिरण्याक्षोऽवरजः सुरार्थे देवान्

अथाब्जनाभस्य प्रतिहारपालौ शापात्त्रिशो भूमितले प्रजातौ ॥ दित्यां हिरण्याक्षवराक्षसौ च पैतृष्वसेयौ च हरेः परस्तात् ४१
हतो हिरण्याक्ष उदारविक्रमो दितेः सुतो योऽवरजः सुरार्थे । धात्रार्थितेनैव वराहरूपिणा वरोद्धृतो पूर्वहतो ऽब्जजोद्भवः ४२

मर्थे धात्रा ब्रह्मणा अर्थितेन वराहरूपिणा हरिणा हत इत्यर्थः । तथा पूर्वं वरोद्धृतो प्रलयोदके मग्नायाः धरायाः उद्धृतौ अब्जोद्भवात् ब्रह्मणः
सकाशादुत्पन्न आदिहिरण्याक्षः पूर्वं हत इत्यर्थः । अत्रायं भावः । पूर्वं स्वत एव लयोदके मग्नां महीं स्थापयन् भुवमनोरर्थे ब्रह्मणा प्रा
र्थितेन हरिणोद्धरता मध्ये ब्रह्मजेनादिहिरण्याक्षेणावरोधे कृते सति प्रथमं हिरण्याक्षो दंष्ट्रया हतः । द्वितीयवारं तेनाविष्टे नव
द्वारपाले तत्र भावलात्मज्जितां भूमिं समुद्धर्तुं सुरैः प्रार्थितेन ब्रह्मणा स्तुतेन तेनैव वराहरूपेण हस्तेन कर्णताडनाद्दितेः सुतो हि
रण्याक्षो हत इति । तथा चोक्तं ब्रह्मांडे । ब्रह्मजस्तु हिरण्याक्षः प्रथमं दंष्ट्रया हतः । स एव पार्षदो विष्णोर्द्वितीयः कर्णताडनात् । पूर्वं
लयोदधौ मग्नां द्वितीयां तेन मज्जितां । भुवमुद्धरतैवासौ हिरण्याक्षोऽहन्यतेति ४२ ॥ ॥

एवं वाराहकल्पमत्स्यपादौ वराहावतारं तदुक्तं प्रयोजनद्वयं चोक्त्वा अनंतरं मत्स्यावतारं तदुक्तं प्रयोजनद्वयं चाह। अथो इति। तत्रा
दौ विधातुर्ब्रह्मणो मुखचतुष्टयाद्विनिःसृतां श्रुतिं वेदान् हयास्यनामासुरेंद्रो जगृहे गृहीतवान्। तदा मत्स्यवपुस्तं हयास्यं हत्वा तान्
वेदान्विधातुः धात्रे ददावित्यन्वयः। इदमेकं प्रयोजनं द्वितीयं च मत्स्यावतारप्रयोजनमाह। मनुं मुनींश्च अजुगोपेति। मनुं वैवस्वतमनुं च
तीन्स सप्तर्षीन् ररक्षितवानित्यर्थः ४३ द्वितीयं प्रयोजनं सविस्तरमाह। मन्वंतरेति। उत्तमसंविदात्मा मत्स्यरूपो देवदेवो हरिः वैवस्व

अथो विधातुर्मुखतो विनिःसृतान्वेदान्हयास्यो जगृहे सुरेंद्रः। निहत्य तं मत्स्यवपुर्जुगोप मनुं मुनींस्तांश्च ददौ विधातुः॥
४३ मन्वंतरप्रलये मत्स्यरूपो विद्यामदान्मनवे देवदेवः। वैवस्वतायोत्तमसंविदात्मा विष्णोः स्वरूपप्रतिपत्तिरूपां ४४
अथो दितेर्ज्येष्ठसुतेन शश्वत्प्रपीडिता ब्रह्मवरात्सुरेशाः। हरिं विरिंचेन सहोपजग्मुर्दौरात्म्यमस्यापि प्रशंसुरस्मै ४५

तायमनवे विष्णोः स्वरूपप्रतिपत्तिरूपां हरेः यथावत्स्वरूपज्ञानस्वरूपां विद्यां चाक्षुषमन्वंतरप्रलयेऽदादित्यन्वयः ४४ इदानीं नृ
सिंहावतारप्रसक्तिं दर्शयति। अथो इति। दितेर्ज्येष्ठसुतेन हिरण्यकशिपुना ब्रह्मवरात्त्रिभिन्नान्सुरेशा इंद्राद्याः शश्वद्बहुवारं प्रपी
डिताः संतो विरिंचेन सह हरिमुपजग्मुः॥ गत्वा चास्य हिरण्यकशिपोः दौरात्म्यं तत्कृतं दौर्जन्यमस्मै हरये प्रशंसुरपीत्यन्वयः॥ ॥
अपीत्यनेन केवलं प्रशंसुः किंतु स्तुतिमपि चक्रुरित्यभिप्रैति ४५ ॥ ॥ ॥

अतएवाह। अभिष्टुत इति। तैर्देवैरभिष्टुतः सहरिरूपवीर्यः स हरिरूपवीर्यः सन्नृसिंहरूपेणाविरासीत्। प्रादुर्बभूवेत्यन्वयः। तदवतार
प्रयोजनमाह। हत्वेति। हिरण्यं हिरण्यकशिपुं हत्वा तस्य हिरण्यकशिपोः सुताय प्रह्लादाय अभयं दत्वा देवगणान्ब्रह्मादीन् अतोषयदि
त्यन्वयः ४६ अनंतरं श्रीकूर्मावतारस्य प्रयोजनमाह। सुरासुराणामिति। उदधिं समुद्रं विमथ्नतां मंथनं कुर्वतां देवासुराणां मध्ये श्रीहरिः

अभिष्टुतस्तैर्हरिरूपवीर्योन्नृसिंहरूपेणस आविरासीत्। हत्वा हिरण्यं च सुताय तस्य दत्वाभयं देवगणानतोषयत् ४६
सुरासुराणामुदधिं विमथ्नतां दधार पृष्ठेन गिरिं स मंदरं। वरप्रदानादपरैरधार्यं हरस्य कूर्मो वृहदंडवोढा ४७ ॥

कूर्मो भूत्वा पृष्ठेन मंदरगिरिं दधारेत्यन्वयः। कीदृशं गिरिं हरस्य रुद्रस्य वरप्रदानात्त्रिभिन्नादपरैरधार्यं धारयितुमशक्यमित्यर्थः। एता
दृशं मंदरधारणं हरेर्नाश्चर्यवृद्धिकरमित्यभिप्रायेणाह कूर्मविशेषणं वृहदंडवोढा। वृहतो तिस्थूलस्यांडस्य ब्रह्मांडस्य वोढा धा
रकोधारक इति यावत्। पंचाशत्कोटियोजनविस्तीर्णस्य मंदराद्यनेकमहागिरियुक्तस्य ब्रह्मांडस्य धारणे समर्थस्य तदेकदेश
मंदरगिरिधारणं किमाश्चर्यमिति भावः ४७ ॥

अथवामनावतारं सप्रयोजनमाह। वरादित्यादिना। दैत्यराट् दैत्यानां राजा वलिः चतुर्मुखस्य वराद्देवान्जित्वा देवैर्जेतुमशक्यत्वं
दावाप तदा स हरिः अब्जभवादिभिः संस्तुतः सन् अजोऽपि जननरहितोऽपि अदितेरजायत प्रादुर्भूतः अत एव महानपि सर्वश्रेष्ठोऽपि
इन्द्रावरजः इन्द्रस्यावरजोऽनुजो जायतेत्यर्थः ४८ स वामनात्मा हरिः असुरमुख्यतोऽसुरमुख्यस्य मुखतो राज्ञो वलेर्वरं याचित्वा गां भू
मिं पदे पदे सत्रमयन्नसतां कुर्वन् जगाम प्राप्तेत्यन्वयः। तदनंतरं किं कृतवानित्यत आह जहारेति। अस्माद्वलेः सकाशात् छल
तः त्रिपदां भूमिं देहीति याच्ञाछद्मना त्रिविष्टपं स्वर्गं जहार पात् हृतवानित्यर्थः। कथं जहारेत्यत उक्तं त्रिभिः क्रमैरिति त्रिभिः पदक्र

वराज्जेयत्वमवाप दैत्यराट् चतुर्मुखस्यैव वलिर्यदा तदा। अजायतेन्द्रावरजोऽदितेः सुतो महानजोऽप्यब्जभवादिसंस्तुतः ४८
स वामनात्मासुरमुख्यतो वरं जगाम गां सत्रमयन् पदे पदे। जहार चास्माच्छलतस्त्रिविष्टपं त्रिभिः क्रमैस्तच्च ददौ निजाग्रजे
४९ पितामहेनामस्य शराभियाचितो वलेः हन्ते केशव आह यद्वचः। नायाच्छयाहं प्रतिहन्मि तं वलिं स्तुमाननेत्येव ततोऽप्ययाचत ५०

मतौरित्यर्थः। तच्चापहृतं त्रिविष्टपं निजाग्रजेन्द्राय ददावित्यर्थः ४९ ननु दितिजत्वाविशेषात् हिरण्यादीनिव वलिमपि हत्वा किमि
र्थं त्रिविष्टपं न जहारेत्यत तत्र कारणमाह। पितामहेनेति। अस्य वलेः पितामहेन प्रह्लादेन वलेः हतेर्वलेर्भियाचितो वति
र्हितं व्रजति प्रार्थितः केशवो यस्मात्कारणात् प्रह्लादं प्रति वचो वचनमाह। तत्किं वचनमित्यत आह नेति। हे सुमानन प्रह्ला
द अयाच्छया याचनाव्यतिरेकेण तं वलिं न प्रतिहन्मि इति वचनं आहेति पूर्वेणा संवंधः यत एव माह तत एव कारणादप्यया
चत न तच्च शक्त्येत्यर्थः ५० ॥ ॥

रदातंभार्गवरामावतारंवक्तुंप्रस्तौतिमाहावमत्क्विरइति। अखर्वाः दुर्गपर्वजन्मनि चंडत्वलामतोरुड्स्यवरादत्तेयाः संतोषरात्तलेन्नय
रूपेणावमत्विरेजत्यन्त्राइत्यर्थः।तैरखर्वैरर्दिताःपीडितावासवनायकाइंद्रमुख्याः खर्वाअभुजंश्रीब्रह्मणांगुरोनिवायपुरस्तुत्य
हरिमस्तवंतस्तुतवंतइत्यर्थः ५१ स्तुतिप्रकारंदर्शयति। विरिंचस्यस्पष्टैरिति। विधात्रुर्वैरात्रितरां विरिंचस्यपष्टैःप्राणिभिरवध्यो दि
तिजोहिरण्यकोहिरण्याक्षोहिरण्यकशिपुनामानो।तथाहयग्रीवोहयास्यनामाखर्वइत्येतेत्रयोब्रह्मवरात्तनेब्रह्मणाःघ्नवर्धख
स्यापिवरात्तनेतएवंविद्यमानेनादिपुरुषेणत्वयोहतास्तताइत्यन्वयः ५२ येनत्वयाहताःसत्वंचरुद्रवरात्समस्तैरवध्यानिम
वपैरपिरवंडलामतोवरात्रवरात्वजेयाअखर्वाधैरावरात्तलेतैरर्दितावासवनायकाःखर्वाःपुरोनिधायाभुजमस्तुवन्हरिं
५१ विरिंचस्पष्टैर्नितरामवध्योवराद्दितिजौहिरण्यकौ।तथाहयग्रीवउदारविक्रमस्त्वयाहताब्रह्मवरात्तनेन। ५२
सचापिरुद्रवरादवध्यानिमान्समस्तैरपिदेवदेवानिःसीमशक्त्येवनिहत्यसर्वान्हृदंबुजेनोतिवसाघशश्वत् ५३
इत्यादरोक्तःक्षितिदशैरजेयःसशार्ङ्गधन्वाथमहर्षहोत्ता। रामोनिहत्याखर्वपुगंसुयं(?)दादाननादिविदधेस्तजेव ५४
खर्वपरूपानसर्वान्खराविःसीमशक्त्यानिहत्यैवनोस्माकंहृदंबुजेहृदयपद्मेशश्वत्सर्वदानिवसनिवासंकुर्वित्यर्थःतिःसी
मशक्तिस्तुचनार्थदेवदेवेतिसंबोधनं ५३ अथानंतरंइतिउक्तप्रकारेणात्रिदशैरादरोक्तःसादरंस्तुतःसहरिरजेयोजेतुमश
क्यःशार्ङ्गधन्वासन्महर्षहोमहर्षुजुतस्तोघ्नहःपरशुरामोहदित्यर्थः। अनंतरंकिंकृतवानित्यतआहरामइति।रामःपरशुरा
मःजयंत्याररंअखर्वदैत्यसमूहंनिहत्याष्टत्रारुधिरेणाड्क्दाधिविदधेइत्यन्वयः। अनेनवजूवारंवहवोहताइतिसूचयति।
अत्रदित्यततोत्पत्तिशंकाप्राप्ततांनिवारयत्यनादिरितिविशेषणेन ५४ ॥

तां०टी०
६१

अथेदानींश्रीरामावतारकथांसविस्तरंवक्तुकामस्तदवतारप्रसक्तिंतावद्दर्शयति। ततइति। खलस्यास्यब्रह्मक्षत्रस्यकुलेसंततौवि
श्रवसःसकाशात्प्रसूतौजातौकावित्यतआह। वताविति। यौआदिदैत्यौहिरण्यकशिपुहिरण्याक्षौपुराशापकालेमयैववध्यौ
भवतंत्रिजन्मस्वित्येवंरूपाद्धरेर्वरतःपरैरवध्यौतौरावणःकुंभकर्णश्चेतिप्रसूतावित्यर्थः। कथंभूतौरावणकुंभकर्णावित्यत
आह। खरैरजेयौजेतुमशक्यावित्यर्थः ५५ तत्रापिकुंभकर्णोविशेषोऽस्तीत्याह। सर्वैरिति। पुरातनेजन्मनिहिरण्याक्षजन्मनि
तपसाराधितस्यधातुरेववरात्सर्वैरजेयःकुंभकर्णोजातइत्यर्थः। रावणस्तुनरादीन्हतएवमनुष्यादीन्हत्वैवसर्वैरजेयोजात

ततःखलस्यास्यकुलेप्रसूतौतावादिदैत्यौजगदेकशत्रूपरैरवध्यौवरतःपुराहरेःखरैरजेयौचवराद्विधातुः ५५ सर्वैर
जेयःसचकुंभकर्णःपुरातनेजन्मनिधातुरेव।वरान्नरादीन्हतएवरावणस्तदातनातौत्रिदशानबाधतां ५६ तदाब्जजंशूलि
नमेवचाग्रतोनिधायदेवाःपुरुहूतपूर्वकाः।पयोंबुधौभोगिपभोगशायिनंसमेत्ययोग्यांस्तुतिमभ्ययोजयन् ५७ ॥

इत्याहनरादीनिति। तदातनातस्मिन्नेवजन्मनिरावणजन्मनीतियावत्। तत्रत्वब्जाद्वरादित्यर्थः। एवंखरैरजेयत्वमुभयोरप्यस्ती
त्युक्तंभवति। एवंभूतौतौत्रिदशान्देवानबाधतांबाधितवंतावित्यर्थः ५६ ततःकिमभूदित्यतआह। तदेति। यदाअबाधतां
तदापुरुहूतपूर्वकाइंद्राद्यादेवाअब्जजंब्रह्माणंशूलिनंरुद्रंचाग्रतःपुरतोनिधायगत्वापयोंबुधौक्षीराब्धौविद्यमानेश्वे
तद्वीपेवर्तमानंभोगिपभोगशायिनंशेषस्यशरीराख्यपर्यंकेशयानंश्रीनारायणंसमेत्ययोग्यांस्वयोग्यांस्तुतिमभ्ययो
जयन्कृतवंतइत्यर्थः ५७ ॥ ॥

राम
६१

तांस्तुतिमेवदर्शयति।त्वमेकइत्यादिना।जगतांभुवनानांत्वमेकएवेशः स्वामीपरमउत्तमः।स्वतंत्रोऽनन्याधीनोनियोक्तानियामकश्चे
त्यर्थः।तथाग्र्याः पूर्वोत्पन्नाअतीयताइतियावत्।तथाचरमाअनागताः चशब्देनवर्त्तमानाश्चएतेंबुजोद्भवाब्रह्माणःस्वधायेत्येप्र
जेशाः।तेसर्वेत्वदाज्ञयैवाखिलंभूतभविष्यद्वर्त्तमानंजगद्वितेनिरेनिर्मितवंतइत्यर्थः।येत्येचरमाअंबुजोद्भवाश्चतेपीतिवा ५८ अ
तीतवर्त्तमानानागतब्रह्मकल्पेषुविद्यमानाब्रह्माणः।त्वदाज्ञयैवतिष्ठंतीतिविज्ञापितंदेवैः।तत्रैकैकब्रह्मकल्पस्यकालप्रमाणंवि
ज्ञापयितुंब्रह्मादेवाइत्याह।मनुष्यमानादिति।परमाणुकालमारभ्यद्व्यणुकत्रसरेणुत्रुटिवेधलवनिमेषक्षणकाष्ठालघुघ
टिकामुहूर्त्तप्रहरयामाहोरात्रपक्षद्वयमासर्त्वयनद्वयेत्येवंरूपः संवत्सरोमनुष्याणांवर्षमित्युच्यते।एवमुत्तरीत्यामनुष्य

त्वमेकईशःपरमस्वतंत्रस्त्वमादिरंतोजगतांनियोक्ता।त्वदाज्ञयैवाखिलमंबुजोद्भवावितेनिरेग्र्याश्चरमाश्चयेत्ये ५८
मनुष्यमानात्त्रिशतंसषष्टिकंदिवौकसामेकमुशंतिवत्सरं।द्विषट्सहस्रैरपितैश्चतुर्युगंत्रेतादिभिःपादशएवहीनैः ५९

मानान्मनुष्यवर्षप्रमाणमपेक्ष्यमनुष्यवर्षाणांसषष्टिकंषष्ट्युत्तरंत्रिशतंशतत्रयंदिवौकसांदेवानामेकंवत्सरमुशंतिवदंतीत्य
र्थः।तैर्दैवानांवर्षैर्द्विषट्सहस्रैश्चतुर्युगंभवतीत्यर्थः।दिव्यैर्द्वादशसहस्रवर्षैःकथंचतुर्युगंभवतीत्यतआह।त्रेतादिभिरिति।दि
व्यैश्चतुःसहस्रैःकृतयुगं।त्रिभिःसहस्रैस्त्रेतायुगं।द्वाभ्यांद्वापरयुगं।एकेनकलियुगं।एवंमिलित्वाद्वादशसहस्राःसंपन्नाउपरित
सहस्रद्वयस्यविंशतिशतानिभवंति।तत्रयुगचतुष्टयेसंधिवर्षाणिपूर्वोत्तरंसहस्रक्रमेणयोज्यानि।तथाहि।कृतयुगेपूर्वंश
तचतुष्टयंपश्चादपिशतचतुष्टयमित्येवमष्टौशतानि एवंत्रेतायांपूर्वोत्तरंषट्शतानि एवंद्वापरेपूर्वोत्तरंचतुःशतानि।तथा
कलियुगेपूर्वोत्तरंशतद्वयमितिविंशतिशतानिसंपन्नानीत्येवंत्रेतादिभिःपादशःएकैकपादतोहीनैर्हीनैःकृतादिभिश्चतुर्युगं
भवतीत्यर्थः ५९ ॥ ॥

ता०टी०
६२

३

ततः किमित्यत आह । सहस्रवृत्तमिति । तच्चतुर्युगं सहस्रवृत्तं सहस्रवारमावृत्तं तत्स्वयंभुवो ब्रह्मणो हरिरित्युच्यते । सहस्रवृत्तं तदेव
निशा रात्रिरित्युच्यत इत्यर्थः । तन्मानेन मितं परिगणितं पक्षमासादिक्रमेण परिच्छिन्नं शरच्छतं शरदां वर्षाणां शतं ब्रह्मणो भव
तीत्यर्थः । तत्र विद्यमानो ब्रह्मा त्वदाज्ञया स्वान्तस्वस्य विद्यमानानैहिकान्भोगान् सत्यलोके भुक्त्वा त्वदाज्ञयैवाचरितस्वराचा
र त्वदंतिकं त्वत्समीपं उपैति प्राप्नोतीत्यर्थः । एतादृशस्यापि ब्रह्मणो भगवदाज्ञालंघनं न संभावनीयं इति सूचयति सोपि त्वरित
रति ६० तथान्यदपि महत्त्वं देवा विज्ञापयंतीत्याह । त्वयेति । पुरा पूर्वं कर्णपुटात् कर्णशष्कुलीतो विनिःसृतावुत्पादितौ तौ का

सहस्रवृत्तं तदहः स्वयंभुवो निशा च तन्मानमितं शरच्छतं । त्वदाज्ञया स्वान्तमुपभोगादुपैति सोपि त्वरितस्त्वदंतिकं ६०
त्वया पुरा कर्णपुटाद्विनिःसृतौ महासुरौ तौ मधुकैटभाख्यौ । प्रभंजनावेशवशात्त्वदाज्ञया विलोडितावाप्सुजलेप्यवर्द्धतां ।
६१ त्वदाज्ञया ब्रह्मवराद्वध्यौ विक्रीडिषासंभवया सुखोद्गतान् । स्वयंभुवो वेदगणान्नहार्षतां तदाभवस्त्वं हयशीर्ष ईश्वरः ६२

वित्यतश्च तौ महासुराविति यौ विनिःसृतौ तौ मधुकैटभाख्यौ महासुरावित्यर्थः । त्वदाज्ञया प्रभंजनावेशवशात् त्वदाज्ञानिमित्तात्प्र
भंजनस्य वायोरावेशाद्विलोडितौ संतौ जले अप्सु वेगेन अभ्यवर्द्धतां । ववृधाते इत्यर्थः ६१ तथा विक्रीडिषासंभवया क्रीडेच्छ
या जातया त्वदाज्ञया अहमाभ्यां युद्धादिना क्रीडिष्ये तौ वध्यौ त्वं वरं देहीत्येवंरूपया त्वदाज्ञया दत्तात् ब्रह्मवराद्वध्यौ जातौ
वित्यर्थः । अनंतरं किं कृतवंतावित्यत आह । सुखोद्गतानिति । स्वयंभुवो सुखोद्गतानिति । स्वयंभुवो मुखोद्गतान्निर्गता
न्वेदान् हार्षतामपहृतवंतावित्यर्थः । यदाहार्षतां तदा ईश्वरस्त्वं हयशीर्षो हयग्रीवावतारोऽभवो जात इत्यर्थः ६२ ॥

राम
६२

हु२

ताभ्याम खिलाच्चेदानात्हृत्वापत्हृत्यस्वयंसुर्वंप्रदायदत्वातौचदस्यू चोररूपिणौ वैरिणौ मधुकैटभौ तत्रैव हतवानसीत्यर्थः॥तद्धननेन
त्वदपिप्रयोजनंसंपन्नमित्याह्वरित्याह। निःपीडिताविति। ऊरुतलेप्रदेशेकराभ्यांनिष्पीडितौ वितिपृथगेवान्वयः॥तन्मेदसातस्मादु
रुतलाद्उत्पन्नेनमेदसारुधिरमज्जयोर्मध्यवर्त्तिनामेदोनाम्नाधातुविशेषेणामेदिनी महीचकर्थ कृतवानसीत्यर्थः॥अनेनोरुतलेस
र्वधृत्वाद्वौमेदसाजातत्वान्मेदिनीतिपृथिव्यानामद्वयंनिरुक्तंभवतीति ६३ एवंत्वयाहतेषुहिरण्यकादिमधुकैटभांतेषु
सर्वेष्वसुरेषु ब्रह्मादिवराद्वाप्रभंजनावेशाद्वाबलंनचतेषांनिसर्गतः किंचिदपिबलंदेवानांतुनैसर्गिकमेवबलमितितिगीतमि
त्याह्वरित्याह। एवमिति। निसर्गजंस्वाभाविकंवरदानसंभवमिष्टुपलक्षणं आवेशसंभवमित्यपिग्राह्यं ततः किमित्यतआह
आहृत्यवेदानखिलान्प्रदायस्वयंसुवेतौचजघंथदस्यूनिष्पीडितावूरुतलेकराभ्यांतन्मेदसैवाशुचकर्थमेदिनीं ६३
एवंसुराणांचनिसर्गजंबलंतथासुराणांवरदानसंभवं।वशेतवैतत्द्वयमप्यतोवयंनिवेदयामःपितरेवतेखिलं
इमोचरक्षोधिपतीवरोद्धतौजहिस्ववीर्येणनृपप्रसृतः।इतीरितस्तैरखिलैःसुरेश्वरैर्वीरवराभोजगतीपतिःप्रभुः ६४
रित्याहवशइतिएतत्द्वयंबलद्वयमपितवैववशेत्वदधीनमेवयतोतःतेपितःसुरेखिलंसुराह्वतंसामर्थ्यमस्वत्वहंचनिवेदयामोविसा
पोब्रह्मवराद्उद्धतौरावणकुंभकर्णौत्वंनृषुप्रजाताःप्रादुर्भूतःसन्स्ववीर्येणस्वपराक्रमेणजहीत्यर्थः॥एवंविज्ञापितकाये
भगवान्किमनुष्ठितवानित्यतआह।इतीति।तैरखिलैःसुरेश्वरैर्ब्रह्मादिभिरित्युक्तप्रकारेणईरितःप्रार्थितोजगतीपतिर्मही
पतिप्रभुःसमर्थोरामोबभूवेत्यर्थः ६५ ॥ ॥

वास्मात्पुत्रत्वेनवभूवेत्यतआह।सइति।कश्यपस्यसकाशाददितिगर्भजन्मनोऽदितेर्गर्भाज्जन्मयस्यासौतथोक्तः।तादृशस्यविवस्वतःसू
र्यस्यतंतुभवस्येतिव्यधिकरणषष्ठी।सूर्यस्ययस्तंतुःसंततिस्तत्रजातस्यदशस्यंदननाम्नोदशदिक्षुस्यंदतोरथोयस्यसः।तस्य
दशरथनाम्नोभूभृतोराज्ञःकौसल्यकानाम्निगृहेभार्यायांतदर्थिनाहरिःसुतोमेभूयादितीच्छतातादृशःपूजितोरामोभूदित्यर्थः
६६ तदाज्ञयातस्यहरेराज्ञयाभूभृतःपरतोऽस्योरुगुणस्यतस्यहरेर्निषेवणायसेवार्थंदेवगणाःपूर्वमवतारात्पश्चाच्चवभूविरे
इतिसंबंधः।तत्रविशेषोऽस्तीत्याह।वानरेष्विति।पूर्वमितिशेषः।अवतारात्पूर्वंवानरेषुवानरजातौउत्पन्नाः।पश्चिमोद्भवाःरा

सकश्यपस्यादितिगर्भजन्मनोविवस्वतस्तंतुभवस्यभूभृतः।गृहेदशस्यंदननाम्नोभूत्कौसल्यकानाम्नितदर्थिनेष्टः ६६
तदाज्ञयादेवगणावभूविरेपुरैवपश्चादपितस्यभूभृतः।निषेवणायोरुगुणस्यवानरेष्वथोनरेष्वेवचपश्चिमोद्भवाः ६७
सदेवतानांप्रथमोगुणाधिकोवभूवतन्नाम्नाहनुमानग्रभंजनः।स्वसंभवःकेसरिणोगृहेपुरावभूववालीस्वतएववासवः ६८

मावतारानंतरमुत्पन्नाःनरेषुनरजातावेवोत्पन्नाइत्यर्थः ६७ तत्रावतारपूर्वंकेचनवानरेषूत्पन्नाइत्यपेक्षायांप्राधान्यक्रमेण
वाय्वादीनांहनुमदादित्वेनावतारप्रकारमाह।सइति।देवतानांरुद्रादीनांप्रथमआद्योनतकेवलंकालेतामसंद्यः।किंतुगुणाधि
कोऽप्यभूत्ततोवायुर्हनुमन्नाम्नावभूवेत्यर्थः।कस्मात्पुत्रत्वेनवभूवेत्यतआह।स्वसंभवइति।स्वस्मात्संभवोयस्यासौतथाकेस
रिणोनामवानरस्यगृहेभार्यायांप्रादुर्बभूवेतिपूर्वेणान्वयः।तदनंतरमिंद्रस्यावतारमाह।वभूवेति।वासवःस्वतएवस्वस्मा
देवावालीवालितिनामावभूवेत्यर्थः ६८ ॥ ॥

तिथ्यां रविः स्वात्मत एव स्वस्मादेव परमेष्ठितेजसाच्युतः ब्रह्मणोंशेन च्युतः सन् सुग्रीव आसीदित्यर्थः। तदनंतरं धर्मस्यावतारमाह जांबवानि
ति। य एव धर्मो यमः एवं परमेष्ठिवह्नेः ब्रह्मणो वह्नेस्तस्य त्वयुद्भ। व. वह्नेस्य वत्सस्य त्वगिंद्रियात् उद्भवः उत्पत्तिर्यस्य सः तथा
ता द्वैधा इह जांबवज्जन्म निश्वासपतो मुखतो ब्रह्मण इति शेषः अभवदित्यन्वय इत्यर्थः ६९ तथा तस्य धर्मस्य यमाख्यं द्वितीयं रूपम
स्तीति वत्तं द्वितीयं जन्माप्याह य एवेति। च्युतश्च ब्रह्मणः सकाशादुत्पत्त्यनंतरं धर्मनामा सूर्यात्संज्ञयां तद्भार्यायां मोनाम्नाद दक्षि
णादिक्पो दक्षिणादिगीश आसीदित्यन्वय इत्यर्थः। इदानीं जांबवज्जन्म वत्तृतीयमित्याह। स जांबवानिति। दैवतकार्यदर्शिना मं विष्णु

सुग्रीव आसीत्परमेष्ठितेजसा च्युतो रविः स्वात्मत एव जांबवान्नाय एव पूर्वं परमेष्ठिवह्नेस्त्वयुद्भवो धर्म इहास्पतोभवत् ६९
यएव सूर्यात्सुतरेव संज्ञयानाम्नाय मोदक्षिणादिक आसीत्। स जांबवान्दैवतकार्यदर्शिना सुरैव सृष्टो मुखतः स्वयं भुवा
७० ब्रह्मोद्भवः सोम उतास्य सूनोरत्रेरभूत्सोंगद एव जातः॥ बृहस्पतिस्तार उतो शची च शक्रस्य भार्यैव बभूव तारा ७१

ष्णुमावतारकार्यं जानता स्वयंभुवा ब्रह्मणा मुखतः सुतरेव सृष्ट इत्यर्थः। सुरैवोत्पन्नेन वानरेषु प्रसक्तं जन्म परिहरति देवानां वानरे
सत्पत्तेः एवमेवेत्यर्थः ७० यमवच्चंद्रस्याप्यंगदरूपेणाजननं तृतीयमित्याह। ब्रह्मोद्भव इति। आदौ ब्रह्मणः सकाशादुद्भव उ
त्पत्तिर्यस्यासौ तथा। अनंतरमस्य ब्रह्मणः सूनोरत्रेरविनाम [illegible] रभूदिति द्वितीयं जन्म स सोम इहांगदो जात इहांगदो जात इ
त्यर्थः॥ बृहस्पतिस्तारो बभूव उतो अनंतरं शक्रस्येंद्रस्य भार्या शच्यैवतारा बभूवेत्यर्थः ७२ ॥ ॥ ॥

तयोरपीदंतृतीयंजन्मेतिवक्तुमाद्यंजन्मद्वयमाह।बृहस्पतिरितिएवंशच्यासहबृहस्पतिरितिएवंशच्यासहबृहस्पतिः ब्रह्मणोमन
सोभिजातत्वात्ब्रह्मसुतोपिअनंतरंब्रह्मणोद्भवस्यांगिरसोंगिरोनाम्नऋषेःसुतोभूदित्यन्वयः।शचीमारीचजस्यमरीचेःसुतात्क
श्यपाज्जातस्यपुलोम्नःसुताभूदित्यर्थः ७२ इदानीमिदंतृतीयंजन्मेत्याह।सएवेवगुरुर्बृहस्पतिःशच्यासहैवस्वसंभवःस्वस्मा
त्संभवोयस्यसतथातथाभूतःसन्वानरोभूदित्यर्थः।वरुणाख्यसुषेणः।तत्राप्यावानरोभूत्।अश्विनौचविविदोमैंदश्चेतिवानरौ
बभूवतुः ७३ तयोरपिएवंजन्मद्वयमस्तीत्याह।एवंब्रह्मोद्भवौपुनरेवमर्त्यावभवतस्तत्रतयोर्मध्येहियस्मात्कारणात्कनीय

बृहस्पतिर्ब्रह्मसुतोपिएवंसहैवशच्यामनसोभिजातः।ब्रह्मोद्भवस्यांगिरसःसुतोभून्मारीचजस्यैवशचीपुलोम्नः ७२ सए
वशच्यासहवानरोभूत्स्वसंभवोदेवगुरुर्बृहस्पतिः।अभूत्सुषेणोवरुणोश्विनौचबभूवतुस्तौविविदश्चमैंदः ७३ ब्रह्मो
द्भवौतौपुनरेवमर्त्यौबभूवतुस्तत्रकनीयसस्तु।आवेशऐंद्रोवरदानतोभूत्ततोवलीयान्द्विविदोहिमैंदात् ७४ नीलोग्नि
रासीत्कमलोद्भवोत्थःकामःपुनःश्रीरमणाद्रमायां।प्रद्युम्ननामाभवदेवमीशात्सस्कंदतामापसचक्रतांच ७५ ॥

सोपुजस्यापिविविदस्यऐंद्रइंद्रसंबंधीआवेशोवरदानतइंद्रस्यवरदानतोभूत्ततःकारणाद्द्विविदोमैंदादतिवलीयाञ्जातइत्यर्थः
७४ अग्निर्नीलोनामवानरआसीत्।एवंकमलोद्भवोत्थःकामःपुनःश्रीरमणात्कृष्णाद्रमायांरुक्मिण्यांरूपिण्यांप्रद्युम्न
नामाभवत्।एवमीशाद्रुद्रात्सकामःस्कंदतामापस्कंदरूपोभवदिति।तथासएवचक्रतांसुदर्शनचक्राभिमानिदेवतात्व
मापेत्यर्थः ७५ ॥ ॥

ननदुर्गायाश्चक्राभिमानित्वं।तस्यापिरुद्रस्यत्वात्कालोब्जभूर्दुर्गापितस्यतत्वात्साब्जभूप्रलयेदेवीवर्त्ततेचक्ररूपिणीतिप्रमाणसिद्धं अतः
कामस्यकथंचक्राभिमानित्वमित्यतउक्तंवांतराभिमानित्वंवरेणाप्तंकामेनेतिवक्तुं एवंस्थितिमाह।एवमिति।तमःस्थितातमोगुणप्र
वर्त्तकत्वेनस्थितातमोभिमानिनीदुर्गाहरेश्चक्रमभूदितिप्रसिद्धमित्यर्थः।तथासत्वात्मिकासत्वगुणप्रवर्त्तकत्वेनतदभिमानिनीर
माशंखमभूदित्यन्वयः।तस्यानामधेयमाह।श्रीरितीति।यांसत्वात्मिकांश्रीरितिवदंतिसासत्वात्मिकाश्री।हरेःशंखाभिमानिनीत्य
र्थः।अथोअनंतरंरजस्यारजोगुणप्रवर्त्तकत्वेनविद्यमानारजोगुणाभिमानिनीभूर्नाभिकारमाहरेःपद्मम्भूत्तद्रूपपद्माभिमानिनी
स्थितेत्यर्थः ७६ बलसंविदात्माबलस्यातप्रवर्त्तकः।तदात्मकश्चवायुस्तुहरेर्गदाभूदित्यर्थः।तथाविद्येतिप्रसिद्धासरस्वतीशार्ङ्गे

एवंहरेश्चक्रमभूद्धिदुर्गातमस्थिताश्रीरितियांवदंतिसत्वात्मिकाशंखमथोरजस्याभूर्नाभिकापद्ममभूद्धरेर्हि ७६ ॥
गदात्ववायुर्बलसंविदात्माशार्ङ्गंचविद्येतिरमैवखड्गः।दुर्गात्मिकासैवचचर्मनाम्नापंचात्मकोमारुतएवबाणाः ७७ ॥
एवंस्थितेष्वेवसुरातनेषुवराद्धियांगात्वमवापकामः।तत्स्तुतामापचसोनिरुद्धोब्रह्मोद्भवःशंखतनुःस्वमात्मा ॥ ७८ ॥

भूदित्यर्थः।रमैवमूलरूपेणखड्गाभिमानिनास्थितेत्यर्थः।दुर्गात्मिकासैवरमैवचर्मनाम्नाचर्मस्वाद्युधाभिमानिनीत्यर्थः।पं
चात्मकःप्राणापानादिपंचवृत्तिमान्मारुतएवबाणाभिमानीत्यर्थः ७७ एवंस्थितेषुविद्यमानायामेवकामोवराद्धरेर्वराद्धियांगात्वं
चक्रत्वमवापअतोनप्रमाणविरोधइतिभावः।अनिरुद्धेनाप्येवमेवशंखताप्राप्तेतिवक्तुमाह।तदिति।यःपूर्वंब्रह्मोद्भवःसो
निरुद्धस्तत्सुतांतांतस्यकामस्यस्तुतामवाप।अनंतरंकामाद्युत्पन्नइत्यर्थः।सएवस्वमात्मास्वरूपजीवाभिमानीअनिरुद्धो
वराद्धेःखतनुःशंखाभिमानीनभवेत्यर्थः ७८ ॥ ॥

ता०टी०
६५

३

एवंप्रासंगिकंसमाप्यतयोःकामानिरुद्धयोःअवतारमाहतावेवेतिताावेवकामानिरुद्धावेवरामौतोतुरामावतारानंतरंकामोभरता
नाम्नाजातःअनिरुद्धश्चशत्रुघ्नइतिनाम्नाजातइत्यर्थः।अथशेषावतारमाहएवंमिति।भरतशत्रुघ्नोत्पत्तेःएवंशेषःसुमित्रातनय
सुमित्राख्यायादशरथभार्यायास्तनयःसन्लक्ष्मणोनामरघूत्तमादनुजातइत्यर्थः।अनेनादौरामस्ततोभरतःततःशत्रुघ्नस्त्वे
वमवतारक्रमोक्त्याश्रीरामस्यलक्ष्मणादिसर्वापेक्षयाज्येष्ठत्वमुक्तंभवति ७९ सुमित्रातनयइत्यनेनलक्ष्मणएकएवसुमित्रा

तावेवजातौभरतश्चनाम्नाशत्रुघ्नइत्येवचरामतोऽवाक्पूर्वंसुमित्रातनयश्चशेषःसलक्ष्मणोनामरघूत्तमादनु ७९
कौसल्यकाख्युत्तरुत्तमोसावेकस्तथैकोभरतस्यमाता।उभौसुमित्राततयौनृपस्यचत्वारएतेह्यमरोत्तमाःसुताः ८०

तनयइतिप्रतीयतेतन्निरासार्थंसर्वत्रविवेचयन्नाहकौसल्यकेति।असौउत्तरुत्तमोहरिरेवएवकौसल्यकोद्भवोजातइत्यर्थः।
तथाभरतस्यमातुःकैकेय्याएकएवचभरतोजातइत्यर्थः।उभौलक्ष्मणशत्रुघ्नौसुमित्रातनयौसोदरौजातावित्यर्थः।मातृभे
देनपितृभेदेप्राप्तेसत्याहनृपस्येतिएतेअमरोत्तमाश्चत्वारःसुतान्नृपस्यदशरथस्यसुताइत्यर्थः।अनेनकौशल्यका
दितिस्त्रीणांदशरथभार्यात्वमुक्तंभवति ८० ॥ ॥

राम
६५

नतुलक्ष्मणादीनां त्रयाणां संकर्षणादिमूर्त्तित्रयावतारत्वमुक्तं पुराणे तत्कथं घटत इत्यत आह संकर्षणाद्यैरिति शेषकामानिरुद्धेषु
मूलतरूपेषु यथाक्रमं संकर्षणप्रद्युम्नानिरुद्धानामंतर्यामिरूपेणावेशात्तदवतारेष्वपि लक्ष्मणादिषु तद्रूपविशेषसंनिधानसद्भावा
त्पुराणोक्तं तदपेक्षया तदवतारत्वोक्तिरिति भावः। एवमिंद्रावेशस्यांगदेपि विद्यमानत्वात्तत्समानादपि जांबवतः सकाशात्व

संकर्षणाद्यैस्त्रिभिरेव रूपैराविष्ट आसांत्रिषु तेषु विष्णुः। इंद्रोंगदे चैव ततोंगदोहि वली नितांतं सबभूव शश्वत् ८१
येन्ये च तद्रूपा कृतवीर्यजाद्याः वलाधिकाः संति सहस्रशोपि। सर्वे हरेः संनिधिभावयुक्ता धर्मप्रधानाश्च गुणप्रधानाः ८२

वि लाधिकत्वं ज्ञातव्यमित्याह। इंद्र इति। न केवलं विंदे इंद्र आविष्टः किंत्वंगदे चेत्यर्थः हि यस्मात्तत इति संबंधः ८१ एवं सर्वत्रापि स्व
रूपापेक्षया यत्र वलाधिक्यं प्रतीयते तत्र सर्वत्र विष्णुसांनिध्यप्रयुक्तमेव तद्वलाधिक्यमित्याह। य इति। कृतवीर्यजः
कार्त्तवीर्यार्जुनः आद्यो येषां ते भरतादीनां तेन यासंनिधिभावः। सांनिध्यं तेन युक्ता इति हेतुगर्भविशेषणं। न केवलं वलाधि
कत्वं ज्ञातव्यं किं तर्हि अन्येपि गुणास्तत एव ज्ञातव्या इत्याह। धर्मेति। धर्मप्रधाना धर्माधिका एवं गुणाधिकाश्चेत्यर्थः ८२

तत्ररामावतारेरमायाअपिसीतात्वेनावतारप्रकारमाहास्वयमिति।यान्नुपमाअसदृशीस्वयंसाक्षाद्रमैवसीरतोलांगलाज्जाता।
अतोनाम्नासीतेतिजातेत्यर्थः।रामार्थंतत्सेवनार्थं।ननुसीरतोजातात्वेकथंजानकीवैदेहीत्यादिनामतस्याइत्यतस्तन्निमित्तमाह।
विदेहराजस्येति।हियस्माद्विदेहराजस्यजनकराजस्ययज्ञात्ममौयज्ञार्थंस्तांगलेनशोधनेक्रियमाणेतत्रविर्भूतत्वात्ततएवका

स्वयंरमासीरतएवजातासीतेतिरामार्थमनुपमाया।विदेहराजस्यहियज्ञात्ममौस्वतेतितस्यैवततस्तुसान्वत ८३ ॥
इत्यादिकल्पोत्थितएषसर्गोमया समस्तागमनिर्णयात्मकः।सहास्तुसर्गःकथितोत्रपूर्वोयोयोयुगौनित्यमसौवरोहि ८४

गात्ततस्यजनकस्यसुतेतिसासीताप्रसिद्धाभूदित्यर्थः ८३ एवंस्वष्टमन्वंतरवैत्यादिनासविस्तरमादिसर्गानंतरसर्गविभिन्न
योपसंहरतिभगवानाचार्यः।इतीति।इत्युक्तप्रकारेण।आदिकल्पोत्थितइत्यर्थः।किमर्थंकथितइत्यतउक्तं।समस्तेति।सर्गास्तु
सर्गविशेषाणांतव्याख्यानेनसमस्तागमनिर्णायकाःइतिभावः।कथंतेननिर्णायइत्यतोलेशेनदर्शयति।अत्रेति।अत्रादिसर्गेयोयःपू
र्वंसमुत्पन्नःसोसोयुगौतेनातेदादिभिर्वरस्तुनमोहीत्यर्थः ८४ ॥ ॥

ता०टी० ६७ अत्रेत्यस्यव्यावर्त्यमाहापाश्चात्येतितयद्यपिपाश्चात्यकल्पेषुवाराहपाद्मकल्पेषुसर्गभेदाः विचित्रसर्गाःपुराणेषुप्रोक्ताः संतितथा
पि तेऽत्रान्यथाऽऽदिकल्पापेक्षया व्याख्यासेतक्ताः संत्यतस्तेष्ववान्तरसर्गेषुप्रथमत्वेप्रथमोत्पन्नत्वं नोत्कर्षहेतुः पु॥ विकल्प
ज्ञापकं न भवति। यथा सनकादीनां रुद्रात्प्रथमोत्पन्नत्वमवान्तरसर्गेऽस्ति न तत्तस्मादुत्कर्षज्ञापकं रुद्रस्यादि दृष्टव्यं। नैवमादिसर्गेऽपि

हृ

पाश्चात्यकल्पेष्वपिसर्गभेदाः श्रुतौपुराणेष्वपिचान्यथोक्ताः॥ नोत्कर्षहेतुःप्रथमत्वमेषु विशे ॥
षवाक्यैरवगम्यमेतत् ८५ इतिश्रीमदानंदतीर्थभगवत्पादाचार्यविरचिते श्रीमन्महा॥ ॥
भारततात्पर्यनिर्णये सर्गानुसर्गप्रादुर्भावनिर्णयो नाम तृतीयोऽध्यायः॥ ॥ ३ ॥ ॥ ॥

त्यास इति भावः। ननु कथमेतज्ज्ञातव्यमित्यत आह। विशेषेति। एतदुत्कर्षज्ञापकं प्राथम्यं विशेषवाक्यैरवगम्यमवगंतव्यमि राम
त्यर्थः। सर्गभेदप्रतिपादकैः प्रमाणविशेषैरादिसर्गे प्राथम्यमुत्कर्षज्ञापकं न त्ववान्तरसर्गे प्राथम्यमिति विशेषोक्त ६७
त्वादिति भावः इत्यशेषमतिमंगलमिति॥ ॥श्रीमद्भारततात्पर्यनिर्णयाध्यायएवहि। तृतीयो व्याकृतस्तावत्प्रीत्यैमाध
वमध्वयोः॥ ॥इतिश्रीमन्महाभारततात्पर्यनिर्णयटीकायांवरदराजीयेतृतीयोऽध्यायः॥ ॥ ३ ॥ ॥ ॥